

N.A.
Bhakta Vilash
भक्त विलास ॥
Sanskrit
Paper - Handwritten
N.A. (very old)
69 Folio (Folio No. 70 onward missing)
14" X 7.3"
Incomplete

श्रीभक्तविलासप्रारंभः

श्रीचिंतामणिगणपतयेनमः वामांकारूढवामोरुवक्षोजांचितपुष्करं विघ्नवारणहर्यक्षं विघ्नराजमुपास्महे १ गौरीगिरि
त्रायोरंकाद्ंकेकृतगतागतं उद्यद्दानषड्डुक्मुमास्कतमहं भजे २ शिरसा शिवभक्तानां पादांबुजरजःकणान् वंदाम
हे वयं नित्यं वासनाध्वांतभास्करान् ३ वंदामहे वयं नित्यं श्रीकांतद्रुहिणं रविं स्कंदं हरिमुखानन्यानुपमन्युमुखान्मु
नीन् ४ मुनयो नैमिशारण्ये दीर्घसत्रे कृतश्रमाः श्रुतिस्मृतिपुराणज्ञमपृछन्सूतमागतं ५ श्रीमुनयऊचुः अशाद
शपुराणज्ञव्यासशिष्य महामते संदिहाना वयं सर्वे पृछामस्त्वां महत्तम ६ वेदानामागमानांच मंत्राणामपि कर्मणां प्र
तिपादकवाक्यानां वाक्यानां महतामपि ७ कुत्रपर्यवसन्नार्थो जगतां कारणं च किं विचारितेपि वेदांते तदर्थे वगतेपि
च कर्मविधानुवृत्तिश्च नमुंचति कथं पुनः एतत्सर्वमशेषेण विस्तराद्वक्तुमर्हसि ८ इति पृष्टो मुनिवरैः सूतः सर्वार्थवि
त्तमः नमस्कृत्वा महाभागः शिवाय गुरुमूर्त्तये १० विघ्नेशं भारतीं देवीं संप्रदाय प्रवर्त्तकान् प्रणम्य परया भक्त्या वक्तुमे
वंप्रचक्रमे ११ श्रीसूतउवाच साधु पृष्टं मुनिश्रेष्ठाः श्रोतव्यं यद्विशेषतः ॥ श्रुतं यथा गुरुमुखात् यथामति वदामि वः १२ वेदागमपु
राणेषु मंत्रेषु सकलेषु च ॥ एक एव महादेवो विकारेषु यथार्णवः १३ नामांतरपरेष्वेवं शब्देषु शशिशेखरः विना संकोचमाम्ना
येषु धिष्ठानं प्रशस्यते १४ यो वेदादौ स्वरः प्रोक्तो वेदांते च प्रतिष्ठितः तस्य प्रकृतिलीनस्य यः परस्स महेश्वरः १५ येन्नह्म स य
यो विप्र विदुस्तत्सनकादयः ज्ञानविज्ञानयोगेन यत्तत्ते छिन्नसंशयाः १६ जगन्नित्यमनित्यं वा शिवाज्जीवः परो न वा॥

अल्पप्रयादि मट्को शेखु ३

निहित

प्रकृतिलीनायलिन् तस २

अहंकाररहिताभावना चेत् तदा आत्मनि स सं संभावना भवति ३

मुक्तिरस्ति न वाज्ञानात् आत्मादेहो थवा परः १७ इत्याद्याः संशयाः सर्वे तावन्न क्ष्यंति न क्वचित् न यावद्देवता बुद्धिर्गुरौ वित्ता
नदायिनी १८ शिवादपि गुरुः श्लाघ्य इति वेदांत निर्णयः तस्मिन्मानुषबुद्धिर्यः प्रवाहस्तस्य संसृतेः १९ तस्यानुवर्तते हंता जाति
वर्णाश्रमादिषु नित्यधीरप्यनित्येषु जायते प्रकृतेर्वशात् २० भावना विपरीता चेत् सत्यं संभावनात्मनि वेदांतवाक्यशतकै
रपि या न निवार्यते २१ तन्निवृत्यर्थमेवात्र यतंते ब्राह्मणाश्चिरं मुक्तौ कारणं बहुधा तत्र कथयंत्यविवेकिनः २२ कर्माद्यैः कारणं मु
क्तौ तपः प्राहुरथापरे पूर्तमन्ये भिदधते दानमन्ये व्रतं परे २३ तीर्थेषु स्नानमपरे स्थलवासमथापरे अष्टांगयोगमप
रे वेदांतः श्रवणं परे २४ श्रुतार्थमननं केचिन्मूर्त्युपास्तिमथापरे अन्ये सत्संगतिं प्राहुरिति नैकमुखं जगत् २५ कृत्वा
सर्वमिदं कश्चित्पुनर्गर्भे निमज्जति त्यक्त्वा सर्वक्रियः कश्चिदयत्नान्मुच्यते मुनिः २६ तदुक्तेभ्यो ह्युपायोन्यः सर्वबंधविमोचकः॥
अन्वयव्यतिरेकाभ्यां सा नाम्ना भक्तिरुच्यते २७ क्वचिद्भक्तिः कृता कृता क्वापि मार्जारी भक्तिरुच्यते आक्रामंती न गादन्यं
न गंमातरमात्मनः २८ न संकटेपि त्यजति संश्लिष्यन्मर्कटात्मजः तथैवाप्तसहस्रेपि यः शिवं शरणं व्रजेत् २९ सा भ
क्तिरुत्तमा तेषां सर्वबंधविमोचनी मंदा च मध्यमा भक्तिरुत्तमेति त्रिधा मता ३० कथायाः श्रवणे शंभोः नामसंकीर्तने स्मृ
तौ क्वचिद्भवेच्चित्तरतिः सा मंदा परिकीर्तिता ३१ गुरुपादेन्वहं पूजा लिंगे च नियमार्चनं वंदनं शिववेरस्य याकारयति वा
सना ३२ मध्यमा भक्तिरेषास्यात्सालोक्यादि प्रदायिनी यदा कैंकर्यतात्मयं सर्वस्वं क्वा महेश्वरे ३३ स स्वयं करोति स

भारते मार्जारकथा प्रसिद्धा ५

शिवलिंग

नविनाऽविनाभावलक्षणसहितेऽर्थः १

ततमविनाभावलक्षणं॥ आत्मार्पणं शरण्येशे सोत्तमा भक्तिरुच्यते ३४ जंतोर्नवविधा भक्तिरुत्तरोत्तरमुत्तमा॥ यां कां
चिदपि संप्राप्य पशुः पाशाद्विमुच्यते ३५ भोगाय मंदा कथिता सालोक्याद्येच मध्यमा॥ अपुनर्भवदा भक्तिरुत्तमा दुर्लभा नृ
णां ३६ आब्रह्मस्तंबपर्यंतं यत्रानंदः प्रतीयते॥ शिवभक्तिं विना नान्यत्तत्र कारणमिष्यते ३७ इति यो वेत्ति तत्वेन छिन्नपा
शः स उच्यते॥ स्यादन्यविषया भक्तिः यावन्मंदा न जायते ३८ मंदा मध्यमया नश्येन्मध्योत्तमया तथा॥ तस्मान्मुमुक्षुभिः
सेव्यं शंकरे भक्तिरुत्तमा ३९ मार्कंडेयोपमन्युश्रीकांतनंदिघटोद्भवैः॥ उत्तमासेव्यते भक्तिः चरमे जन्म निस्थितेः ४०
जातिक्रियागुणकृताभिदा तावत्प्रवर्त्तते॥ न यस्य चोत्तमा भक्तिः शिवे जंतोः प्रजायते ४१ यथा सिद्धरसो विध्यमयः प्र
कृतिमात्मनः॥ न मुंचति तथा जंतुः जात्यादिं न जहात्यसौ ४२ कांचनाद्रिप्रभामिश्रः काकोपि कनकायते॥ यथा देही तथा
भक्त्या भवेदुत्तमया शिवः ४३ भक्त्यांतःकरणोपाधिं निरस्योत्तमया शिवः॥ यथा निस्त्यलमाप्नोति तथा शृणुत मो द्वि
जाः ४४ प्रतिबिंबो स्फुन शास्फ बिंबमात्रं यथा भवेत्॥ प्रतिबिंबेषु नष्टेषु तथा देही परः शिवः ४५ संशयो यदि युष्माकं श्रो
न कार्या महर्षयः॥ अस्मिन्नर्थे निवृत्यर्थमेतस्येदमुदीर्यते ४६ हरदासमुनिप्रोक्तं भक्तमहात्म्यमुत्तमं॥ श्रुत्वा पुराणं भवंतः सर्वे
संछिन्नसंशयाः ४७ इति श्रीस्कंदोपपुराणे प्रथमोध्यायः १ श्रीविश्वनाथायेनमः श्रीऋषयऊचुः हरदासमुनिप्रोक्तं भ
क्तमहात्म्यनामकं॥ पुराणं ब्रूहि यच्छ्रुत्वा मिथ्याजात्यादिकं भवेत् १ श्रीसूत उवाच कलौ वेदेषु लुप्तेषु आगमेषु गते

पुच॥ योगेषु दूरापास्तेषु गुरुशिष्यक्रमे गते २ दयालुः सर्वभूतेषु हृद्रदा सो मुनीश्वरः॥ व्यासप्रसादात्कृतवान् भक्तमहात्म्य
मुत्तमं ३ यस्य श्रवणमात्रेण भक्तिः स्यादुत्तमा हरे॥ तथा हि मृत्युं न रति पुनरावर्त्तते न च ४ स्वानुविंबं शिवो जीवं कुलाजाल्या

जात्यादि ३

दितस्य च॥ प्रवर्त्तयति भक्त्या च निवर्तयति तत्स्पर्तनून् ५ भक्तानामुत्तमाः शंभो ये भक्त्या त्यक्तकिल्बिषाः॥ तानहं वः प्रवक्ष्या
मि शृणुत ब्रह्मवित्तमाः ६ अस्ति दक्षिणदिग्भागे दुग्धसागरकौस्तुभः॥ देशस्तीरे पयस्विन्या देवलोकानुविंबवत् ७ तत्र कां
चीति नगरी शिवस्य ममतास्पदं॥ ब्रह्मविष्णुमुनीन्द्राणां तपःसिद्धिविधायिनी ८ यत्र सा परमा शक्तिः कामाक्षीति जग
त्प्रसूः॥ विद्योतते महाविद्या पूराकान्ता बिलाश्रया ९ यत्र चैकाम्ररूपेण कुर्वतस्तप उत्तमं॥ मूले देवः स भगवान् सन्निध
त्ते सदाशिवः १० तपःसिद्धिप्रदे क्षिप्रं तत्र सर्वे मुनीश्वराः॥ तपसाराधयामासुः कामाक्षीनाथमीश्वरं ११ अथैकदा
महायोगी मलयाचलमंदिरः॥ लोपामुद्रापतिः श्रीमान् शिवक्षेत्रमथाविशत् १२ मुनयस्तं प्रणम्याग्रे समभ्यर्च्य यथावि

अगस्त्यं ५

सांगवेदाध्यायिनः ४

धि॥ इदमूचुरनूचानाः स्वासीनं कुंभसंभवं १३ श्री मुनय ऊचुः भगवन् कुंभसंभूत सर्वज्ञ करुणानिधे॥ श्रद्धामोय
त्समेत्येह वयं तदिह कथ्यतां १४ तपश्च सुचिरं तप्तं विहिताः क्रतवः शतं॥ अर्चितश्च महादेवः तथाप्यंतर्न शुध्यति १५ वि
षयाशारजोध्वस्तं मनश्चंचलमेव नः॥ कथं भवित्री मुक्तिश्च वदैतन्मुनिपुंगव १६ इत्याकर्ण्य वचस्तेषामगस्त्यः प्राह ताति
दं॥ ध्यायन् हृदि महेशानमंबिकापतिमव्ययं १७ श्री अगस्त्य उ॰ विनाचोत्तमया भक्त्या सर्वं तिस्थे महेश्वरे॥ न हि कल्प

ज्ञातेनापि मुक्तिं विंदतिमानवः १८ यदाचमर्वदाकाशं वेष्टयेयुरिमं जनाः॥ तदा भक्त्या विनाशंभोः शोकस्यांतो भविष्यति १९ भक्तिश्चतादृशीशैर्यसर्वत्यागपुरःसरं॥ तदेकदास्यसंप्राप्तिःचरमेसा भवे भवेत् २० सर्वत्तेनकुमारेण प्रोक्तमद्यवदामिवः॥ यस्यश्रवणमात्रेणसर्वबंधैः प्रमुच्यते २१ पुराकैलासशिखरे श्रीमद्योगपुरेवसन् विजहारमहादेवो देव्या दिव्यांगरूपया २२ चतुरंगविनोदेनमोदयामासपार्वतीं॥ जिगायदेवीतन्नेत्रं लीलयायद्वशंजगत् २३ इदमाहपराशक्तिः भगवन्निर्जितोस्यलं॥ अजितोस्मीतितांशंभुरेवमासीन्मिथःकलिः २४ प्रवृत्ते कलहे तत्र प्रस्योहे वाचशंकरः मायासिलंयतोलोकाः विजिताःप्राकृतास्त्वया २५ अहंच निर्मलो जप्यः सत्यं मिथ्यानबाधते श्रीदेव्युवाच निर्मलोमलिनोवालमास्तामप्रस्तवस्तुथा २६ जितोस्यथा जितोस्मीति सत्यं मिथ्यैवबाधते श्रीशिवउ॰ देवितद्व्यवहारश्च वस्तुतोनन्वितोमयि २७ सर्वप्रकाशकेनायं सत्यवस्ततिभासते श्रीदेवि॰ व्यवहारेण विज्ञेयः प्रकाशस्तवशंकर २८ समयाचान्वितस्यैववन्हेः काष्ठयुजोयथा श्रीशिवउ॰ अप्रकाशं जगत्सर्वं सत्यं ज्योतिरहं शिवे २९ आकाशवदरूपोस्मि रूपवानस्मि चेच्छया॥ श्रीदेवि॰ दुर्लभासाध्यमिदंरूपं यदि भर्गमहेश्वर तवैवरमणीयंच तरुणेंदुकलाधर माला मुंडमयी मौलौ जटा भारोत्रपन्नगाः ३१ लोचनं ज्वलनं वन्हिः कुंडलं कुंडलीश्वरः भोज्यंच गरलं घोरं प्रलंबास्तिसगात्तनु ३२ आलेपनं चिताभस्म कपालाकरभाजनं भूषणान्यहिरूपाणिवसनंच गजाजिनं ३३ महाश्मशाने संचारः वृषोक्षश्चापिवाहनं भूतसंघाःपरिजनाः बांधवास्तेप्यकिंचनाः ३४ लब्धं त्वयापरंरूपं वटमूलतपस्विना पश्यमदृष्टिसंस

सर्वेषां वस्तूनां प्रकाशके नमपि

लाचीकृतंतिरस्कृतं आसनेदुर्ययासा ३

शान् सर्वसौभाग्यशालिनः ३५ साध्यान्महद्भिः क्रतुभिः लोकान्ब्रह्मादिसेवितान् नयनानंदजनकं यदिरूपं भवे
त्तव ३६ तथाभिरूपाद्विजयी भविष्यसि न संशयः उक्तमेतन्मयासर्वं क्षम्यतां विजयी भवान् ३७ इत्युक्त्वा मौनमग
मत् जगतां जननी शिवा तस्थौ साचीकृतास्येंदुरालापितशुकार्भका ३८ अथ मंदस्मितं कृत्वा भूतानां पतिरीश्वरः॥
पराङ्मुखीमिदं प्राह स्वाभिन्नां शक्तिमंबिकां ३९ शिवः यदहं नवधूर्देवि न पुमान्वा भवामि च नमे लज्जा
भिमानश्च व्योमवत्सर्वत्त स्थितः ४० नयनानंदनं रूपं यदिते प्रीतिसाधनं पश्याद्भुतमिदं रूपं आकर्णपूर्णलो
चने ४१ इत्युक्त्वा सर्वलोकानामीशानः शैलकन्यकां यथाचतेजः काठिण्यं दधौ रूपमनुत्तमं ४२ सहस्रकोटि
कंदर्पसारसौंदर्यकोमलं कोटिसूर्यप्रतीकाशं कोटिशीतांशुशीतलं ४३ मंदस्मितमुखांभोजं प्रसन्नायतलोचनं
दिव्याभरणमालाढ्यं दिव्यगंधानुलेपनं ४४ उदारहारकेयूरकटकांगदकुंडलं महार्हवसनोपेतं मणिकांची
गुणान्वितं ४५ रत्ननूपुरसंयुक्तमुल्लसत्तिलकालिकं चक्षुःप्रक्षाल्यदेवानामपियोग्यमवेक्षितुं ४६ गौरीविलो
चनचकोरकिशोरलेह्यं सौंदर्यसारसमुदायसमुज्ज्वलांगं निर्माय रूपमथ निर्ममसेव्यपादः शीतांशुमौलिरकरोद

कैलाशे ३

लमद्रिराजे ४७ इति श्रीस्कंदोपपुराणे द्वितीयोध्यायः २ श्रीबदरिकायैनमः श्रीसूतः तदा हैमवती दृष्ट्वा रूपमत्य
द्भुतं विभोः॥ विस्मिता प्रणतादेवं तुष्टाव परमेश्वरं १ श्रीदेवि नमः शिवाय देवाय शंभवे सर्वसाक्षिणे इच्छाधी
नस्वरूपाय विरूपाक्षाय ते नमः २ मनसो वचसो वापि नमस्ते दूरवर्तिने विश्वाधिकाय रुद्राय वीतरागक्रुधे नमः ३

यस्मात् ४

त्साधिकं ६

सृष्टयेब्रह्मरूपाय रक्षायैविष्णवेनमः संहारायप्रपंचस्यनमस्तेरुद्रमन्यवे ४ यत्सत्ताजगतःसत्तायद्भासाभासते
खिलं इदमारोपभिन्नाय शिवायज्योतिषेनमः ५ कालकर्मविदूरायनमःकैवल्यरूपिणे कारुण्यनिधयेतुभ्यं
कालकंठायतेनमः ६ योंतःप्रविश्यसर्वाणिभूतानिभुवनेश्वरः संजीवयतिसर्वात्मानमस्तस्मैशिवायते ७ भक्ति
गम्यायभव्यायभवपाशच्छिदेसतां भानुमंडलवासायभर्गायभवतेनमः ८ चतुर्भुजायमहतेदेवायदहनात्मने द
शास्त्रयविहीनायदक्षाध्वरभिदेनमः ९ इतिस्तुतोमहादेवःप्रसन्नःपार्वतीपतिः वरंवृणीष्वकल्याणिमनोयत्रप्रवर्त्त
ते १० श्रीदेवि॰ अत्यद्भुतमिदंदृष्टंतवरूपंजगत्पते अनेनपूर्णःकामोमेभक्तिरस्तुस्थिरात्वयि ११ क्षमस्वकरुणा
सिंधोवाङ्मनःकायसंभवं अपराधंममस्वामिन्क्षमित्वाकरुणांकुरु १२ इतिदेव्यांब्रुवाणायां [illegible]
[illegible] नंदिनंप्राहशंकरः कुरुदूरेयवनिकांमरुतोव्यवधायिनीं अथतेनापनीतायांयवन्यांरत्ननिर्मिते॥
भित्त्यंतरेस्वांप्रतिमांददर्शाभिमवोनुहरः १४ दर्शयामासपार्वत्यैपश्यपश्येतिचांतिके॥गौरीतंप्रार्थयामासप्र
तिबिंबंतवेश्वर १५ अत्रागच्छतुतेरात्स्यावरएषममोत्तमः श्रीअगस्त्यः तत्क्षणेभगवान्शंभुरपरिच्छेद्यवैभवः
१६ भोसुंदरममाभ्यासेचरलमितिचाह्वयत् कर्तुंचापितथाकर्तुमन्यथाकर्तुमीशितुः १७ प्रतिबिंबोनुमत्याभूत्स्कंद
रात्स्योगणाग्रणीः मनसापिविधेःकर्तुमशक्यंरूपमुज्वलं १८ पश्यंत्यांसुंदरोदेव्यांप्रणम्योवाचशंकरं अनुजा
नीहिमांदेवदासोस्मिकरवाणिकिं १९ तवाज्ञापालनाज्जन्मसाफल्यमिदमश्नुतां इतितद्वाक्यमाकर्ण्यसस्मि

७ नंदिनंप्राहशंकरः कुरुदूरेयवनिकांमरुतोव्यवधायिनीं॥ अथतेनापनीतायां ७

तस्मैचंद्रशेखरः २० न्यारा सेदं ग्रहाणेति सचासीत् भस्मपात्रभृत् स्वयं गृहीत्वा तद्भस्म दधार परमेश्वरः २१ सुंदरा यद्दोसर्वं स्विराक्तिं सुंदरेश्वरः॥ भस्मा धारधरः शंभोः प्रतिबिंबः सस्कंदरः २२ दधावेता निनामानि शिवेनैव कृता निसः भस्मधारभृताद्भस्मादाय भसितं हरः २३ आलिपन् सर्वगात्राणि दधौ प्रीतिमनुत्तमां संध्यातांडवलीला स्कप्रवृत्तास्क दिने दिने २४ विप्रकीर्णजटः श्रांत्यातदंसेभुजमर्पयत् नंद्यादिगणनाथानां कचिदाह्वानकर्मणि २५ तन्नामा म्रेडयामास हासयन् गिरिजां हरः शिवो हमिति यं धन्यः क्षणं संचिंत्य मुच्यते २६ स एवतं विलोक्येशः सुंदरोस्मीत्यचिंतयत् धारयन् फणि मंजीरं पादे तस्य कटीतटे २७ गजाजिनं मृगंपाणौ सर्वांगे भस्मनिर्मलं कंठे स्थिमालां विन्यस्य श्रवणे फणिकुंडले २८ मौलौ जटाधरं तत्र कलाधर कलामपि हरो वृषोक्ष्यमारोप्य चालयन् प्रमथैः सह २९ स्वतंत्रं स्कंदरे प्रीत्यै कैलासशिखरांगणे सेवार्थमागतान् देवान् तत्पादे सन्यपातयत् ३० चुचुंबचकपोले तं कपाली वृषभस्थितं सुंदरत्वं शिवोसीति मुहुर्मुहुरुवाच ह ३१ द्राविवेत्र भृताने तान् वेदांतानामगोचरः सुंदरेशानु बिंबे ति विरुदालीरपाठयत् ३२ स इत्थं स्थितिंच संहारं जगतां जगदीश्वरः तिरोधानानुग्रहौ च स्कंदरे समर्पयत् ३३ कचिच्च सनकादीनां संदेहं परिपृच्छतां स्कंदरं वादयामास पशुपाशेशु निर्णयं ३४ किमत्र बहुनोक्तेन विहाय गिरिजामुमां सर्वासां संपदां शंभोः स्वतंत्रः स्कंदरो भवत् ३५ अथ देवाश्च दैतेयाः संभूय कृतनिश्चयाः प्रार्थयंतो मृतं सर्वे

वासुकिः २

ममंथुः क्षीरसागरं ॥ ३६ मंथानं मंदरं कृत्वा योक्त्रं कृत्वा तु वासुकिं सर्वौषधीश्च निष्पीड्य प्रक्षिप्य पयसां निधौ ३७ मथ्यमाने महांभोधौ प्रयत्नाद्देवदानवैः तेषामशक्नुवन् सोढुं भुजनिष्पीडनं हरेः ३८ निश्वितांश्मक्षतिक्षुण्णो वासुकिः व्यथितः श्वसन् उद्ववाम विषं घोरं तत्तु पाथोधिसंगतं ३९ हालाहलमिति ख्यातं प्रलयानलसंनिभं संबभूव घनी-

नु भूतं येन प्लुष्टं जगत्त्रयं ४० तदानीं पर्वतान् सिंधून् निर्दहन् सैंधवे गरं पुष्टं क्रूरात्क्रूराणां तदा वारा निवारितं ४१ हालाहलोष्णवेगेन व्यशीर्यंत सुरासुराः प्रधानेष्वपि लोकानां न कश्चित्स्वस्थ दृश्यत ४२ दुद्राव द्रुहिणो भीत्या प्लुष्टं का व्यर्थयथो हरिः न नाशस्त शुनासीरः शशाम शमनो यमः ४३ अचेतनः प्रचेताश्च निष्क्रांतो निधिनायकः अन्ये सुराश्च दैत्याश्च मूर्छिताः सिंधुरोधसि ४४ सिद्धचारणगंधर्वाः मुनयोन्ये च सेवकाः शरणं जग्मुरीशानं कैलासे वृषभध्वजं ४५ आकर्ण्य हालाहलवेगमाशु उमापतिः स्कंदरमादिदेश निर्गत्य तूर्णं स च घोरमेतत् जग्राह जंबूफलवत्कराग्रे ४६ हा नीलहालाहलशोभमानमालोकयन् स्कंदरहस्तमीशः संदर्शयामास गिरेः सुतायै स भृंगमंभोजमिव प्रबुद्धं ४७ दत्वा च हालाहलं स्कंदराख्यं तस्मै तदादाय नदीयहस्तात् हरोपिबत्सोथ पयो गजाज्ञया च तदीयकंठाभरणं बभूव ४८ त्रैलोक्यस्थानि भूतानि लीलाकृष्टमहाविषं आलोक्य स्कंदरं साक्षात् अमन्यंत महेश्वरं ४९ इतिश्री स्कांदोपपुराणे तृतीयोध्यायः ३ श्रीअगस्त्यः यदा त्वया महेशस्य निजग्राह महाविषं तदासीत् स्कंदरो दृष्टः गणेंद्राणां च पश्यतां १

कुबेरः

६६६

नीलग्रासः इष्टमहाविषं येन तं २

आज्ञा पार्वती तस्याः आज्ञया ३

तस्यावलेपं विज्ञाय सर्वात्मा चंद्रशेखरः शिक्षां समुचितां कर्तुं संकल्पमकरोत्तदा २ एतस्मिन् समये देव्याः प्रसिद्धपरिचारिके ।
विख्याते निंदिते सेका कमलिन्यपराख्यया ३ उभे गत्वा बिल्वकोद्यानं पुष्पाण्याहृत्य तिष्ठतः सुंदरो पि तदा शंभुं मृडानीसहितं
मिथः ४ विज्ञाय विचाराद्रिरूपां ते पुष्पितद्रुमे नगरे मल्लिकोद्याने नीलाद्रौ विद्युताविव ५ निष्टप्तकांचनच्छाये किंशुक
थ प्रतिमांशुके स्थलारविंदसश्रीकचरणोद्घुष्टनूपुरे ६ मनोभवनिषंगाभजंघायुगविराजिते कूर्मराजवरांगश्रीजानु
पीनोरुमंथरे ७ निर्मृष्टहेमफलकसमानजघनोन्नते कंदर्परथचक्राभनितंबालंबिमेखले ८ किंचित्समुद्गसंनी
विदत्रयनाभिमनोहरे आलक्ष्यरोमलतिके करांतमितमध्यमे ९ वलित्रयविरोचिष्णुवटपत्रोदरोज्वले आपी
नोपचितस्निग्धसंप्रवलासपयोधरे १० हारप्रालंबगुच्छार्धगतगोस्तनचूचुके रत्नांगुलीयमालांशुमंजरीपुंजक गु
बुरे ११ कुटिलारक्तनखरौ बिभ्राणे करपल्लवौ स्थूलविद्रुमबंधाढ्यस्फुरत्कटककंकणौ १२ केयूरांगदसंशक्तौ दधाने
शोभनौ भुजौ स्फुरद्भुजशिरस्पृष्टकुंडलश्रुतिमंडिते १३ कपोलस्थलसंक्रांतसशैलवनविष्टपे मंदस्मितमयज्यो[illegible]परभा स्ना
गोज्वलाधरे १४ श्वसितामोदसंभ्रांतभृंगसंत्रस्तलोचने मौक्तिकाभरणोदारनासादंडविराजिते १५ अपांगलीलायमु
नातरंगाक्रांतदिक्तटे भ्रूविभ्रमसमाहूतरतिकांतशरासने १६ अर्धेंदुललितालीककस्तू।रीतिलकोज्वले आनील
वेणिकोटिस्पृक्पश्चाद्भागपदांबुजे १७ लावण्यरसनिष्यंदचंद्रबिंबसमानने पादांबुजपरागश्रीपराजिततिलोत्तमे १८ सुं
दरस्ते तु दृष्ट्वा सौ सद्यः संभ्रांतलोचनः वैरादिव निजारातौ प्रतिबिंबपुरद्रुहः १९ निर्बिभेद तदा बाणैः सुंदरं कुसुमायुधः ॥

शिवे १ सुंदरे १

सुंदरोवदति। अहो निर्माणचातुर्यमहो तारुण्यजृंभणः २० अहो सौंदर्यसन्नाहः निस्तुला कल्पचातुरी। आपादकेशमंगेषु स्निग्धया मुग्धयोर्मम २१ निमग्नं मानसं भूयो नोत्थातुं शक्तिमृच्छति किमस्याः प्रतिबिंबं स्यात्तद्रूपमस्या भवेदियं २२ भ्रमे कुतः किमु स्वप्नो मायावा मान्मथी पुरः॥ श्रीअगस्त्यउ॥ आपीनौ कठिनावेतौ निस्तुलौ निर्मलावुभौ २३ संहतौ संप्रवलौ तौ अन्योन्यस्पर्धिलक्षणौ स्तनौ वीक्षणयोर्मन्येन कस्यापि भवेद्धृतिः २४ जन्मकोटितपश्चर्यफलमालिंगनं सकृत् यो न्वहं स्वादते कोयमनयोरधरामृतं २५ प्रार्थयामि स्वयं दास्यमदसीयमहं त्विति सुंदरः सुंदराचारमनुरागं निगूहितुं २६ न शशाक तदा कृष्टः समीपमनयोरगात् ते च तं मदनाकारं पश्यंत्यौ पक्ष्मलेक्षणे २७ मनोभवरसावेशात् अवशौ संबभूवतुः कथं नु पंचभिर्बाणैः सममेव मनोभवः २८ त्री न्निर्बिभेद बलवान् सममग्नाद्भुतविक्रमः सव्रीलविभ्रमोदारैः कटाक्षैः सुंदरस्तयोः २९ अंतर्निमग्नै रामज्ज्वं विद्धो मूर्छामवाप ह ते चापि तत्क्षणादेव तत्कटाक्षासिधारया ३० भिद्यमानमिव स्वांतं दधतुः संभ्रमाशये अन्योन्यदर्शनादेवं ते उभे स च [illegible] सुंदरः ३१ सहजं धैर्यमुत्सृज्य म्लानमंगेषु भेजिरे सद्यो विस्मितकृत्यानां दीर्घं निश्वसतां मुहुः ३२ दूयमानं वपुस्तेषामाचचक्षे स्मरव्यथां अथ गौरी समीपं ते ययतुः सुंदरश्च सः ३३ यथापूर्वं भगवतः पार्श्वं प्राप स्मरार्दितः क्लाम्यमानतनुं वीक्ष्य सर्वज्ञः सुंदरं हरः ३४ स्मयमानमुखः प्राह नंद्यादीनां च शृण्वतां श्रीमहेश्वरउ॰ कामक्रोध

२ भोगाय योग्यः

विहीनानां मुनीनामूर्ध्वरेतसां ३५ अप्राप्यं मत्पदं प्राप्य किमिदानीं त्वया कृतं कररस्थं यत्र कैवल्यं कैलासे तत्र
सुंदर ३६ मनसा चिंतितः कामः भोज्यः स हि नरसंशयः तस्माज्जन्म भुवि प्राप्य तत्र ताभ्यां समन्वितः ३७ भुंक्ष्व संसा
रिकान् भोगान् अनासक्तो यथा नरः श्रीअगस्त्यः यथा सुंदरमीशानः शशापैवं भवेद्भुवि ३८ तथैव गिरि
जा ति च तदा हृप परिचारिके अथ वज्रमिवोत्सृष्टं शापमाकर्ण्य शांभवं ३९ सुंदरः प्रणिपत्येशं रुदन्नेवमभाषत ॥
देवदेव दयासिंधो भक्तानामभयंकर अपराधमिमं सोढ्वा प्रसीद परमेश्वर भूतले यदि जन्म स्यात् कलिना
दूषिते मम ४१ त्वद्धि स्मरणमेव स्यात् पश्चोरिव न मे स्मृतिः वाङ्मनःकायजातानां मे न संमहतामपि ४२ त्व
न्नामस्मरणं सद्यः प्रायश्चित्तमिति श्रुतिः करोमि नैवं पुनरिंदुमौले दीनेत्वदीये करुणां कुरुष्व ४३ स एवमु
क्त्वा शशांकः प्रणम्य रुदन् पदांभोरुहमालिलेबे ॥ इति श्रीचतुर्थोध्यायः श्रीशिवार्पणमस्तु श्रीअगस्त्यः अथ प्रस
न्नो भगवान् प्रणतार्तिहरो हरः उत्थाप्य सुंदरं प्राह करुणार्द्रशिरा गिरं १ श्रीशिवः शृणु सुंदर मद्वाक्यं मा रोदीर्मा च ते
भयं न गिरां मन्यथाभावो मम नित्यगिरामिव २ अविवेककृतं कर्म परिणामे महद्भवेत् यथान्नं विषसंसृष्टम
ज्ञानादुदरं गतं ३ ब्रह्मादयोपि मुह्यंति काम कल्मष दूषिताः संकल्पाद्बध्यते जंतुरसंकल्पाद्विमुच्यते ४ तस्मा
त्यजंति संकल्पं मदेकशरणा जनाः संकल्पदासाः सर्वेपि संकल्पेशो न कश्चन ५ हित्वा मां च मदीयांश्च मदनुग्रहभा

वा चां ३

गिनः महती विश्वमायामि कामिनीकांचनात्मिका ६ मामेव ये प्रपद्यंते मुक्तास्ते मायया तया स्त्रीणां स्त्रीसंगिनां
चैव संगत्या कामवान् भवेत् ७ सतां संगाद् संकल्पः मयि भक्त्या च मुच्यते प्रत्यक्षं दृष्टमेवैतत् तव स्कंद रसं
प्रतं ८ यतो मत्सन्निधिं त्यक्त्वा स्त्रीसमक्षं गतो भवान् अनर्थोयमभूत्तस्माद् अधःपातो यतो भवत् ९ एवमे
व पुरा विष्णुः संकल्पेन मुहुर्मुहुः अवतीर्य भुवं पश्चात् संकल्पं जितवानथ १० स्मृतिभ्रंशो न भविता तव जा
तस्य भूतले भक्तिश्च मयि पूर्णा तु स्तुहि पुण्यस्थलेषु च ११ तत्रोद्वाहे प्रवर्तेते सोहमागत्य स्कंदर स्वयं दासं विधाय त्वां ग

स्तुतिं कुरु ५

मिथ्यामि न संशयः १२ यथा त्वं चिंतितं तत्र तथा कर्तास्मि सुंदर श्रीपुराख्यस्य रमापुरस्य निकटे जन्म मद्भक्त तोस्तु ते १३ भूषयिष्युति
वाणी त्वां प्राप्स्यसे परमं यशः गच्छेत्यादिश्य भगवानंतःपुरमगाहत १४ सुंदरोपि विषादार्तो नमस्कृत्वा महेश्वरं
कैलासाद् पतद्भूमौ स्वर्लोकान्निरये यथा १५ श्रीअगस्त्य उ॰ जन्मादि चरितं तस्य सुंदरस्य महात्मनः वक्ष्यामि वो मु
निश्रेष्ठाः श्रवणानंदकारकं १६ अस्ति दक्षिणदिग्भागे श्रीपुराख्यं महाद्भुतं मुचुकुंदो हरेर्लब्धं यत्रेशं प्रसति
ष्ठत १७ सोमास्कंदः स्वभक्तानां यत्र त्यागेश्वराख्यया ख्यातो ददाति सर्वार्थान् जन्मत्रये सुदुर्लभं १८ नातिदूरे
स्थलस्यास्य ब्राह्मणावसथे क्वचित् द्विजः शिवव्रतो नाम कश्चिदस्ति शिवप्रियः १९ वेदागमपुराणानां पार
दृश्वै कृतक्रतुः पितेव शिवभक्तानां भक्तस्त्यागेश्वरप्रियः २० भार्यासीत्स्य मतिर्नाम तस्य श्रद्धानुसारिणी॥

७

नामांतरं शिवं

तयोरनुपमं तत्र गार्हस्थ्यं सद्विरादृतं २१ भार्यापत्यौनपत्यौ तौ कमलालयनायकं प्रदक्षिणार्चानतिभिस्तोषया
मासतुश्चिरं २२ अनुजग्राह भगवान् दत्वापत्यं तयोर्हरः अथ गर्भवती तस्य भार्या भाग्यवती सती २३ राज
कृतसंस्कारा मणिरुक्ते जितो यथा दशमे मासि सालग्ने शुभग्रहनिरीक्षिते २४ असूत समतिः पुत्रं बालेंदुम

४ पश्चिमा दिशिव ४

परेव दिक् जातकर्माकरोत्तस्य मुदितः स शिवव्रतः २५ ब्राह्मणेभ्यो ददौ वित्तं प्रभूतं ब्राह्मणोत्तमः द्वादशेदि

बालस्य नाम

वसे प्राप्ते संमंत्र्य सह भार्यया २६ कमलालयनाथाख्यं चक्रे गौरीपतेर्मुदे दृष्ट्वा रूपं जनास्तस्य सर्वे सुंदरमूचिरे

६ शुक्लपक्षे

२७ ततोयं ववृधे बालः पूर्वपक्षेद्रवोडुराट् अथ वेदनिधेः पुत्री कमलिन्यप्यनिंदिता २८ जाता विप्रगुरोः पत्न्यां सा
नित्यं वृद्धिमाययौ चूडाकर्मण्यथ कृते पूर्ववासनया स्वयं २९ दध्यौ महेश्वरे भक्तिं सुंदरः सुरदुर्लभां सकृदेवोप
देशेन लिपिभेदानबुध्यत ३० वीथीषु श्रवणादेव कलाः सर्वा विवेद सः सुंदरस्त्वेकदा वीथ्यां बालकैस्तुल्यवा

पार्वत्याः द्वितीयापरिचारिकाः एकाः निंदिता द्वितीया कमलिनी

जयभद्रेण ४

र्षिकैः ३१ धूलिकेलिपरो राज्ञा दृष्टो नीतश्च वेगृहं अनपत्यस्य राज्ञोभूत् अमुष्मिन् प्रीतिरुत्तमा ३२ शिव
व्रतः प्रियो राज्ञो गायत्रीव्रतमादिशत् वेदानध्यापयामास सांगानपि सहागमैः ३३ अधिगम्य च शास्त्राणि गुरु
भ्यो दक्षिणामदात् युवराजो भवत्वेष इति राजप्रचोदितः ३४ सुंदरो वारितः पित्रा न द्विजानां विधिस्त्विति यु
वराजसमं लेभे पदं विद्वद्विरावृतं ३५ अथ वेदनिधिः कन्यां सुंदराय महात्मने प्रदात् भार्यया सार्धं विवाहस

कुतूहली ३६ शिवव्रतानुमत्या च कल्याणोद्योगमातनोत् वैशाखे चोत्तरफल्गुन्यामभूदुद्वाहनिश्चयः ३७ वधूवरास्त
बंधूनां समाजः सुमहानभूत् आययौ जयभद्रोपि चतुरंगबलान्वितः ३८ उत्सर्जनं व्रतानां च विधिपूर्वकमातनो
त् स्नातकर्मविधिं चक्रे सुंदरो लोकसुंदरः ३९ भेरीमृदंगमुरजान् खगोमुखकाहलाः वादयामासुरत्युच्चैः वीणा
वेणूजनाः परे ४० राजवाहनमारुह्य सुंदरो ब्राह्मणोत्तमैः कृतार्ती भार्यया सार्धं सर्वैर्वेदनिधेर्गृहं ४१ प्रत्यु
ज्जगाम पुत्रीभ्यां सह वेदनिधिर्वरं कृतोपचारस्तेनायं यथावत्समलंकृतः ४२ उद्वाहवेदिकामाप कन्यालंकृत
पार्श्वभूः निषसादासने पश्चान्नवहेमपरिष्कृते ४३ ब्राह्मणैर्दीक्षितैर्वृद्धैः शिवभक्तैश्च भूषिता छत्रकेतु

सभा ६

वितानाढ्या स्वर्णस्तंभपरिष्कृता ४४ सवयोभिर्वयस्याभिः सर्वाभरणभूषितैः पतिव्रतासहस्रेण किरता लाज
जालकं ४५ सम्मान्या कन्यकाभिश्च गायंतीभिर्विभूषिता ज्योत्स्नाप्रदीपमालाभिरभिद्योतितदिङ्मुखा ४६ ना
नाविधमहावाद्यनादपूर्णनभस्थला चक्रे णेव महीभाजा जयभद्रेण शोभिता ४७ दिव्यागरवधूपेन समंतादधि
वासिता सा सभा रुरुचे तत्र सुधर्मेव भुवं गता ४८ सुंदरश्च सभामध्ये वरवेषविभूषितः वध्वा च सहितो रेजे
रमया च यथा हरिः ४९ विद्यावयोरूपधनान्वयाद्यैः न सुंदरस्यास्ति समः पृथिव्यां आभ्यां वधूभ्यां सहितस्य दीर्घम
स्त्वायुरस्येत्यवदन् द्विजेंद्राः ५० इति श्री पंचमोध्यायः ५ श्रीशिवायनमः श्रीअगस्त्यउ॰ सौवर्णपालिकाकुंभ
लाजपुष्पसमिल्कुशैः दूर्वांकुरैस्तारावेश्च दृषदा शोभिता सभा १ अथांकुरार्पणं कृत्वा कृतकौतुकबंधनः

दंतः ५

पुरोहितोगणाधीशंपूजयित्वामहाजनैः २ दत्तानुमतिरारेभे सुंदरोद्वाहमंगलं प्रस्तुतोद्वाहसंकल्पे सुंदरेथसभां
तरे ३ अदृश्यतमहावृद्धस्तत्रकश्चिज्जराधिकः वेणुदंडमवष्टभ्यस्खलदंघ्रिः पदेपदे ४ बिभ्रद्भूपक्ष्मरोमाणिपलि नू
तेनसितानिच कुंडलालंकृतःप्रांशुश्चंचत्पांडुशिरोखंडकः ५ भसितैरनुलिप्तांगः रुद्राक्षस्रग्विभूषितः विगलद्धव
सनोनिःशेषगलितद्विजः ६ शिराभिर्दंतुरग्रीवः श्रीकंठपदलांछनः समालोक्यसभामध्येसमवेतान्महासु
राः ७ केचिदुत्थायदत्वार्घ्यंप्रणेमुस्तस्यपादयोः हस्तालंबनमन्येतुभक्त्याप्रददुरादरात् ८ ददौवेदनिधिश्चा
पिपुरस्तादासनंमहत् सहस्ततालमहसन्संघीभूयचबालकाः ९ सुंदरस्तुतमालोक्यभस्मरुद्राक्षधारिणं
शैलादिसदृशःकश्चिद्भक्तोवाशिवएववा १० सर्वथापूज्यएवायमित्यमन्यतमानसे अथोपविष्टंतंवृद्धमिदमाह
शिवव्रतः ११ महाब्राह्मणकोसित्वंकुतःकिंनामतावकं त्वद्दर्शनात्कृतार्थास्मोवयमातिथ्यमत्रते १२ श्री
द्विजः कमलानगरेनित्यंवासोमेहेशिवव्रत जानामित्वामहंनत्वामस्मान्वेत्सिकदाचन १३ आस्तांताव
त्प्रसंगोयंसमाजःकोत्रकर्मकिं संघीभूताःस्त्रियोबालवाद्यानामत्रकोध्वनिः १४ श्रीशिवव्रतः कमलालयना
थाख्यःसुंदरोयंजनैःकृतः पारगःसर्वविद्यानांप्राप्तोमत्तपसासुतः १५ प्रस्तुतोत्रविवाहोस्यआशीर्वादात्समध्य
तां शिवव्रतंनिवार्यैवंवदंतं वृद्धसत्तमः १६ शिथिलाक्षरयावाचानिजगादसभासदः श्रूयतामुच्यतेकिंचि

श्री१

समवेता महाजनाः॥१७ ब्रूतावधार्य सर्वेपि सत्यमेवास्तु मामृषा दासमेनं क्रयकृतं सुंदरं मे शिवव्रत १८ प्रलो
भयित्वा मूढात्मा पुत्रीकृत्य बलादिह वृद्धं सगणयित्वा मां विवाहमपि कारयत् १९ स पुत्रतां स्थिरीकर्त्तुं यतते सत्यमुच्य
ते श्रिया मे न कुबेरोपि सदृशोन्यस्तु किं पुनः २० सोहमस्यापि दासस्य विधेयं सकलं जगत् एतत्कारयिता काले यदेच्छा
मे भविष्यति २१ कोटिशः संति मे दासाः द्विशामंते षु भुज्यते श्रियं यथोचितां दत्तामयमप्यस्तु तादृशः २२ दास सुंदर रे
किं त्वं मां हित्वास्य गृहं गतः उत्तिष्ठ याहि गच्छावो यद्दिष्टं तद्ददामि ते २३ श्री अगस्त्य॰ एवं वदति वृद्धे स्मिन् संभ्रा
ता सा सभाभवत् वधूवरास्तबंधूनामासीन्मनसि विस्मयः २४ जनकोलाहलस्यांते व्यवहारविचक्षणाः वि
द्वांसो दिक्षु विख्याता जयभद्रेण चोदिताः २५ श्री ब्राह्मणाः॰ वृद्धोसि व्यवहारेषु समर्थ इव जल्पसि शास्त्रार्थे पुनः हि
कापि द्विजो विक्रेतुमर्हति २६ अध्वश्रमेण वा भ्रांत्या वृद्धभावेन वोदितं वचस्त्वदेदं क्षांतं च तूष्णीमेहि प्रभुः परः २७ ज
यभद्रो महाराजः सुंदरे क्षांतिरुत्तमा गुरुर्यस्सर्वविद्यासु रुष्टस्त्वां नैव कुप्यति २८ श्री वृद्ध॰ न कामो नास्ति कोपो
वा दासानां मम विद्यते इदमेव हि विख्यातमस्मद्दासैकलक्षणं २९ श्री शिवव्रत उवाच किं भ्रांतस्य च तद्वाक्यमिदं
क्षांतं मया द्विजाः विवास्येनं बहिर्लग्ने कर्मारब्धं प्रवर्त्यतां ३० श्री वृद्ध॰ अराजकोयं किं देशः संतः संति न वा पुरे
अबद्धोक्तिरनेर्दासो यस्य मे नीयते परैः ३१ वद सुंदर सत्यं त्वं चर धर्ममुदीरितं किं न दासोसि मे ब्रूहि सर्वे
षामिह संनिधौ ३२ श्री सुंदर॰ असंगतं भवानाह सत्यवद्ब्राह्मणोत्तम शंभोर्दासा वयं तु स्मः कमेला

२ अपराधं

अपलापस्तु निह्नवः॥ नटआना ५

लयवासिनः ३३ हरदासोनान्यदासः तस्यदासायते जगत् हरस्यदासं यो भूते दासं द्रोही शिवस्य सः ३४ सहे यंच त्वदा गो हं द्रां करोन सहिष्यते भस्म रुद्राक्ष भाजं त्वां न माम्य ग्यानुगृह्यतां ३५ श्री वृधउ किमेवं स्कंदर ब्रूषे किं ते न्यूनं मदंतिके पुत्राभ्याम विशेषं त्वामहं पश्यामि सुंदर ३६ श्री सुंदरउ "नाहं त्वामभिजानामि नास्मिन् जन्मनि संगतिः महांतो पि यदि ब्रूयुरनृतं को निवारकः ३७ श्री वृधउ जना शृणुत मे हस्ते पत्रमस्ति ससाक्षिकं स्वहस्तलिखितं त्वस्य क्रियतेनि ह्नवः कथं ३८ ब्राह्मणाउ "पत्रं दर्शय भो वृध यत्रानेन कृता लिपिः युवयोर्व्यवहारे च यः साक्षी सो पि वर्ण्यतां ३९ श्री वृधउ "सतीनामुत्तमा देवि कमलालयनायिका क्रयक्रीतो यदा मे त्वं न दासाक्ष्येव स्थिता ४० स्त्रीसाक्ष्यं न प्रमाणं चेत्तुत्रो नस्याश्च साक्षिणो आगच्छत तत्र तां पृष्ट्वा पश्यत त्रैव पत्रिकां ४१ श्री अगस्त्यउ इत्याहूतो भगवता वृधवेषेण शंभुना भ्रांतश्चिरमसीत्युक्त्वा सहसोत्थाय सुंदरः ४२ वृधमग्रे विनिर्गत्य गच्छंतं पृष्ठतोन्वगात् सुंदरानुगतो वृधो गव्यूतिद्वयसंमितं ४३ पंथानं समतिक्रम्य कमलानगरांतरे आलयं प्रविवेशांतः मणिगोपुरमंडितं ४४ कोत्र साक्षि वदाद्य त्वं वृध दर्शय पत्रिकां इत्यनुद्रुत्य निःशंकमालयद्वारि सुंदरः ४५ तस्थौ मुहूर्त्तं साश्चर्यं वृधनिर्गमनाशया अथाविरासीदुमया सह सर्वगणैर्वृतः ४६ आरोहन् वृषभं दिव्यं स्कंदविघ्नेश्वरान्वितः द्वारदेशमनुप्राप्य स्तूयमानः सुरर्षिभिः ४७ स्थितं स्कंदरमालोक्य स्मय

२

मानमुखांबुजः सुंदरोमम दासोयमितिसंदर्शयन्नुगिरेः ४८ पार्वत्यै कन्यकायै कटाक्षेण पुनःप्रोवाचसुंदरं इति श्रीस्कंदोपपुराणेषष्ठोध्यायः ६ श्रीशिवार्पणमस्तु श्रीशिवउवाच रे रे सुंदर यत्प्रोक्तं प्रभूनां संनिधौ त्वया नाहंदासस्तवेत्येतत्साध्यतां किं विलंबसे १ जननीजगतामेषगौरीलद्दास्यसाक्षिणी इमाव पितथा भूतोग जवक्त्रषडाननौ २ श्रीसुंदरः वृषभारूढमालोक्यसोमास्कंदगणेश्वरं दधानंदक्षिणकरे महतीदास्यपत्रिकां ३ विष्णुब्रह्मेंद्रचंद्रार्कयमाग्निवरुणाशुगैः वायु सिध्दचारणगंधर्वैस्तूयमानपदांबुजं ४ गणाग्रणीसमाघा तभेरीकाहलिकास्तुतं विलक्ष्य हृदयोभूत्वा निमील्यनयनेक्षणं ५ पुनरुन्मील्यतुष्टाव शंकरं सुंदरोन मन् श्रीसुंदरः आहूयस्वयमादरेण भगवान् त्वं सर्वलोकोमतो मिथ्या साभिरतं मृषागिरमिमं वेधो हरींद्रादिभिः अज्ञातोमनसाचनित्यवचसा दासं वितेने जनं तस्मै भक्तजनप्रियाय महते देवाय तस्मै नमः ६ यस्यावलोकनादस्य मायाभूत्सृष्टिसाधनं तस्मै भक्तजनप्रियायमहतेदेवायतस्मैनमः ८ महद्दे षम्यमुत्पन्नं मायया यस्य शक्तितः अहंकारस्तथाजज्ञे महतोयत्प्रभावतः ९ नमस्तस्मै महेशाय देवदेवाय तेनमः अनामरूपसंस्पृष्टः कदाचिदपि यः शिवः नमः तस्मै महेशाय देवदेवायते नमः भूतेंद्रियमनःस ष्टिः स्तनायत्प्रेरितादभूत् येनपंचीकृतान्यासन् असंबंधवतामपि ११ अनुप्रविश्य यस्तानि विराड्रूपं बिभ

जगतः ५

नृ

र्त्तिच नमस्तस्मै महेशाय देवदेवाय तेनमः ११ सिसृक्षया गिरायुक्तः सृज्यं सृजति योखिलं नमस्तस्मै महेशाय दे
वदेवाय तेनमः १२ अलंकृतः श्रियात्रस्य रक्षां यस्तनुते हरिः नमस्तस्मै महेशाय देवदेवाय तेनमः १३ अनन्य
जगतः३ साध्यं संहारं यस्तस्य कुरुते हरः प्राज्ञतैजस विश्वादि सा क्षीभोऽयं स्वयं स्थितः नमस्तस्मै महेशाय देवदेवाय तेनमः
अहमाकाररूपेण यः सर्वं व्याप्य तिष्ठति नमस्तस्मै महेशाय देवदेवाय तेनमः १५ ओतप्रोतमिदं यत्र सू
त्रे मणिगणा यथा नमस्तस्मै १६ अंतश्चिदात्मना तिष्ठन् बुद्धियैर्यो विभाव्यते नमस्तस्मै १७ यत्सत्ता जगतः
सत्ता सर्वं स्फुरति येनच नमस्तस्मै १८ यत्र नानाप्रपंचोर्मीणां विवर्ता इव सागरे आद्यावंतेच मध्येयः एकरूपः
स्वयंप्रभः नमस्तस्मै १९ आदित्यमंडले भाति पुरुषो यो हिरण्मयः अंतश्च ऋषिभूतानां यस्सर्वेषां परः पु
मान् २० अंगुष्ठमात्रपुरुषं यमंतः कवयो विदुः यन्नामस्मरणं जंतोः कालकर्मघनाशनं २१ यद्विज्ञाय बंधोयं यद्वि
ना द्विमुच्यते गुरुमूर्त्तिर्महर्षीणां वटमूले विभाति यः २२ यो पिबद्गरलं घोरं जगतामतिभीकरं मार्कंडेयमुदे काले
यो व्यदात्स्वपदाहतं २३ भस्मसादकरोन्मंदस्मितेन त्रिपुराणि यः मृगरूपस्य यो दक्षक्रतोश्छेदमस्तकं २४ अ
वतारेषु यो विष्णुमनुजग्राह पूजितः मणिमंत्रौषधीनां च शक्तिर्यस्यानुभावतः २५ आब्रह्मस्तंबपर्यंतं यस्या
ज्ञान विलंघ्यते नमस्तस्मै नमस्तस्मै गिरिजावासमूर्त्तये २६ चंद्रशेखरदासोस्मि सहवेशाद्द्येनच मात्रायत्तो

गिरिजायाः वासमूर्त्तिस्तस्मै १

कुलेजंतुः शंभोर्दासोनयोभवेत् २७ अपराधंक्षमस्वेवं ममवाक्कायसंभवं प्रसीदकरुणासिंधोप्रणतार्तिहराव्यया २८ प्रसीदपार्वतीनाथ दयादृष्ट्या विलोकय श्रीअगस्त्यः इत्कदीर्यपदांभोजे प्रणतंबाष्पवर्षिणं २९ समुत्थाप्यमहादेवः स्कंदरं प्रत्कवाचह श्रीशिवः भोभोसुंदर मारोदीः प्रसादस्त्वयिमेमहान् ३० मयिप्रसन्नेनपुनः शोकमभ्येतिकश्चन स्तुत्सा त्वकृतयायोमां स्तुवंत्यहरहर्नरः ३१ नतेषांदुरितेकिंचिद्भवितेतिमतिर्मम ॥ कृतंप्रसादोमहतादेवेनेत्यथसुंदरः ३२ उत्थितोंजलिमाधाय भगवंतंव्यजिज्ञपत् श्रीसुंदरः त्वद्दास्यभाग्यमेलब्धं दुर्लभं योगिनामपि ३३ कृत्यंदासस्यमे किंचिद्विनिर्देष्टुंत्वमर्हसि श्रीशिवः स्तुतिर्ममत्वयाकार्यासदासुंदर सर्वतः ३४ इदंमत्प्रीतयेकृत्यं नित्यंयद्धि हितंतव श्रीसुंदरः चत्वारोनविदुर्वेदाः स्तथादेवादयोपियं ३५ मनोनिवर्त्ततेयस्माद विज्ञातंमहेश्वर स्तोमितंत्वांकथंबालः ग्राम्यालापार्थयागिरा ३६ कीदृशीतिस्तुतिस्तस्याः किमादिर्मध्यमुच्यते अवसानंच किंरूपं नजाने किंचिदप्यहं ३७ तवामूर्त्तस्य पूर्णस्यनामरूपनिरूपणे वाचापराधोभवितान हितस्यास्तिनिष्कृतिः ३८ सर्वथासापराधंमां करुणाकरपालय श्रीकरेणमहांबोधेर्महिमा वर्ण्यतेकथं ३९ श्रीशिवः इमांपंचाक्षरीविद्यां पंचपातकनाशनीं गृहाणमयिभक्तोसितस्मादेनांददामिते ४० भ्रांतेत्तिसंदसिप्रोक्तं त्वयामांप्रतिसुंदर तद्दादायपदंपूर्वं स्तुहिवागस्त्वनर्गला ४१ भुवमूप्रदक्षिणीकुर्वन्

(margin: थ्या; स्वंकुकणेनर)

विश्वेश्वरं प्रतिशंकरस्वामिनोक्तं॰ मयात्रयाचापकताहतामे॰ स्तुत्सानयावाक्परताहतामे। ध्यानेनचेतः परताहतामेक्षंतव्यमेतत्त्रयमापराधं ॥ ३ ॥

यत्रमेस्थानमुत्तमं यत्रलिंगाकृतिंवा ग्भिः स्तुहिमांस्तुतिकृत् प्रियं ४२ तत्रतत्रभविष्यामिप्रसन्नः सन्निधा
यते इतिपंचाक्षरीं विद्यामुपदिश्यमहेश्वरः ४३ ब्रह्मादिभिरविज्ञातांशैवीं विद्यांव्यतीतरत् शाब्दब्रह्ममयीदेवितज्जि सरस्वती २
ह्वायांननर्तह ४४ प्रोवाहवाचांलहरींतस्यामृतधुनीयथा वाग्विभूतिंससंप्राप्यसुंदरः परमेश्वरात् ४५ भूयस्तमे
वतुष्टावसुंदरः श्रीपुरेश्वरं भ्रांतःप्रपंचविज्ञानात् विमलेंदुकलाधरं ४६ महांतंदेवमीशानंमहेश्वरमहंभजे भ
क्ताभयंकरंभर्गंशक्तिमात्रेणसत्कृतं भवानीसहितंदेवंभावयामिसदाशिवं हंसकोटिप्रतीकाशंहंसविज्ञान सूर्यः भानुर्हंसः सहस्रांशुः ५
मस्तकं ४८ हंसैश्चपरमैःसेव्यंहंसनृत्तमुपास्महे दुःपूरकामशमनंसत्पूजितपदांबुजं ४९ कर्पूरालेपकल्हा
अस्थि ६ रस्रग्भूषणमहंभजे मुचुकुंदमहीपालमुख्यभक्तपुरस्कृतं ५० मुक्तिप्रदंमुमुक्षूणांमुग्धेंदुमुकुटंभजे पुराभक्ति
परीक्षायैश्रीमच्चोलमहीपतेः ५१ कृतांतंनर्तकीकृत्यधेनुरूपःस्वयंभवान् अध्वभ्रमणवेगेनतत्सुत्ररथवर्त्म
नि ५२ चक्रनेमिहतेवत्सेघंटांगोश्रृंगताडितां विज्ञायमंत्रिभिःसार्धंसभाभाजिमहीपतौ ५३ समंत्रिबोध
नात्सुत्रंरथचक्रबलिंनिजं कुर्वत्सुजीवयन्वत्सं तत्कुमारंचयोद्धशा ५४ समुत्थाप्यनृपायादात्सौभाग्यंभक्ति
नामानं २ संयुतं तत्तांविधींविटंकाख्यंशरणंयामिशाश्वतं ५५ एवंत्यागेश्वरंतत्र वाग्भिःस्तुवतिसुंदरे देवाववर्षुःपुष्पा
णिव्यनदद्देवदुंदुभिः ५६ तत्रत्याब्राह्मणास्सर्वे श्लाघंतेस्माथसुंदरं तमनुज्ञाप्यदेवेशःसहभूतैःस्तिरोदधे ५७

सुंदरो लब्धवाग्भूतिः सार्वभौमैश्च पूजितः दिव्येषु शंभुस्थानेषु स्तोतुं समुपचक्रमे ५८ यः पठेदिदमध्यायं
शृणुयाद्वापि मानवः मूकस्यापि भवेत्तस्य वाग्विभूतिरनुत्तमा ५९ इति श्री सप्तमोध्यायः श्री गौरीशंक
रार्पणमस्तु श्रीअगस्त्यः प्राप्तुतमेव भर्तारं सुंदरं सर्वसुंदरं कन्या वेदनिधेः शंभुमाराधत्तपस्विनी १
अथायं सुंदरो द्रष्टुं चिदंबरमहानटं प्रस्थितः सरितः पुण्याः समुत्तीर्य महामतिः २ उपास्य पश्चिमां संध्यां अगास्ति

चिदंबरपुरे महानटेश्वर महादेवं ४

घ्नवटस्थलं तत्रैकापर्णशालाभून्मुनीनां नगराद्बहिः ३ संविवेशास तां प्राप्य मार्गश्रांतो मुनीश्वरः अथत

सुंदर ५

स्यशायानस्य निशि कश्चन मूर्धनि ४ प्रहरन्वामपादेन ददर्शोद्भुतपूरुषः सुंदरः कोयमित्युक्त्वा विनिद्रः पश्य
तिस्मतं ५ त्रिलोचनं नीलकंठं वैयाघ्रं चर्म बिभ्रतं संभ्रांतः तत्क्षणं भक्त्या बाष्पपूरितलोचनः ६ तमाप्रभात
मस्तोषीदिदं सांध्यं समाप्य सः स्थानं शंकरमासाद्य वामनेन पुरार्चितं ७ तुष्टाव गिरिशं तत्र तत्प्रसादमवाप्तवान्

५ साधितुंयोग्यं

तृगव्यूति मितं मार्गं समतीत्याथ सुंदरः ८ पुंडरीकपुरं दिव्यं ददर्शेंद्रपुरोपमं महारजतसोपानैः महानीलवितर्दिभिः
९ महाद्रिशिखराकारैः मणिस्तंभविराजितैः प्रासादैरभ्रपथगैः वृषभांकितकेतनैः १० अलंकृताभिवर्शीथीभि
रचिंत्याभिर्विभूषितं वीणावेणुमृदंगोच्चध्वनिपूरितदिङ्मुखं ११ ललनारत्नकोटीभिरप्सरोभिरिवोज्वलं सा
लमंदारसंतानहिंतालक्रमुकासनैः १२ कदलीनारिकेरैश्च निबिडोपवनांतरं वापीशतैः स्फुरत्पद्मकल्हारकुमुदो

सलैः १३ स्वादु निर्मलपानीयैः समंतादभिशोभिते रथमातंगतुरगैः पंक्तिभिरलंकृते १४ सहस्त्रत्रयसंख्यातैः महार्हशयनोत्तमैः शैवदीक्षाविचिह्नानामालयैरुपशोभितं १५ हविराज्यपुरोडाशपुण्यगंधिभिरुत्थितैः अग्निहोत्राग्निधूमैश्च ब्रह्मस्थानेषु पावनं १६ मुखरं ब्रह्मघोषेण वर्णधर्मैश्च सेवितं चिदंबरपुरं प्राप्य सुंदरस्तु शमानसः १७ अभ्युत्थायार्चितः सभ्यैः प्रविवेश शिवालयं शिवगंगांभसि स्नात्वा भस्मरुद्राक्षभूषितः १८ उपहारं प्रदायाथ प्रययौ कांचनीसभां सूर्यकोटिप्रतीकाशां रत्नस्तंभविराजितां १९ देवर्षिगणसंसेव्यां दर्शनान्मुक्तिदायिनीं ददर्शतत्र परितः भक्तेषु प्रथितानपि २० पतंजलिं व्याघ्रपादमगस्त्यं मुनिपुंगवं नारदं तुंबुरुं कण्वं भार्गवं मुनिपुंगवं २१ इंद्रादीनपि दिक्पालान् गणान् शैलादिसम्मतान् पुररक्षां प्रकुर्वाणं विधुं चकमलासने २२ द्वारे गणेशमभ्यर्च्य नत्वा स्तुत्वा तथा गुहं समनुज्ञाप्य नंद्यादीन् सभाभ्यंतरमाविशत् २३ पंचाक्षरमये पीठे पार्वत्या सह भासुरे मायायवनिकांतस्थं सर्ववंद्यं सभापतिं २४ शातरुद्रीयमंत्रैश्च नमस्कृत्य नटेश्वरं सुंदरः सूक्तिभिर्देवं स्तोतुं समुपचक्रमे २५ श्रीसुंदर उवाच नमश्चिदे नमस्सदा मुदात्मनेनमः सतश्च साक्षिणे नमः सभाधिपतये तेनमः अरूपिणे च रूपिणे निरूपणातिगाय ते कपालिने कपालिने कपर्दिने नमो नमः २६ नमो हराय जाह्नवीधराय चंद्रमौलये त्रिलोचनाय ते नमस्त्रयीमयाय शंभवे अरालकालकूटनीलकंठनालकांतये कपालमालिने नमः करीद्रचर्मधारिणे २७ नमः शिवाय शंभवे नमस्त्रिशूलधारिणे मनोजगर्वहारिणे महोक्षकेतवे नमः दिगंबराय ते नमश्चिदंबराश्रयेनमः

Margin notes:

ख्यातान् ५

कुटिल

त्रियामक्साम यजूंषी इति वेदत्रय स्त्रयस्त्रयी २ वेदमयायेसमर्थः २

कपालिने कपालधारिणे ३
कपालिने कपालमालिने ३

ऐरावतः पुंडरीको वामनः कुमुदोंजनः। पुष्पदंतः सार्वभौमः सुप्रतीकश्च दिग्गजाः दृष्टमदः ३

स्वयंभुवे सदा नमश्चिदंबराय ते नमः २८ नमः सुवर्णसंसदे नमस्सभेश्वराय ते नमोस्तु भूतसंसदे नमो गणाय योगिनां नमो गिरींद्रजापते नमो हिरण्यबाहवे नमोचेतसस्पते नमोनमः शिवाय ते २९ पुंडरीकस्रजन्नौमि पुंडरीकासनार्चितं पुंडरीकाजिनधरं पुंडरीकाक्षनायकं ३० पुंडरीकगजाराध्यं पुंडरीकमुनिस्तुतं पुंडरीकपुरीनाथं पुरारिं प्रणमाम्यहं ३१ महादेव महानृत्त महाडंबरसाक्षिणी महादेवनतुं वामां शिवकामामहं भजे ३२ श्री अगस्त्य वाग्जन्म सफलीकुर्वन्नेवं स्तोत्रेण सुंदरे विना व्योम्नि शरीरेण वाणीकापि व्यजंभत ३३ तव स्तोत्रेण तुष्टोस्मि सूक्तिसुंदर सुंदर प्रविश्य श्रीपुरं भूयः स्तुहि तत्रैवमन्वहं ३४ इत्युदीर्य नभोवाण्यां विरतायां हिरण्मयी दिवः शिवाज्ञयावृष्टिरभूत्सुंदरमूर्धनि ३५ देवाश्च विस्मयं जग्मुः किं पुनर्भुवि मानवाः पादे प्रणेमुस्तत्रत्याः सुंदरं मे निरेहरे ३६ अचिंत्यशक्तेर्देवस्य ज्ञात्वा संकल्पवैभवं अहंकारांधकारांतः प्रविवेशानसुंदरः ३७ महाप्रसादो देवस्य कथमेवं विधे मयि इति चिंतापरः शंभोः भूयसीं भक्तिमादधे ३८ स भोनत्वा नरेशस्य व्याघ्रपादमुखान्मुनीन् नंद्यादिगणनाथांश्च शिवभक्तान्महीयसः अभ्यनुज्ञाप्य गौरीं च चित्सभाधिपतिं प्रभुं निरगात्सुंदरः श्रीमान् शिवशासनपालकः ४० सन्निवृत्याऽनुगान् सर्वान् नमस्कृत्वा स्वजन्मनः उत्तीर्योत्तरकावेरिमगाद्दुल्लपुरं प्रति ४१ स्कंदापरतनुर्यत्र बोधसंबंधकः शिशुः गौरीस्तन्यामृतास्वादान्नर्तयामास भारतीं ४२ बोधसंबंधपादाब्जरेणुपावनवीथिका सेयं पुरी पदास्पृष्टुं न युक्तेत्येव सुंदरः ४३ कैलासवासं पुरुषमस्तौषीद्दूरतः स्थितः आविर्भूतो गतस्तस्य सह गौर्या महेश्वरः ४४ प्रसाद

अहंकार एवांधकारः। वा। अहंकार श्चासौ अंधकार स्तस्यांतः मध्ये ६

स्वर्णपुष्पमयी वृष्टिः ८

जना ः ९

नाम्ना स्यात् ः ३

मकरोत्तस्मै कैलासपतिरीश्वरः अथानुज्ञाप्य तं देवं दक्षिणाशामगाहत ४५ श्रीचोलविषयाभोगसौभाग्यम
वलोकयन् कावेरीतीरमगमत्कपर्दिस्थानभूषितं ४६ अवगाह्य नदीं पुण्यां कवेरमुनिसंभवां आवेक्षमाणंप
रितो नन्दत्स महानदी ४७ कमलोत्पलकल्हारवासनामोदवासितां कर्पूरपुंजसच्छायमहापुलिनमंडलां ४८
हिंतालक्रमुकस्पर्धावहरंभावनांतरां सूर्याश्वखुरनिर्भिन्ननारिकेलफलस्रुतैः पयःपूरैर्निदाघेपि कालेकू
लंकषोदकां अप्सरस्तनशैलाग्रघातव्याकुलवीचिकां ५० मज्जच्चोलवधूनाभिनिष्पीतरयवेणिकां चो
लेंद्रसैन्यमत्तेभदानचंद्रकभूषितां ५१ तीरद्रुमाकुलच्छायनिरुद्धोरुमहातपां हंसकापोतमायूरकलध्वनिमि
लद्द्विजां ५२ तटोटजमुनिव्रातवेदांतध्वनिपावितां यायजूकोरुशालास्थयूपमालाविराजितां ५३ योगनिद्रास
मासक्तरंगनाथांसमालिकां महार्णवस्य महिषीं कावेरीं स महानदीं ५४ पश्यन्पशुपतेस्थानं न्यसेवत महाक
विः मायूरं मध्यार्जुनं कुंभकोणं श्रीवांछिजप्येश्वरनामभां क्षं ५५ स्थानेषु दिव्येषु हरं निषेव्य स त्यागराजेन्द्रापु
रं जगाम इति श्री=अष्टमोध्यायः श्री सुंदरेश्वरायनमः अगस्त्यः चरितं स्कंदरस्यान्यदद्भुतं शृणुत द्विजाः स
र्वलोकेषु विख्यातं सर्वपापप्रणाशनं १ किं दुर्लभं भगवति प्रसन्ने वृषभध्वजे तथापि नान्यं वांछति भक्त्या
भक्तविना हरे २ यत्र यत्र शिवस्थानं तत्र तत्र स सुंदरः भवानीसहितं देवं स्तुवन्गुंफैर्गिरां मुदा ३ लब्धप्रसा

दृष्टांतः २

दोथपुरं विवेशाकमलालयं संनिधौ त्यागराजस्य प्रणम्यस्तोतुमैहत ४ तत्र सैंस्वागतं पृष्टः सुंदरः सूक्तिसुंदरः
संदर्शनान्महेशस्य तस्य सूक्तिरवर्धत ५ चंद्रोदयइवांभोधेः पुरोवाचां च निर्गलाः पुराकल्पांतरे विष्णुः शंखचक्र
गदाधरः ६ प्रसादितः सुरैस्सर्वैः असुरैर र्दितैर्युधि यो धूमभ्युद्यतो दैत्यानारूढपतगेश्वरः ७ देवानाम
सुराणां च बभूवायोधनं महत् नंदकच्छिन्नमूर्धानः गदासंचूर्णितांसकाः ८ मूर्छिता शार्ङ्गनादेन विलूनाश्चक्र
धारया खगेशपक्षवातेन दूरे धूताश्च पर्णवत् ९ विद्राविता रणे दैत्याः पलायनमथाश्रयन् हरिणाभ्यर्दिता
यूथपतयो ह्याश्रमं भृगोः १० विविशुः शरणाकांक्षा नापश्यन् तत्र वै मुनिं अंतर्वर्तं मुनेः पत्नीं दैत्याः प्रापुर्गतिं प
रां ११ दत्त्वाभया भृगोः पत्न्या दैत्यावेषं तरा विशान् अदृष्ट्वा दानवपतीन्निवृत्तो हरिरध्वनि १२ देवैः संचोदिता
दैन्द्रैः प्रवृत्तिममरद्विषां उपलभ्य स शरणान् रक्षितुं त्रिदिवौकसः १३ भार्गवाश्रममासाद्य पक्षिराजाद
वारुहत् आगतं विष्णुमालोक्य भृगुपत्नी यशस्विनी १४ कृतांजलिप्रदानाख्यं स्वागतं पर्यपृच्छत अथा
ब्रवीदिदं साध्वी हरिं सूनृतया गिरा १५ लब्धदर्शना समुदिता चिराल्लब्धनिधिर्यथा श्रीपते भूपते देव न
मस्तेस्तु जगत्पते १६ प्रसीद मयि भक्तायां भक्तवत्सल केशव त्वमनादिरनंतश्च दृश्यस्थित्यन्तकृत् १७
ब्रह्मादिभिश्चाविदितः स्तुतः प्राचीनया गिरा मया दृष्टोसि भाग्येन तपसेव महामुनेः १८ प्रसीदंति महात्मानः पत्रपुष्प

नो १

फलार्चिताः अनुगृहाणमय्यलं किमागमनकारणं १९ अनुगृण्हीष्वमांदेव सुधामधुरयागिरा इति संप्रार्थितः पत्न्या भृगोः कमललोचनः २० स्मयमानोबभाषेतांवनमालाधरः पुमान् श्रीविष्णुः शृणुमद्वचनंसाध्वीपूजितोस्मित्वया नघे २१ देवादैत्यभयात्तर्मां शरण्यं शरणंगताः तद्रक्षणाय दैत्यानां संहारेस्मिन् कृतोद्यमः २२ हन्यमानेषु दैत्येषु मया केचनदानवाः त्वद्वांतरं रजं प्राप्ताइतिवन्हेःश्रुतंमुखात् २३ देवान्यजति ते भर्त्ता प्रसंनास्त्वयिसंतुते चक्रेणदानवान् हन्मि निलीनायत्रतेवद २४ वैष्णवीं गिरमाकर्ण्यमुनेः प्राहपतिव्रता निरुध्यपर्णशालायाद्वारं भीतालधर्मतः २५ संतः समंतां विदुरादिपूरुषं नतेप्रियः कश्चिदथाप्रियोपिवा जगद्गुरुर्धर्मपथप्रवर्तकः कथंपरप्रेरणयासिपापधीः २६

देवाः १ दैत्यामांशरणंप्राप्तायथातामस्करद्विषः शरणागतसंत्यागन्नान्यत्पापमहत्तरं २७ अत्रैवोदाहरंतीममितिहासंपुरातनं श्येनायदत्वास्वशरीरमांसंशैब्यः कपोतंशरणागतंहि २८ ररक्षकोनिंमहतीजगामशक्रकपोतं शरणागतंच अपिप्राणभयंप्राप्तोनत्यजेच्छरणागतं २९ त्यजतोनिरयेपातः यावदाचंद्रतारकं नत्यजामिततो दैत्यान् विष्णोयाहियथागतं ३० अथवाजहिमामग्रेपश्चात्संहरदानवान् इति रुध्वगृहद्वारांभृगुपत्नीपतिव्रतां ३१ देवैःप्रोत्साहितो विष्णुश्चक्रेणनिजघानह निहत्यदानवान्पश्चाद्रक्षन्त्रिदिवौकसः ३२ पालिताहरिणादेवांबभूवुःसुखितादिवि भ्रूणहत्यां ... थमहतिरमापतिमुपाद्रवत् ३३ भ्रूणहत्याविनाशायबभ्रामभुवनेषु सः विध्ययातपसापत्नीमुज्जीव्यकुपितोभृगुः ३४ शशापकेशवमपिस्त्रीवियोगस्तवास्त्विति हत्ययानुग

लक्ष्मी १ महादेवं १

तं विष्णुर्विसृज्य कमलालया ३५ कमलालयमासाद्य भर्त्तुर्हत्यानिवृत्तये प्रयताभ्यर्चयामास भगवंतं महेश्वरं ३६ अथ वि
ष्णुर्मुनीं देवानू मेलयित्वा निजांहसः निष्कृतिं परिपप्रच्छ प्राप्तुकामः श्रियं पुनः ३७ प्रसादयित्वा मुनयः स ह देवैर्मुनिं भृ
गुं प्रायश्चित्तविधानाय येन मुच्येत केशवः ३८ अचोदयन् (मुनयः देवाः) महाप्राज्ञाः शांतक्रोधश्च सोभवत् शांतकोपः श्रि
यःकांतमिदमाह महामुनिः ३९ भ्रूणहत्यानिवार्यांते विष्णो कल्पशतैरपि यदि मे न क्रुधः शांतिरिहस्यान्मधुसू
दन ४० देवद्विजप्रार्थितस्य क्षमा दिष्ट्याभवन्मम संतो न प्रतिकुर्वंति सागः सुलाहशोपि ४१ अनुगृण्हंत्यपि ला
र्याः शोकभाजि प्रति द्विषि न निष्कृतिरघस्यास्य तथापि श्रूयतामिदं ४२ रुद्राध्यायमहामंत्रं द्वादशावर्त्तिकोटि
भिः दुग्धधाराभिषेकेण शिवलिंगस्य निष्कृतिः ४३ भस्मशाय्याशायानश्च भस्मछन्नस्तथा कुरु सो
मास्कंदं निषेव्याथ भूयः श्रियमवाप्स्यसि ४४ इत्युक्त्वा स्वाश्रमं प्राप सह शिष्यैर्महामुनिः हरिस्तु शतरुद्रीयं चिर
मावर्त्तयन्मनुं ४५ कामधुक्क्षीरधाराभिरभिषिंचन्महेश्वरं दिव्ये मारकृते लिंगे दिव्यान्वर्षगणान्बहून्
४६ दशाकोट्यब्दविलये वागभूदशरीरिणी विलीनभ्रूणहत्यास्ते व्रज विश्वंभर श्रियं ४७ श्रांतोसि पूजयाद्य
ते किं भूयः प्राप्तुमिच्छसि विष्णुराकर्ण्य तां वाणीं तान् दिशं प्रसृतांजलिः ४८ प्रत्युवाच विभो नष्टप्रदिहत्या नवार्चया सा
क्षात्कर्त्तुं भवद्रूपमिच्छामि शशिशेखर ४९ इमं देहि वरं देव भक्तवत्सल शंकर यादृशं भवतो रूपं देहि ध्यात्वापि पा
पकृत् ५० सद्यो विमुच्यते सर्वैर्वाङ्मनःकायजैरघैः एवं हरिं प्रार्थयंतं वाग्विहायस्यभाषत ५१ ब्रह्मादयः सुरग

नर म.गु.३ गते ४

गप्राकारे १

णा अगस्त्याद्याश्च योगिनः अपिक्रतुशतैरिष्ट्वा दत्वा दानानि भूरिशः ५२ पूजयित्वापि मां लिंगे तृष्णयामु
षितात्मायाः नराः कुर्वंति मां द्रष्टुं विना चित्तनिरोधनात् ५३ शृणु विष्णो त्विदं वाक्यं यदि मां द्रष्टुमिच्छसि जितें
द्रियः श्रियासार्धं वर्षकोटिस्त्वयं व्रतिं ५४ विरक्तः सर्वभोगेषु व्रतं पाशुपतं चर दर्शयिष्यामि संपूर्णे समये म
त्कृते ततः ५५ द्रक्ष्यसे मम तद्रूपं दुर्दर्शं योगिनां चयत् विरतायामुदीर्यैवं गिर्यग्नेवारिवीचिवत् ५६ दधौ व्रतं पा
शुपतं दीक्षां देवो जनार्दनः भस्मावकुंठनं कृत्वा चीरवासा जटाधरः ५७ जपन् पंचाक्षरीं विद्यां षट्कालार्चनत
कंठपर्यंते ६ त्परः कंठदघ्ने जले तिष्ठन् दिवारात्रमतंद्रितः महांतं देवमुद्दिश्य चचार व्रतमुत्तमं भूयः संप्राप्य भर्तारं क
मला पि श्रीवाञ्छया ५९ ज्वालाहत्या विनिर्मुक्तं तत्राभूत्परिचारिका चारुचित्रैरमालिंगे येरानर्च महेश्वरः ६० कमलालयनाम्नि ५
शिवे
स्थाने जवंतिकापुष्पैः कमलालयनामनि कमलाक्रीडविचैकैः नैरेवं मधुसूदनः ६१ शिवनामसहस्रेण पूज
यामास भक्तिमान् कर्पूरालेपकल्हारकलिकामालिकार्चितं ६२ गते कोटिद्वये ब्दानां सुप्रीतश्चंद्रशेखरः सो
मास्कंदतनुर्भूत्वा विष्णुमन्वग्रहीश्वरः ६३ अभ्यर्चितात्म धुभिदा हिमसार लिंगात्सार्धं गिरींद्रसुतया च षडा
ननेन कर्पूरलेपकमनीयवपुस्सुगंधिसौगंधिकस्रग भवत्पुरतोस्य शंभुः ६४ इति श्री नवमोध्यायः ९ श्री

श्रीअगस्त्यः॥ सोमास्कंदं महादेवमाविर्भूयाग्रतस्थितं कर्पूरालेपकल्हारवासनांचितदिङ्मुखं १ तप्तकांच
नसच्छायसमुन्नतजटाधरं मृणालधवलांतन्वीमौलेचांद्रमसींकलां २ गंगामहींद्रमंभोजभूकपालस्रजंस्त
था बिभ्राणमलिकेचारुमृगनाभिविशेषकं ३ स्फुरज्जवंतिकापुष्पकर्णाभरणभासुरं कास्मीरजाततिलकभा
स्वद्वन्हिविलोचनं ४ शोभनभ्रूलतंसांद्रकरुणापांगवीक्षणं कपोलादर्शसिंक्रांतबिंबगौरीमुखांबुजं ५ समुन्नत
नसंमुक्ताफलश्रीदशनावळिं विद्रुमोत्तमसच्छायमृदुलाधरपल्लवं ६ वदनादर्शचिंताभचुबुकश्रीविराजितं का
लकूटप्रभामिश्रकंठकर्पूरलेपनं ७ रत्नांगुलीयकटककेयूरवलयांगदं परश्वधमृगाभीतिवरमुद्रास्फुर
त्करं ८ गंधपट्टिकृतोभ्रांतभृंगसौगंधिकस्रजं वामांग अपरांगविषक्ताद्रिकन्याभुजलतास्पदं ९ उड्याणना
गमाणिक्यप्रभापूरितनाभिकं तारहारावळीनिष्कपदकाभांचितोदरं १० उपवीताहिनिःश्वासमृष्टभस्मानुले
पनं व्याघ्रचर्मपरीधानं मणिनूपुरमंडितं ११ उत्फुल्लाब्जशिरोरत्नप्रभापाटलपादुकं नम्राहंकारतिमिरप्रभाक
रतलप्रभं १२ कालवक्षस्थलशिलादंभोलिनखभास्करं कैवल्यकल्पकक्षोणिरुहंनूतनपल्लवं १३ भक्ताभयप्र
दारावकिंकिणीपरिभूषितं संसाररोगभैषज्यपरागस्मृतिवैभवं १४ दधानंशरणांभोजं दलितांबुजसन्निभं
रत्नसिंहासनारूढं रमणीयतमाकृतिं १५ उन्मिषज्जीवरत्नश्रीपरिवेषपरागतं वसंतीवामभागेस्याकारिजाय

त्तलोचनां १६ शैलराजसुतां देवीं सर्वभूषणभूषितां क्रीडंतं च तयोर्मध्ये कुमारं कोमलाकृतिं १७ मंजीरकिंकि
णीकांचीकेयूरकटकांगदैः वलयैरंगुलीयैश्च महार्हैः परिभूषितं १८ शार्दूलनखराश्लिष्टकंठाभरणभास्वरं उद्यत्सू
र्यनिभैः षड्भिः स्फुरद्द्वादशकुंडलैः १९ अर्धोन्त्यमृतनिष्यंदमंदहासमनोहरैः सिध्मांजनान्वितापांगलोलतारकलो
चनैः २० अंबिकास्तन्यकणिकाभूषिताधारविद्रुमैः सविभ्रमभ्रूलतिकैर्मृगनाभिविशेषकैः २१ चूडामणिपरिष्वक्त
नीलकुंचितकुंतलैः ललंतिकामणिज्योतिरनुविभ्राळिकस्थलैः २२ सामोदश्च स्मितैः षड्भिः दर्शनीयमुखांबुजैः आ
लोक्यानंदभरितः पादयोर्निपपात ह २३ प्रणम्य कोटिशस्तुत्वा श्रिया सह कृतांजलिः दधार छत्रमस्योर्ध्वं ब
र्हिबर्हविनिर्मितं २४ चचाल चामरगुच्छेन श्रीरवीजयदंतिके पांचजन्यं दरवरं प्रदध्मौ हर्षनिर्भरः २५ देवमालोक्य
पुरतो यमानंदमगाधरिः न तस्य कणिकामात्रं ब्रह्मानंदोपि संभवेत् २६ अथ प्रसन्नो देवेशः सोमास्कंदो महे
श्वरः प्रणतं प्रांजलिं प्रह्वमभाषत जनार्दनं २७ निवृत्ता भ्रूणहत्या ते संगतोसि श्रिया पुनः मत्साम्यमधुना लब्धम
नया व्रतचर्यया २८ यथापूर्वं त्रिजगतामस्त्वैश्वर्यमविक्षतं न चाहं गोचरोन्येषां मदृश्यो योगिनामपि २९ रत्नसिंहासना
सीनं स्कंदेन च सहोमया ये सेवंते महाभागास्तेषां मुक्तिः करे स्थिता ३० श्रांतोसि सुचिरं विष्णो किमन्यद्दीक्षितं तव श्री
विष्णुः मत्प्रसादाय भगवन्नेवंरूपं सदा विभो ३१ भूयो देवाश्च मुनयः कृतार्थाः संतु दर्शनात् योगनिद्राविधानाय

विष्णुः ३

प्रयच्छतु मतिं विभो ३२ इति तत्प्रार्थितश्शंभुः तथारूपो बभूव ह देवाश्च योगिनो दृष्ट्वा नमासंश्शुद्धचेतसः ३३
यद्यद्दिष्टतमं यस्य तस्य तत्तत्प्रदानतः त्यागेश्वराभिधां भेजे मनोवाचामगोचरः ३४ अथ काले गतवति महार्ण
वशयः पुमान् रत्नसंपुटमध्यस्थं कृत्वा त्यागेश्वरं विभुं ३५ निधायोरसि सुष्वाप लब्ध्वानुज्ञां महेश्वरात् निश्वासोच्छ्वा
सवेगेन निद्रालोः कमलापतेः ३६ प्रसक्ततांडवं देवं हंसनृत्यमथास्तुवन् योगिनो हंसनटनं विलोक्य गिरिजापतेः
३७ संसारार्तिजद्दुर्वक्षः कंसारेरधिजग्मुषः अथासुरेभ्यो भीतेन प्रार्थितो वज्रपाणिना ३८ उत्थाय हरिरिंद्राय दत्वा
वक्षोगतं हरं दिने दिने पूजयास्य पूजां विधिवदन्वहं ३९ कुर्वाणः सहितः शक्रो महतीं महिमामवाप्तवान् आकाशगंगा
पयसा च बर्हिश्छत्रेण शंखध्वनिभिश्च मंद्रैः जयंतिकास्तुभिरूपास्य शंभुं हरिश्रियं प्रापयथा मुकुंदः ४० इति श्री द
शमोध्यायः १० श्रीविश्वेश्वरार्पणमस्तु एतस्मिन्नंतरे देवो देव्या सह महेश्वरः कैलासशैलोपवनं प्रपेदे पुष्पित
द्रुमं १ राजरंभासमुद्यंतैः कर्पूरैः सेचकैरिव पांडुरं हेमपद्मानां परागैः कुंकुमैरिव २ अरुणं नवदूर्वाभिः श्यामलं क्वचिदुन्म
दैः अनेकवर्णैर्विहगैः कूजद्भिरभितो वनं ३ प्रविश्योपवनं गौरीं कामिनीमिव कामुकः अलंचक्रे नवैः पुष्पैः का
मदर्पहरो हरः ४ अलके कर्णिकारं च कर्णयोः पद्मकर्णिकां उन्नते नासिकाग्रे च चारुपुंनागकुंडलं ५ कपोले लोध्ररेणुं
च कंठनाले मनोरमं सिंधुवारकृतं नाम मृणालवलयानि च ६ हस्ते महोत्पलं दत्तं पत्रलेखां चितं स्तने प्रसूनाभरणं गौरी

बिश्राणारमयधरं ७ श्रीफलद्रुममूले तां प्रसूनशायने हरः उपवेश्य तदुत्संगे शिश्ये सर्वगुहाशयः ८ पश्चिमाचलपर्यंते
लंबतेस्म तदा रविः दिष्ट्या तदा प्रदोषो भूत्पावनः पापिनामपि ९ यत्र बिल्वदलैः शंभुं अर्चयन्मुच्यते नरः तदानीं रो
मशः कश्चिद्दीर्घलांगूलो सितानन: १० शाखाचंक्रमणं कुर्वन् श्रीवृक्षाग्रे पपात ह विश्रांतस्तस्य शाखाग्रे चेष्टया जा
तिसिद्धया ११ बभंज बिल्वपत्राणि कोमलान्यक्षतानि च तानि सर्वाणि पत्राणि पतंति धरणीतले १२ दिष्ट्या गौरी
समेतस्य निपेतुः पादयोर्विभोः गणयामास तानीशो यावदष्टोत्तरं शतं १३ कीशं चादर्शयन्मोर्यै साकटाक्षेण
चेक्षत ततउत्थाय संहृष्टः पशूनांपतिरीश्वरः १४ आगच्छेत्याह्वयामास बिल्वोपरिगतं कपिं तत्क्षणे ज्ञातवि
ज्ञानः सोवरुह्य ततो द्रुमात् १५ प्रदक्षिणीकृत्य पदे शिवयोर्निपपात ह तमाह भगवानीशः प्रीतो बिल्वदलार्चनात् अ
५·२
ष्टोत्तरार्धसाहस्रं शतपर्यंतमेकराट् मंडलाधिपतिर्भूत्वाचांते मत्पदमेष्यसि १७ गच्छ भूमौ मनोर्वंशे संभवोस्तु तवा
नघ इत्युक्तः प्ररुदन्नाह गोलांगूलो महेश्वरं १८ त्वत्पादसेवां हित्वा मे यदि जन्म भवेन्मम कदा जन्मनिवृत्तिः स्यात्प्र
सीद परमेश्वर १९ भक्तिरेव पदांभोजे तवास्तु मम शाश्वती त्वत्पादसेवा प्रत्यूहं नराज्यं दातुमर्हसि २० दासदासो भवा
म्यत्र न भूमौ यामि जन्मभाक् यत्र दिव्यावयं दिव्य सर्वेशामदमूढधीः २१ अहं कुर्वन् अविहाय त्वाम योगतिमभुंजे च
तुरंगबलोपेतं सर्वभोगसमृद्धिमत् २२ न वराज्यं ददामीति वंचनात वनोचिता प्रसन्नो यदि कारुण्यदृष्टि सिंहास

नं मम २३ भवतो वांछितं नान्यं न सेवे श्रीकृते भवन् न यत्र सेवा युवयोः तत्र जन्म निरर्थकं २४ प्रसीद करुणासिंधो दया
भवतु ते मयि इति द्विजोचं तमाश्वास्य प्राह तं वृषभध्वजः २५ शृणु खेदं च माकार्षीः यदादिष्टं तदाचर अज्ञानादर्चनं
भुक्त्यै मुक्त्यै विज्ञानपूर्वकं २६ वेदागमसहस्रेषु निर्णीतं वेदवित्तमैः एकबिल्वदलार्चायाः प्रदोषे मम यत्फलं २७
रहस्यं तत्प्रवक्ष्यामि शृणु तत्फलभाग् असि विरक्तो मां प्रदोषेऽद्यः पूजयित्वा विमुच्यते २८ अज्ञानात्काकतालीया
मत्पूजा राज्यभोगदा ततस्त्वमेत्य जन्मैकं भुंज भोगान्सुरेप्सितान् २९ मद्विज्ञानादमुष्यांते मत्पदं प्राप्स्यसि ध्रुवं
आवयोर्दर्शनं तत्र भविता सख्यतो हरेः ३० मद्दुक्तो न हि संतापं कर्तुमर्हसि गच्छ गां इत्युक्तः स पुनः प्राह स्मृत्यै
मुखमिदं मम ३१ तत्र भूयादथेशोपि तथेत्युक्त्वा तिरोदधे गोलांगूलमुखस्सो भून्मुचुकुंदो मनोः कुले ३२ स रर
क्ष महीं राजर्द्धिविदेवपतिर्यथा अजस्त्रं यायजूकस्य सखा भूत्तस्य वज्रभृत् ३३ एकदा सुहृदाकूतो दैत्यानां
विजयं प्रति निर्जित्य दानवान् सर्वान् सहेंद्रेणाविशद्दिवं ३४ अभ्युद्गतः सुरैस्सर्वैः कृताशीर्गुरुणा नृपः उपा
विशन्महेंद्रेण रत्नसिंहासनोत्तमे ३५ अर्धासनगतं जिष्णोरनंगसदृशाकृतिं सुरारिसैन्यबाणाग्रव्रणभूषि
तवक्षसं ३६ जयश्रियेव रागेण नखक्षतविभूषितं उपासांचक्रिरे तत्र नाकवारांगना नृपं ३७ जम्भाह चामरं रंभा
भृंगारमपि मेनका तालवृंतं सुकेशी च मंजुघोषा च वीटिकां ३८ दधतुर्नृत्यचातुर्यं उर्वशी च तिलोत्तमा वीणाव

६ वानरमुखत्व

शिववाक्यं ५

तीचित्ररेखासहजन्याचलोतोभूत् ३९ सोपगानाश्चगंधर्वाःमुचुकुंदंसिषेविरे श्लाघयित्वाथसंगीतंनभोमध्येग
तेरवौ ४० आरुह्यैरावतस्कंधंमहेंद्रोंतर्गृहंययौ दधारवृत्तिमिंद्राणिमुचुकुंदेमुकुंदवत् ४१ नरेंद्रश्चमहेंद्रश्चस्नात्वा
मंदाकिनीजले पुरारिपूजासदनंजग्मतुर्मणिभूषितं ४२ दिव्यागरवधूपेनवासितेतत्रवज्रभृत् पुरारिपूजामा
रेभेभस्मरुद्राक्षभूषितः ४३ मुचुकुंदोपिराजर्षिःमुरारीसमविक्रमः सोमास्कंदंमहादेवंदृष्ट्वा स रोमांचितोमुदा ४४
तदीयवाक्यंसस्मारतुष्टावमनसाशिवं रहस्यस्तुतिसंतुष्टःपशूनांपतिरीश्वरः ४५ अनुजग्राहतत्कर्णेभुविपूज
यमामिति संभ्रांतस्तत्सपर्यायांनविवेदशचीपतिः ४६ पूजावसानेभूपालंगमिष्यंतंमहीतलं किमभीष्टमितिप्रा
हगाढलिंगनमाचरन् ४७ अथपाणौगृहीत्वेंद्रमिदमाहशचीपतिं सोमास्कंदमिमंदेहिसौहार्दंयदितेमयि ४८
पूजांविधातुमिच्छामिकृतार्थःप्रणयात्तव उवाचेंद्रोपिभूपालंस्मयमानमुखांबुजः ४९ सखेसत्यंवदाम्येतद्गो
प्यतेकिंमयातव विष्णोर्नान्यमिमंविद्धिपूजामात्रेस्यचोदितः ५० तवाप्यमुष्यपूजायांयदिवांछास्तिभूपते श्री
पतिंप्रार्थयस्वैनंयदिसंमनुतेहरिः ५१ अथवानास्मिदानस्यप्रभुःस्यादन्यथापिसः ऐंद्रीमाकर्ण्यसगिरंदध्यौहृदि
महेश्वरं ५२ तदाज्ञप्तोव्रजेत्याशुगत्वावैकुंठमच्युतं नत्वास्तुत्वाचबहुधासोमास्कंदमयाचत ५३ केशवश्चक्षणंध्या
त्वानियोगात्पारमेश्वरात् ददावनुमतिंभूपःपुनर्गत्वाहवज्रिणं ५४ लब्धानुज्ञोस्मिविष्णोस्त्वंजिष्णोदेहिमहेश्वरं ॥

सकाशात् १

अत्येति समयः क्षोणिं यामि सोहार्दमेधतां ५५ श्रुत्वा नृपगिरं शक्रश्चिंतामाप तदांतरे इमं दास्यामि भून्यानियास्यं
ति दिवसाइमे ५६ कथन्नु पूर्णकामस्यान्मुचुकुंदश्च भूपतिः आलोच्य धीमानभ्याशे शक्रस्त्वष्टारमत्यगात् ५७ नजा
नीयाद्यथा राजा प्रति बिंबोस्य कल्प्यतां निर्माय विश्वकर्मापि ददौ बिंबं शचीपतेः ५८ प्रदाय कल्पितं बिंबं प्रया
हीत्यभ्यभाषत आदौ चादाय तन्मपि स स्वायंप्राह भूपतिः ५९ अकल्पितं परं देहि मामावंचय मामिति पुनःपुनःक
ल्पितानि षड्बिंबानि ददौ हरिः ६० स तानि प्रतिगृह्याथ चिकीर्षसप्तमं पुनः वंचनां मुंच वृत्रारे साक्षात्प्रेरयतीश्व
रः ६१ अकल्पितं महेशानं देहि नो चेद्भवेत्कलिः अथानुनीय भूपालं सोमास्कंदं महेश्वरं ६२ रत्नसिंहासनारूढं
ददौ राज्ञे शचीपतिः बर्हिच्छत्रं च चामरं च जवंतीपुष्पमेव च ६३ कल्हारमालां कर्पूरलेपनं नियमात्कुरु इत्यादिश्य मही
पालं प्रेषयामास गां प्रति ६४ प्रदक्षिणीकृत्य भुवं मुचुकुंदोपि हृष्टधीः सर्वोन्नते शिवस्येष्टे सक्षेत्रे कमलालये ६५
आज्ञप्तो वनिरक्षायै महेशं प्रत्यतिष्ठिपत् स्थानेषु षट्सु परितः प्रतिष्ठाप्य पराः कलाः ६६ नित्यं संपूज्य यं कीर्तिं
विमलां प्राप्य शाश्वतीं अन्वगात् हीपुराविष्णुयो महेंद्रमनंतरं ६७ मुचुकुंद ततोयश्च प्रसीदतु स मे प्रभुः कर्पूरलेपा
यकलाधराय कल्हारमालांचितकंधराय कल्पद्रुमायांघ्रिसरोजभाजां कैवल्यदायास्तु नमः शिवाय ६८ इति सु

६६=५

२

१९

कुंदोवदति २

पूर्वोक्तः श्लोकः अथ वेदनिधेः पुत्री कमलिन्यप्यनिंदिता। जाता विप्रगुरोः पत्न्यां सानि संवद्धिमाययौ १

दरसूक्तिसुधामुदितः तरुणेंदुकलाभरणो भगवान्। परिकंपितमौलिरुवाच भ[illegible]वानन्नुकंपिनए घिसखेवमम ९
इत्याशिष्यमहेशानः विवाहं प्रतिचोदितः सुंदरोन्वभवत्तस्याः पाणिग्रहणमंगलं १०॥ इति श्री ~ एकादशोध्यायः ११
श्रीसांबसदाशिवार्पणमस्तु श्रीअगस्त्यः त्यागेश्वरप्रियसखं सुंदरं प्राप्य नायकं धन्या वेदनिधेः कन्या जगामा
नंदमुत्तमं १ वरवेषधरं देवं प्रेम्णैनं सुहृत्तमं असुक्तो द्वाहवेषो मां भजेत्याह महेश्वरः॥ किमन्यद्भुवने भाग्यं सुंदरः
शंकरः सखा बंदीरगर्वं कौबेरं बंदीचक्रे सुवेषभृत् ३ उमावक्षोजसंक्रांतकर्पूरालेपगंधिना हरो रसासमाश्लिषं
स्वं मेने सुंदरो गुहे ४ त्यागेश्वरसकल्हारकर्पूरामोदवासिनं त्यागेशभावनावंतः प्रणेमुः सुंदरं जनाः ५ श्रीमुनयः कथं सुं
दरदूतो भूत्यागेशः परमेश्वरः एतदाचक्ष्व चरितं कृपया कुंभसंभव ६ द्वितीया सुंदरासक्ता यागौरीपरिचारिका अनिंदिता सेव
सागरिका जज्ञे त्यागेशगणिकान्वये ७ सामुद्रिकोक्त निःशेषलक्षणोत्तमलक्षिता अन्या[illegible]जसुंदरी बाल्यं वि
द्याभिस्सात्यवाहयत् ८ परिज्ञाताखिललिपिः नृत्तगीतविशारदा सर्वातिशायिनी लोके चित्रनिर्माणकर्मणि ९
जगदानंदसंदोहघनीभावद्भवोदितः देहस्तदीयो लोकानां नेत्रानंदकरो भवत् १० यौवनारंभयोगेन श्रियं सा भूयसीं दधौ
यथा वसंतयोगेन माधवीपुष्पशालिनी ११ शारदी चंद्ररेखेव विद्युद्वल्लीव वार्षिकी भूयिष्ठशोभना तन्वी मणिरत्नेज्जि
तो यथा १२ सा वसंती गृहे मातुः न कस्यापि दृशः पथि चंद्रलेखेव सुमुखी निलीना मेघमंडले १३ साकदाचन सुश्रो

णिनिद्राणा निद्रां सुंदरं स्वप्ने दृष्ट्वा समुत्थाय न निद्रामगमत्पुनः १४ मनसाराधयामास सुंदराकारमद्भुतं प्रभातायां
रजन्यां तु शयनागारमेत्य सा १५ रत्नभित्तौ विलिख्यैनं यथादृष्टममोदत तन्माला चित्रमालोक्य युक्तालापिन बर्हिर्व्यधात्
१६ अथ कालेन कियता विख्यातो भुवनत्रये त्यागेशस्य प्रववृते सुमहान्फाल्गुनोत्सवः १७ नानादेशजनानां च समवायो
महानभूत् रुद्रपादे (तीर्थ) सा स्नातुमायया कमलालयं १८ त्यागेशं तं वरं देहीत्युक्त्वा सस्नौ शुभानना जनसंघे सुमहति सं
चरं स च सुंदरः १९ स्नातोत्थितां सागरिकामपश्यत् (सुंदरः) स्तिमितेक्षणः आपादपरभागाभिव्यक्तकुंतलमंजरीं २० निश्वा
सामोदसंमोदमानमत्तमधुव्रतां व्याघ्रहुंकारवित्रस्तमृगार्भकविलोचनां २१ कपोलादर्शसंक्रांतवल्गन्माणि
क्यकुंडलां अलकांतरसंसक्तनखकिंशुकधोरणीं २२ मनोभवमहाराजे कुर्वाणां तोरणस्रजं अलिकासक्तक
स्तूरीलेखोज्ज्वलमुखांबुजां २३ नानाभरणरत्नश्रीपरिषिक्तगलस्थलीं सूक्ष्मसव्याननिर्मोकदृश्योन्नतपयोधरां २४
महार्हक्षौमसंवीतमापादगलमस्तकं बिभ्राणामभ्रगलितामिव सौदामिनीलतां २५ लावण्यामृतनिष्यंदसीक
राननमौक्तिकां मीनकेतनकल्पद्रुनवोद्यत्पल्लवाधरां २६ पादारविंदवाचालमणिमंजीरमंडितां मंदमंदपदन्या
सकलाजितमरालिकां २७ निर्मितां रतिकोट्येव लक्ष्म्याः प्रतिकृतिं यथा मान्मथीं मोहनकलां मूर्तीकृततनूमिव २८
स तां सागरिकां दृष्ट्वा विलक्षहृदयोभवत् पुरारिनेत्रनिर्दग्धस्मरस्तत्सुहृदं तथा २९ तां चापयष्टिमादाय जिगा
य किल सुंदरं ॥ स्तब्धस्य तामुद्वीक्ष्याथ सर्वाश्चेंद्रियवृत्तयः ३० लोचनद्वयमार्गेण निपतंति स्म तन्मुखे सापि दृष्ट्वा स

मालोन्यसोयमित्येवजानती ३१ कटाक्षोत्पलमालाभिः क्षणमानर्च सुंदरं तदीयेचैतदीयेच लोचनेमिलितेपथि ३२ अन्यो
न्यंगाढमाश्लिष्यपरान्निर्वृतिमापतुः अथतस्यांप्रयातायांप्रत्तिविभ्रमसः सुंदरः ३३ अन्वगादाग्टहद्वारमनंगपरतंत्रया ॥
गृहीतानसरिजनाःस्तदीयन्नामकीर्त्तयन् ३४ तद्रूपमनुसौंदर्यमेकांतेमीलितेक्षणः अहोकेश्यमहोसुभ्रूविभ्रमा
पांगवीक्षणं ३५ अहोमंदस्मितमहोवदनंसरसोधरः अहोतस्यास्तनद्वंद्व अहोमंदनराकृतिः ३६ इत्तिचिंतयतस्त
न्वीचेतस्तद्रूप्यभागभूत् हित्वापंचाक्षरींविद्यांतन्नामचतुरक्षरं ३७ जपतोभून्मनस्तस्यकामोन्मादेनमेदुरं उ
द्यानादिभ्रमालापः कर्णयोःकालकूटवत् ३८ फणिफूत्कारवत्तस्यबभूवमलयानिलः मौलींदुदर्शनभयान्त
त्यागेशमसेवत ३९ नास्तोषीद्विमनादेवंमुचुकुंदवरप्रदं विषास्वादइवाहारः भस्मनेवसितंवपुः ४० उन्मत्त
शेखरोभूत्वास्थानेशंभोरभूत्सखा चंद्रानपोरात्रिषुचंद्रमुक्तश्चंडातपोपम्यमसुष्यभेजे ४१ प्रसूनशय्यांतरसंनिवेशोप्यं
गारराशावजनिप्रवेशः ध्यानमौनपरिम्लानमानसंमदनांतकः ४२ निशिनिर्निद्रमासीनंत्यागेशः प्राहसुंदरं स
खेसुंदरकिंदैन्यमुपयासिस्थितेमयि ४३ नास्तोषिमांयथापूर्वंम्लानंचवदनंकुतः किमितित्वंननिद्रासिनाश्नासिनच
भाषसे किंतेव्याधिसमुत्थानंयथावद्वदसुंदर शोचंतंसुहृदंमुक्त्वाकस्तातुंनोत्सहतेसुखं ४५ उत्तिष्ठब्रूहिशोकस्यकारणं
शामयामिते सुंदरः "आधिर्मदीयोममदुर्निवारस्त्वयाविनातस्यनशांतिकर्त्ता अनंगरोगादवमांसखायंभिषक्त

चिकित्सकानां मध्ये १

२ स्थितः

मत्तो भिषजां श्रृणोमि ४६ अस्ति सागरिका नाम स्त्रीरत्नमतुलप्रभा तदादाय प्रहरणं मां पीडयति मन्मथः ४७ अनंगज्वरदूनोस्मि तत्कृते व्यसनं महत् यदि तस्याः परिष्वंगः लभ्यते सकृदेव मे ४८ त्यागेश्वर भवत्पूजाफलमेतन्न संशयः त्वद्रूपचिंतां परिहृत्य तावत्तद्रूपचिं[illegible]तान्तरलं मनो मे ४९ त्वन्नाममांगल्यमपास्य दूरे तन्नामपारायणसादरोस्मि दीनस्य कामदूनस्य त्यागेश्वर दयानिधे ५० देहि संजीविनीमेनां सर्वाधिव्याधिशांतये दूत त्वमेव गत्वा तां यथा नयसि शंकर नवीनपद्यसाहस्रमर्पयामि स्तव प्रिय ५१ तत्त्वोपदेशसाहस्रैः त्वत्स्यामाशानवार्यते उपेक्षसे यदि स्वामिन् पश्यतस्ते त्यजाम्यसून् ५२ श्री अगस्त्यः इत्युक्तः प्रणतं पादे सुंदरं भक्तवत्सलः प्रतिज्ञाय तदेतस्मै दूतरूपमबीभरत् ५३ अथार्धरात्रे सर्वेषु निद्राणेषु पुरारिषु सुंदरस्य विनिद्रस्य त्यागेशस्तापशांतये ५४ एकांसर्वगुहावासी ययौ सागरिकालयं यांतं सुंदरदूतं तं कर्पूरालेपसुंदरं ५५ वीक्ष्य विश्वाधिकं देवं विस्मयं तेस्म खेचराः तस्य पादाब्जविन्यासपरिपूता निवीथिषु ५६ रजांसि शिरसा धृत्वा सिद्धा बंधमुचो भवन् याति सागरिकावासं त्यागेशे दौत्यकारिणि ५७ जय सुंदरदूतेति काहली व्योम्न्य जृंभत अनुक्त्वा सुंदरसखं गत्वेतं दूतरूपिणं ५८ व्यजिज्ञपन् पुरजनाः देव्यै दिव्यविभूतये मणिसौधाग्रमध्यास्ते कमलालयनायिका ५९ गवाक्षेण विलोक्येशं गौरी मंदस्मितं दधौ दधौ च मनसा देवी नदप्येतस्य भूषणं ६० भस्मास्थिमालानकरोटिपा

पार्श्वे २:

त्वश्मशानचर्याजिरदुःखभाजः सख्युःकृते दोत्यमिदं पभूनां पत्युर्विनोदो न हि दूषणाय ६१ अथातीत्यमहा
वीर्यो महादेवो दयानिधिः यत्रोसागरिकाविन्नस्तद्वारं शुभवित्तर्दिकं ६२ स्नानं वराहवपुषा न मुरारिणाय सदांबुजं
पशुपतेर्गणिकागृहस्य पस्पर्शनित्खलु भिलाविधिहंसमूर्त्यं लासाशिरोपि निशिसुंदरदोत्यभाजः ६३ अथा
र्चकतनुर्भूत्वा योगेशः सर्वरूपभाक् उद्घाटयाररं रात्रौ रम्यंकान्तेत्यभाषत ६४ अथार्धरात्रे गंभीरो
गिरमाकर्ण्य शंकिता तत्र सागरिकामात्रा विनिद्रा सार्धमायथौ ६५ बालेसागरिके पश्चाद्भव पश्या मिकःपु
मान् निशीथे स्मद्गृहद्वारमेयाद्रयति साहसी ६६ इति मातार्गले न्यस्तपाणिं तस्थौ विशंकिता प्राहसा
गरिका तत्र जननीं सुंदराशया ६७ मातः कर्पूरकल्हारजवंतीपुष्पवासना बहिराकर्षतीतूर्णं क्वोयं द्वारि वि
लोक्यतां ६८ पूर्वं युःकश्चनेसेवं अर्धोक्ते विरराम च उद्घाटयाररमिति ध्वनिरासीद्बहिः पुनः ६९ योगेश्वरो
वतुसुते कुलदेवतन्नः सांप्रसंसाभ्यगतो ननु तर्कयामि आहूत एति गणिकागृहमर्धरात्रे बालापि साहसमि
दं कथमातनोषि ७० बालेंदुमौक्तिकजुषः परतंत्र तातेयुक्ताय मेतुनपसंनिधिमानयामि उक्तेति सागरहमुखा
ररंभेदर्कं तं मातादर्दशविहितार्चकवेषमीशं ७१ इति श्रीस्कांदोपपुराणे भक्तविलासमहात्म्ये द्वादशोध्यायः
श्रीसांबसदाशिवार्पणमस्तु श्रीअगस्त्य उवाच मलार्चकं हरं प्राह तदा सागरिकाप्रसूः इहलिंगुरूणामप्यु

गणिकाव दति ५

कपाट

चितंमद्गृहागमे १ धन्यास्म्यनुगृहीतास्मि वसीचेयमिहास्यतां निशीथे तादृशो वेश्यासदनं चेन्महान्व्रजेत्
२ अपवादपरो लोको मूढः किंकिन्नवक्ष्यति अनुज्ञाप्यावयं ब्रूहि किमागमनकारणं ३ इति तस्यां ब्रुवाणायांस्म
यमानमुखांबुजः मायार्चकवपुः प्राह भगवान्परमेश्वरः ४ शृणु सागरिका मातः शृणोतु च सुता तव श्रेय
से यद्वासे भूतेपुत्र्यास्ते वचनं मम ५ त्यागेश्वरसुहृत्कश्चिदस्ति हि खलु सुंदरः स तु सागरिकां दृष्ट्वा तामसंगजमूर्छि संतापंकरोति
तः ६ दूतं तस्यागतं विद्धि सांप्रतं त्वद्गृहं प्रति ऐश्वर्यममितं तस्य वयो नवमनुत्तमं ७ रूपं च विद्याप्रथिता
शिवयोः ६ यया सीत्स हदीश्वरः आवयोरिव तेपुत्र्याः प्रणयोस्याप्यखंडितः ८ भूयादनर्घ्यं कौशेयमेतत्संप्रतिगृह्यतां इत्युक्त्वा
प्रददौ भस्म तयोर्हस्ते महेश्वरः ९ मातापुत्रीमुवाचेदं तथैव क्रियतामिति व्याजलज्जावती सा तु प्राह सागरिका
गुरुं १० मम त्यागेश्वरादिष्टो वरो भवति संमतः साक्षाद्यथा मे स भवेत्तदानीं हि वृणे वरं ११ तदाकर्ण्यार्चकः प्राह
त्यागेशस्यापि संमतं इदमेव सुहृत्तस्य यतो सो सुंदरः कविः १२ तथा सागरिके कार्यमावयोर्यत्तदंतिके पुनः सा
त्यागेश्वरः गरिका प्राह स्वामिनः संमतं यदि १३ स एव साक्षाद्वदतु तथा कर्त्तास्म्यनंतरं इति तस्यां ब्रुवाणायां स्वीयं रूपम
दर्शयत् १४ भगवाननयोस्तत्र त्यागराजो द्विजोत्तमाः ते प्रणम्य पदांभोजे वृषभारूढमीश्वरं १५ प्रार्थया
मासतुर्मुक्तिं देहांतेस्त्विति सोऽब्रवीत् संगमश्चोस्तु युवयोरित्युक्त्वाथ तिरोदधे १६ प्राह नागरिकान्स्वप्ने प्रसे

सुंदरेणा १ अथ त्यागेश्वरः

केदिव्ययुक्तिमान् त्यागेश्वरः सागरिकां सुहृदा घटयेदिति १७ सुंदरं च समासाद्य संगमश्वो भविष्यति
इत्येकांतकृतस्नेहाद्गाढमाश्लिष्य सुंदरं १८ सखे तद्रुतिकाले मां मा विस्मर यथासुखं विहरेतिनमादिश्य
धामस्वं प्रत्यपद्यत १९ अथापरे द्युः सर्वे पिनागरा मिलिता जनाः परस्परानुरूपेण सद्गालोकेन विस्मिताः
२० प्रत्यूषे सागरिकया सुंदरं समचोदयन् योजितः सागरिकया नागरैरथ सुंदरः २१ स्वर्लोकदुर्लभान्भोगान
न्वभूदिह देववत् सुंदरालिंगनालाप शयनासनभाग्यभाक् प्राप सागरिकानंदं श्रितावल्लीव कल्पकं २२ मणिविद्रुम
सोपानस्वर्णस्तंभविभूषिते मूर्छितागरुधूपांधपुष्पंधयसमाकुले २३ प्रासादे निवसन्नित्यं प्रेयसीतामरीरमत् मं
दरोन्मथितांभोधिपयःफेनोत्करप्रभाः २४ यत्र शय्यासुखस्य शंः प्रकालकुसुमास्तराः कवेः सागरिकाश्लेषक्री
डासौख्यामृतोर्मयः २५ त्यागेशावेदिनस्तस्य पुपुषुर्धिषिलैर्णोत्तं दिने दिने सागरिकानखदंतक्षतोचितं २६ उत्था
योषसि गच्छंतमर्धभ्रष्टानुलेपनं कपोगेलेर्भसंशोभितांबूलकबलोज्वलं २७ सुंदरं सुहृदं दृष्ट्वा त्यागेशः प्रीति
मानभूत् अथैकदा कृतस्नानं कृताह्निकमुपागतं २८ संनिधौस्तोतुकामं तमुवाच त्यागनायकः प्रातः सागरि
कासौधादुत्थितस्य सखे तव २९ वेषो मनोहरतमः तथा नित्यं भजस्व मां नाकर्म मम दासस्य बंधाय सुहृदः किमु
३० इत्यादिष्टो भगवता तथा सेवत सुंदरः हासावलोकनविलासदृढोपगूढक्रीडासुखानुभवकोटिषु कोमलां

स्व

सुंदरे ५

ग्याः न व्यस्मरत्स हृदमाप्तनमंमहेशं त्यागेश्वरं स गिरिशः स्तुतः सुंदरोक्तिः ३१ अकृतान्हिकमासीनं सुंदरं वीक्ष्य चालये अस्पृश्यं गणिकासक्तं धूर्तं केचिद् भाषिरे ३२ केचिदीशप्रसादाढ्यं त्यागेशं मेनिरे जनाः सुंदरस्तु सुहृद्वंभो निंदास्तुत्योः समो भवेत् ३३ न तस्य गणिकाभोगो दोषाय स्मरतः शिवं यथा गंगाप्रवाहस्य कर्दमः क्षोणिसंगमः ३४ अथैकदा समायांतं प्रातः सागरिकालयात् करे गृहीत्वा पप्रच्छ त्यागेशः सुंदरं मिथः ३५ सखे सुंदर पृच्छामि किंचित्सत्यमुदीर्यतां सुखं सागरिकासंगे यादृशं तं निवेद्यतां ३६ यच्च कुंभस्तनस्पर्शे गाढाश्लेषे च यत्सुखं यच्चाधरामृतस्वादे यच्च गोष्ठीषु सुभ्रुवः ३७ सौहार्द्दादेव पृच्छामि प्रश्नो नैवं विधोन्यतः यथानुभूतं तत्सर्वमेतन्मे वक्तुमर्हसि ३८ श्रीसुंदरः मोदप्रमोदानंदानां न किंचिद्विद्म शंकर भोक्तुः सुखं न जानाति शयनप्रच्छदांशुकं ३९ सर्वेंद्रियप्रेरयिता सर्वलोकगुहाशयः कर्त्ता भोक्ता त्वमेव त्वं ज्ञानास्यखिलतत्त्ववित् ४० नास्मि कर्ता न भोक्ता च प्रेरणीयस्तवास्म्यहं यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेपि वा ४१ नामरूपात्मकं वस्तु त्वन्मयं सकलं खलु इत्युक्त्वा त्यागराजस्य प्रणिपत्य पदांबुजे ४२ तस्थौ स सुंदरस्तूष्णीं पार्श्वे भृत्यो यथा प्रभोः तदाज्ञया द्विजान् स्तुत्वा तिल्लकाननवासिनः ४३ तैश्च संपूजितस्तेषां बभूवाग्रेसरस्सुधीः तस्य चित्तपरीपाकमवलोक्य च [illegible] ईश्वरः ४४ ददौ वेदांतविज्ञानं यन्नेतद्दीचिवज्जले स पादाब्जोदकं स्नातं सुंदरं ज्ञानदीक्षया ४५ कृतार्थयति देवेशे तत्रासन् सनकादयः प्रणम्य संशयच्छेदं प्रार्थयन्त्स्तथतेषु

पि ४६ श्रुण्वंतु मुनिषु श्रीमान् सुंदरं प्राह शंकरः श्रीमहेश्वर उ० निष्क्रियं निर्मलं शांतं निरवद्यं निरंजनं ४७ परि
पूर्णमहं ब्रह्म सर्वं नित्यं त्वमसि ध्रुवं प्रागासमेक एवाहमस्मिन्नान्यदसच्च सत् ४८ निलीने षु च सर्वेषु यो विशिष्टोहमस्मि
सः अंगुष्ठमात्रं पुरुषं गुहाशयमनामयं ४९ प्रत्यङ्मुखेन ध्यायंति मनसा मां मुनीश्वराः मनो मत्प्रेषितं भूत्वं पततस्य
सुगुणो मया ५० चोदितो नश्वरत्यन्नचित्रं छिद्रघटांबुवत् रूपं येन निक्षति चक्षुः येन शब्दं ग्रहः श्रुतेः ५१ स्वादु विद्रसना
येन सोस्मि सर्वेंद्रियांतरः मयि ज्योतिषु सूर्याद्या नुभांते नेत्र दीपवत् ५२ अनुभांति कृतः सर्वे राजानमनुसे
न्यवत् भूतं जातं मयि मृषा सिंधो वारि विकारवत् ५३ भिदां भश्चंद्रवन्मिथ्या दुःखं स्वप्ने शरीरवत् जायमानेषु भू
तेषु लीयमानेषु वा मयि ५४ न मे विकारो वियतो यथा मेघोदयं ततः आब्रह्मस्तंबपर्यंतं यत्प्रतानमनंतरं ५५
तदस्म्यहमिति ज्ञात्वा पशुः पाशाद्विमुच्यते द्वौ सखायौ खगौ वृक्षं परिष्वज्य स्थिताविमं ५६ पिप्पलाशी तयोरन्यस्त
न्योनश्नन्प्रकाशते कर्मानिंदाद्यमे सिंधोः रीकराद्य वर्तेमयि ५७ ज्ञात्वेति मुक्तसंकल्पो देहीनावर्त्तते पुनः आ
न्वीक्षिक्यादयो विद्याः न मद्विज्ञानहेतवः ५८ न मामुपनिषद्दीपः प्रकाशयति तद्विदः भक्त्यैवोपनिषद्वेद्यं चिरेण
मदनुग्रहात् ५९ ज्ञात्वा मामंजसा कश्चिच्छोकं तरति दुस्तरं पयोर्णनाभिः सृजति ग्रसते च तथेश्वरः ६० सृजत्य
वत्यत्ति जंद्दिति ज्ञात्वा विमुच्यते मामेव सर्वभूतानां हृदिस्थं परमेश्वरं ६१ तरंति शरणं प्राप्य कृतार्था सर्वसाक्षिणं ॥
ग

इतिवेदांतजज्ञानंदत्तंसुंदरतेमया ६२ विरक्तएतद्विज्ञायमुच्यतेकर्मबंधनैः श्रद्धयापरयाभक्त्यातपसागुर्वनुग
हात् ६३ सछिन्नसंशयोधन्यःकश्चिदेवविमुच्यते तस्मात्सुंदरमामेवशरणंप्राप्तवानसि ६४ मत्प्रसादात्त्वया
विद्याब्राह्मीलब्धासुखीभव विज्ञायसर्वंमद्रूपंननिंदंचस्मरिष्यसि ६५ त्यक्तंयथाहिनिर्मोकंनचवैस्मरतेपुनः
इमांमेचिन्मयींमुद्रांध्यात्वाजन्मार्हवान्नहि ६६ इत्युक्त्वादर्शयन्मुद्रांत्यागेशःस्वस्यचिन्मयीं संछिन्नसंशयास्त
वैसनकाद्याश्चसुंदरः ६७ सहस्त्रकृत्वस्त्यागेशंप्रणेमुःपूर्णमानसाः अथाज्ञप्ताभगवतातेजग्मुस्सनकादयः ६८
भावयंतोज्ञानमुद्रांनित्यंत्यागेशदर्शिनां दोत्सापचारेपरमेशाकृत्यंक्षमापयन्स्तोत्रशतेनसुंदरः विमुक्तसंगोविषयेषुनि
र्वृतिंपरामवापस्मरभित्प्रसादतः ६९ श्रीअगस्त्यः चरितंसुंदरस्यैतत्शृण्वंतिचपठंतिये तेषांशिवप्रसादेन
मुक्तिःस्यान्नात्रसंशयः ७० इतिश्रीस्कांदोपपुराणेभक्तमहात्म्येत्रयोदशोध्यायः श्रीसांबसदाशिवायनमः अथ
कुलालकुलोद्भवस्यश्रीनीलकंठस्यचरित्रारंभः श्रीअगस्त्यः नदेवतंमहादेवादपरंसुलभार्चनं वृथापरिश्रमो
लोकःसेवतेदेवतांतरं १ स्वकालभयमोक्षायशक्तिर्नान्यस्यकस्यचित् भीतःकालाज्जनस्तेस्तेसेवयाकिंकरिष्यति २
प्रारब्धादीनभोगानांभूत्वाभूत्वाविनश्यतां उपास्योदेहिनामेकोभगवान्कालशासनः ३ फलंतुसुमहत्तस्यभजने
ह्यपुनर्भवः सुकरंचास्यभजनंमूढःक्लिश्यतिसंसृतौ ४ अनन्ययाहरेर्भक्त्याप्रसीदतिदयानिधिः प्रसादादस्यमुक्ति

श्च नज्ञानान्नापिकर्मणः ५ अधिकारी विशेषेपि ज्ञानकर्मप्रवर्तने सर्वेधिकारिणो भक्तेरिति शास्त्रेषुनिर्ण
यः ६ भक्त्याकेवलयाजंतोःपत्रपुष्पफलादिभिः प्रसीदत्यर्चितःशंभुर्नविद्यासत्कुलादिभिः ७ विनायोगे
नसांख्येनतपसोत्तमजन्मना कर्मणाविद्ययाचापि भक्त्यामुक्तास्सहस्रशः ८ अत्रैवोदाहरामेतच्चरित्रंशृणु
तद्विजाः यस्यश्रवणमात्रेणप्रसीदतिमहेश्वरः ९ अस्तिभूमंडलस्यास्यमंडनंक्षेत्रमुत्तमं श्रीमच्चिदंबरंनाम्ना
दर्शनान्मुक्तिदंनृणां १० यत्रस्वर्णसभामध्ये नृत्यंदृष्ट्वापिनाकिनः बभूवतुर्मुक्तबंधौ व्याघ्रपादपतंजली ११ महेशं
यजतांयत्रब्राह्मणानांगृहेगृहे अग्निहोत्रोत्थितोधूमःसायंप्रातश्चपावनः १२ हविराज्यपुरोडाशपुण्यगंधमनोहरः
दिग्वधूमुखकस्तूरिपत्रभंगांकुरायते १३ तत्रकश्चित्कुलालोस्तिकुंभकारकुलोत्तमः दिविस्रष्टुरिवामुष्यभुविनि
र्मा.णकौशलं १४ सनित्यंशिवगंगायांस्नातःशिवकथाश्रुतिः नित्यंनवंभांडजातं नटेश्वर नृत्तराजमुदेददौ १५
ददातिशिवभक्तेभ्योवांछितंपात्रमुत्तमं संभावयन्शिवाकारान्शिवभक्तानसेवत १६ भार्याचास्यवरासाध्वी
शिवभक्त्यामहीयसी तयान्वितस्यभक्तस्यनासीद्दुशकरःकृतः १७ नचानपत्यभावेनखेदस्तस्याभवत्कचित्
श्रीमच्चिदंबराधीशे भक्त्यानंदमुपेयुषः १८ शृण्वतःशिवमाहात्म्यंशिवगंगातटेन्वहं सकलस्यनटेशस्यविंबेचि
त्तमभूद्दृतं १९ कदाचित्स्वप्नसंदृष्टांस्मरतःशांभवींकलां कंठनालेमहेशस्यकालकूटप्रभांचिते २० रतिरासी



तदारभ्य नीलकंठेति सर्वदा तदा सर्वैर्जनैर्नाम्ना नीलकंठः कृतो हि सः २१ तस्यैवं वसतः कालः सुमहान्त्यव
र्तत अथ प्रावृषि सायाह्ने एकदा चिद्भांडमुत्तमं २२ प्रदत्वान्नृत्तराजाय प्रतस्थे स्वगृहं प्रति अंतरा महती वृष्टिर्झंझा
वातसमन्विता २३ तया न ज्ञायते भूमिर्द्यौर्दिशो वा तु किं पुनः आसारपीडितश्चायमार्द्रवस्त्रश्च खिन्नधीः २४
आसन्नवेश्यासदनद्वारभूमिं तदा ययौ तन्नीलकंठं विज्ञाय वेश्या तद्गृहवासिनी २५ नीत्वा तमंतः स्वसदनं व
ह्निं प्रज्वाल्य सेंधनैः अनार्द्रवसनं दत्वा तांबूलादि समर्प्य च २६ ददावागरमालेपं शैत्यं येनोपशाम्यति अथा
सौ विरते वर्षे नीलकंठेनुमोदितः २७ वेश्यया स्वगृहं प्राप सांगरागो विभूषितः शयानो भार्यया लेपं प्रतिपृष्टः स सत्यवाक् २८
सर्वं जगाद तत्तेन तस्याः शंका महत्यभूत् चिराय वेश्यासक्तस्त्वं नाद्यप्रभृति मां स्पृश २९ नीलकंठोपरि ततः शापो दूरे स्थि
तो भव इति साध्व्यापि संप्रोक्तः तदा प्रसभ्रुणोक्रुधा ३० आदेहपातं नैव त्वां स्पृशामीति निशाम्य तत् चकंपे सा परं साध्वी
सांत्वयामास तं पुनः ३१ प्रतिज्ञां नात्यजत्सोपि तयोरिंद्रियनिग्रहात् भक्त्या नटेशः संप्रीतः प्रसादं कर्तुमैहत ३२ मु
निवेषमुपादाय हरस्तत्सदनं ययौ तमुत्थाय प्रणम्याथ नीलकंठोभ्यपूजयत् ३३ किं कार्यमिति पप्रच्छ दत्वासनमनु
त्तमं स्मयमानो नीलकंठं तमुवाच नटेश्वरः ३४ न योगिनो मे वांछास्ति कुत्रचिद्दृश्यवस्तुषु तथापि किंचिद्वाक्यं मे
नीलकंठ निशाम्यतां ३५ तपसा पात्रमेतन्मे प्राप्तमन्यैर्न दुर्लभं यदाहं यच्च वांछामि ददास्येतन्मे तदा ३६ न्यास
न्मे

नीलकंठ:२

भूतमिदं रक्षयावदागमनंमम इत्युक्त्वानस्यहस्तेतत्प्रदायाद्भुतभाजनं ३७ ययौमुनिःस्वैरगतिःसचतत्संररक्षह यथा नकोपिजानातिपात्रंमंतर्गृहेस्थितं ३८ सगत्वायत्रकुत्रापिपुनरेत्यतदैक्षत देहांतःप्राणवत्तेनरक्षितंभाजनंगृहे ३९ न्यासं रक्षंतियेन्यस्यतेषांलोकाःसनातनाः हस्तेतस्यमुनेर्न्यासिंपात्रंदत्वाकृतार्थतां ४० यास्याम्यायास्यतिकदासचेतिसमचिंतयत् इतिचिंतापरेतस्मिन्नुईश्वरमायाप्रकल्पितं ४१ तिरोबभूवतत्पात्रंत्वाल्लमस्मरतोयथा अथागत्यमुनिःप्राहनीलकंठेनपूजितः ४२ त्वयिविन्यस्तपात्रस्यदेशांतरचरस्यमे नकदाचिद्विचारोस्तिप्रसीदतुतवेश्वरः ४३ देहिपात्रंमदीयंतन्मां यद्रक्षतिमात्मवत् अन्नाभ्यंजनवस्त्राणिप्रदायाभीप्सितान्यहो ४४ नीलकंठोपितच्छ्रुत्वायत्रतत्स्थापितंगृहे नदद र्शसतत्पात्रमन्विष्टमपितत्पुनः ४५ भार्यामाहक्कतत्पात्रंनैर्वावेमीत्यभाषत किंमायाकिंनुदुःस्वप्नउपसर्गोथभौतिकः ४६ अपवादांबुधेरस्मान्नीलकंठोद्धरस्वमां नोचेदिमानहंप्राणानूसापवादान्नधारये ४७ इतिनिश्चित्यमनसा मुनेरंतिकमाययौ मुनीश्वरोपितंप्राहनीलकंठाशुदीयतां मदीयंपात्रमधुनाविलंबःक्रियतेकथं अथतंप्रणतःप्राहभीतःश्लोकविमूढधीः ४९ इदमाकर्णयस्वामिन्त्वपराधंक्षमस्वमे सुरक्षितंतनेनतत्पात्रंदुरितान्मेनरश्यते ५० अन्यत्तत्सदृशं पात्रंददामिप्रतिगृह्यतां श्रीअगस्त्यउ॰ नीलकंठेब्रुवत्येवंचुकोपसमहामुनिः ५१ ततस्त्वसोमुनिःसर्वान्मेलयित्वेद मब्रवीत् अहोपश्यतदौरात्म्यंकुंभकारस्यदुर्मतेः ५२ अपहृत्येष्टदंपात्रंमत्पात्रंदातुमिच्छतः व्याघ्रस्यगोमुखस्येववंचनाचातुरीतव ५३ दृष्टोस्मिवंचितोविषंभस्मरुद्राक्षधारिणः गांदोग्ध्रीमपहत्यैवप्रदातुंखरमिच्छति ५४ यदिकस्यापित

नीलकंठोमन सिनसृतिः

ल्लोकेचरितंसमतंभवेत् शृण्वंतिवाकथांनित्यंभस्मरुद्राक्षभूषिताः ५५ परद्रव्यापहारायपरं भ्रमतिसाधुवत् ब
लादपहृतद्रव्यंकुलकोटिं ध्रुवंहरेत् नीलकंठततोहंत्वांब्रमीम्यात्रानिवर्त्यतां ५६ अथवान्वयकोटीभिर्निरयेपतनं
ध्रुवं ५७ सहमानोदुरुक्तिंतांप्रांजलिःप्रणिपत्यतं नमयापहृतंपात्रंसत्यमित्याहकुंभकृत् ५८ नीलकंठमथप्राहसमु
निर्जनसंसदि तद्वाक्यंमेनविश्वासोयदिसत्यंब्रवीषिच ५९ शिवगंगांभसिस्नात्वाकुलतंतोःशिरःस्पृश अनप
त्योसिंचेद्भार्यांहस्तेकुलार्द्धवस्लभृत् ६० नटेशसंनिधौस्नात्वासत्यमेतदुदाहर नहृंचेदस्तुतत्पात्रंहृतस्त्वत्संगमा
दहं ६१ प्रतिज्ञाभंगभीरुस्तंनानुमेनेसकुंभभृत् निनायाथबलाद्योगीनटेशपदसेविनं ६२ यज्वनांसंसदंचै
वव्याजहाराखिलंचतत् प्रत्ययःकार्यइत्युक्तासचत्वाश्रुतमभ्यधात् ६३ सचनैवंविधास्येतिमुनिःप्रार्थनैर्वदन् नी
लकंठमुनिः ... क्रूरःप्रतिज्ञायुवयोर्यदि ६४ उपायस्तत्रदृष्टोयंसदस्यैःश्रूयतामयं अपवादोन्यथावास्याज्जनात्
प्राप्तवतोश्चिरं ६५ ननटेश्वरभक्तस्यभवंतिविपदःक्वचित् मुनिर्महात्मातेजस्वीप्रत्ययस्तस्यदीयतां ६६ संघी
भूयमहांतोयद्वदंतिश्रेयसेहितत् कोदंडवेणुदंडस्यगृहीत्वाद्वोयुवामिह ६७ शिवगंगांभसिस्नात्वाप्रत्ययंदत्तांमु
नेः इतियज्वत्रिसाहस्रप्रोक्तंवाक्यंनिशम्यतौ ६८ दंपतीवेणुदंडस्यकोद्यालंब्याममज्जतुः शिवगंगाभसस्तस्मादुन्म
ज्जंतौयुवाकृती ६९ तौमुनिर्वृषभारूढंनटेशंतमपश्यतां तयोःप्रसन्नोभगवान्दत्त्वामुक्तिमभीप्सितां ७० सहताभ्यां
चिदाकाशंस्वंधामप्रत्यपद्यत यःपठेदिदमध्यायंशृणुयाद्वासमाहितः ७१ नटेश्वरप्रसादेननपुनर्जायतेभुवि इति

भुनयः१

श्रीस्कांदोपपुराणे भक्तविलासे च तुर्दशो ध्यायः १४ श्री सांबसदाशिवार्पणमस्तु ॥ ऋषयः उ॰ चरितं सुंदरस्योक्तं स
गतो वंशस्य महात्मनः भक्त्यावशो यस्य गुरुरासीन्महेश्वरः १ तथैव नीलकंठस्य शिव कैंकर्यकारिणः आकर्णितं त
च्चरितं भक्तिमान्यो नटेश्वरे २ न येषामधिकारोस्ति वेदांतज्ञानसाधने स्वयं च कर्तुं कैंकर्यमशक्तास्त्रिपुरद्विषः ३
अथापि मुक्तिं वांछंति निकृष्टकुलसंभवाः केन प्रीतो ददात्येषां मुक्तिमीशस्तदुच्यतां ४ श्रीअगस्त्यः अत्रेतिहासं ब्रुवतो
मत्तः शृणुत भूसुराः यस्य श्रवणमात्रेण जनः पापैः प्रमुच्यते ५ ज्ञानाधिकारिणां पुंसामधिकर्माधिकारिणां अनुरू
पार्चया शंभुः यथा प्रीणाति सर्ववित् ६ निकृष्टकुलजातानां ज्ञानकर्मजडात्मनां स्वभक्तपूजयैवेशः तथा प्रीणाति दे हिनां
यद्यदिष्टतमं लोके शिवभक्तस्य याचतः तत्तत्प्रदाय हीनोपि जात्या सद्यो विमुच्यते ८ बहवः संति भूलोके शिवभक्तै
कपूजया विमुक्तबंधनाः सद्यो मुक्ताः शंभोरनुग्रहात् ९ तीर्थाटनाध्वरतपोव्रतदानपूर्तसन्मंत्रतंत्रनिगमागम
वर्त्मभाजां प्रीणाति सर्वजगतां पतिरिंदुमौलिस्तद्वद्यथा स्वपदभक्तजनेषु भक्त्या १० अस्ति दक्षिणदिग्भागे
कावेरीतीरभूषणं नगरं धनिनां लोके वणिजां धनवर्धनं ११ वर्षमात्रनिवासेन यत्र लक्षद्रोपि निर्धनः संपदं म
हतीं प्राप्तः स्पर्धते धनदेन च १२ हतेषु नवरत्नेषु वणिग्भिर्यन्निवासिभिः क्षीणा तीव महांभोधिः उदक्षोर्मिकि
रोन्वहं १३ तत्रासीदूरुजः कश्चिद्धनदेन समश्रिया ख्यातो महाधनो रत्नपरीक्षासु विचक्षणः १४ सकूत्तस्य

ऽपार्जितं १

करस्पृष्टं अत्यल्पंवर्धतेधनं तस्याशिवचरास्तर्वे नोधनाःपादसेविनः १५ बाल्येतेनोर्जितंद्रव्यंमहामेरुरिवापरः भार्याविस्क
मतीनामसर्वलक्षणसंयुता १६ तस्यासीद्वसुकोटीभिःयस्याःपरिवृतंजगत् सतयाबुभुजेनित्यंसहितःसुरदुर्लभान् १७
भोगाननर्घ्याभरणालेपस्रग्वस्त्रभासुरः एवंभार्यासमेतस्यसमयःस्कमहानगात् १८ ब्रनचर्यापरस्यासीन्नापिवंशाकर
स्सुतः सदारःशिवंनधीःस्तेनपरित्यक्तविभूषणः १९ वाणिज्येकल्पत्वेकंदासंतूष्णींगृहेवसत् एकदासतुकावेर्यांप्रा
तस्नातासहस्त्रिया २० गृहंजिगमिषुस्तीरे पौराणिकमवंदत सतेनास्वेतिनिर्दिष्टःसभार्यश्चाशृणोत्कथां २१ तस्मा
च्छिवपुराणानिपठतोब्राह्मणोत्तमात् श्रुत्वाशिवकथाःपुण्याः भक्तिस्तस्यशिवेभवत् २२ दिनेदिनेपुराणस्यश्रवणा
सक्तचेतसः सभार्यस्यविरक्तस्यशांताविषयवासना २३ तौदंपतीद्विजंवृध्दं शिवतत्वेषुनिष्ठितं प्रसाद्यप्रापतुर्मंत्रं
पंचाक्षरमनुत्तमं २४ क्षेत्रवस्त्रगृहादीनितस्मैदत्वाविशुध्दधीः सदाशिवपुराणेषुसंसक्तोभून्महाधनः २५ गुरुंक
दाचित्पप्रच्छ विनीतोविहितांजलिः मुमुक्षोर्मेकथंमुक्तिर्भवितेत्याप्रसादतः २६ ज्ञानेनकर्मणावापिविहितेनयथा
विधि उपासितोजगत्कर्ता प्रसीदतिमहेश्वरः २७ नतयोरधिकारोमेकथंमोक्षोभविष्यति प्रवदंतिपुराणा
निकर्मणोज्ञानमुत्तमं २८ इमंमेसंशयंछिंधिसर्वज्ञोसिदयानिधे इत्याकर्ण्यगुरुस्तस्यवाक्यमेतदभाषत २९
विश्वासोयदिमेवाक्येप्रसीदतिमहेश्वरः संशयश्चेद्गुरोर्वाक्येसंशयात्माविनश्यति ३० असत्संगंपरित्यज्य

ऽपदिश्य

ज्ञानकर्मणोः ३

सदासत्संगवान्भव असतांचसतांचापि श्रृणुवक्ष्यामिलक्षणं ३१ यत्परिज्ञानमात्रेणमनिंसत्संगत्तोभवेत् देहा
लवादिनोवित्तगृहक्षेत्रेषुसस्पृहाः ३२ लौकिकव्यवहारेषुसंसक्ताःसद्विलक्षणाः एषुयेसंगतावेश्यात्शोकस्तेषां
दुरत्ययः ३३ नतेसंभाषणीयास्तेसंतोयेषामसंमताः सतांचलक्षणंतावदुच्यमानंमयाश्रृणु ३४ शिवएकजग
त्कर्त्ताशिविसर्वंप्रतिष्ठितं कर्मांधकारेभ्रमतांमार्गदर्शीसभानुमान् ३५ सएवशरणंनान्यद्दैवतंधर्मसाधनं
शिवगौरीपतिशंभोजयचंद्रकलाधर ३६ मांकालकवलंपाहिकालशासनशंकर इतियेशिवनामानिकी
र्तयंतिदृढव्रताः ३७ शिवलिंगार्चनपराभस्मरुद्राक्षधारिणः पापिनामपिमुक्तिःस्यान्नूनंतत्पादसेवया ३८ यश्च
दिष्टतमंतेषांभक्तानांपरमेश्वरे तद्दानाद्भवतिक्षिप्रंशिवानुग्रहभाजनं ३९ प्रीणातिनतथाक्षिप्रंकुर्वतांस्वप
दार्चनं भक्तोपासनयाशंभुर्यथाप्रहृष्टितितुष्यति ४० कुर्वन्लोकविरुद्धानिशिवभक्तमुदेनरः शिवप्रसादात्सं
सारशोकंतरतिदुस्तरं ४१ निषेव्यशिवभक्तांघ्रिमिश्ववस्तुसमर्पणात् ज्ञानाभ्यासप्रसादेनविनामुक्तोभविष्यसि ४२
इतिस्वगुरुणादिष्टंतंप्रणम्यतथेतिसः भाग्यवान्शिवभक्तानांपादसेवांचकारह ४३ भस्मांकितालिकंदृष्ट्वातथारु
द्राक्षधारिणं नमस्करोतिशतनशःनद्भीष्टंप्रयच्छति ४४ प्रददात्यविलंबेनदुर्लभंतदभीप्सितं भस्मानुलिप्तस
र्वांगोरुद्राक्षस्रगलंकृतः ४५ नित्यान्नदाताभक्तेभ्यस्तदुच्छिष्टाशनोभवत् पतिव्रतांतद्भार्यामत्तुरिशानुसारिणी च
अनुकूलास्यकृत्येषुगुरुवाक्येनचोदिता बांधवास्तस्यतत्कर्ममिलितानानुमेनिरे ४७ निपेतुःप्रतिषेधंचसते

षांनाश्रृणोद्वचः उच्छिष्टभोजीदासोयं वंचितो भस्मधारिभिः ४८ करोत्यनुचितान्येव ह्यौचित्यातिपुरस्कृतः इति
स्वबांधवादूतोप्यचलन्नस्वधर्मतः ४९ नकश्चित् शिवभक्तोस्ति सतेनानर्चितो हि यः इतीश भक्तदासस्य महान्का
लोभ्यवर्तत ५० सर्वब्राह्मणसात्कुर्वन् यदनेनार्जितं धनं भक्तपादजुषस्तस्य प्रसन्नोभूदुमापतिः ५१ पंचविंशतिवर्ष
स्य ब्रह्मबंधोर्विधायसः वेषंमध्यान्हसमये तद्गृहद्वारमाययौ ५२ भिक्षांदेहीत्युवाचोच्चैर्भस्मरेखांचितालिकः सासम्य
गन्नमादाय तद्भार्या निरगाद्बहिः ५३ तां विलोक्य द्विजस्तस्थौ तरुणीं धूर्तशेखरः भिक्षां गृहाणेत्युक्तोपि प्रतिज
ग्राह नैव सः ५४ तस्यास्तनौ मुखं चापि स्तब्धदृष्टिरवैक्षत तद्दृष्टिशंकिनी सा स्त्री नाथमेहीत्युवाचसा ५५ तं प्राप्य भि
क्षां गृह्णीष्वेत्युवाच स महाधनः तमुवाच महादेवः प्रहसन्नद्मनाविटः ५६ आगतो नान्नभिक्षार्थं लभ्यतेन्नं गृहे गृहे द्वि
ज स्त्यं वांछितं देहि भिक्षां मे भस्मधारिणः ५७ अथ प्रणम्य तं वेश्यो भिक्षां पप्रच्छ कामितां दीयते यदिवक्ष्यामि नोचे
द्यास्यि यथागतं ५८ स विप्रेणैवमुक्तस्तु मा विलंबोस्तु गृह्यतां इत्युक्त्वा पादयोस्तस्य सन्नतासीत्कृतांजलिः ५९ यया
चे तरुणीं भिक्षां निर्विशंको द्विजो विटः अविचार्य स भार्यां च प्रददौ तन्नरांभुधीः ६० प्रचोदिता च सा भर्त्रा द्विजं
प्रांजलिरन्वगात् बांधवास्तस्य कुपिताः ब्राह्मणं हंतुमाययुः ६१ निरोधकारिणो बंधून् खड्गपाणिर्जघान सः॥
स्वधर्मविद्विषो बंधून्निहत्य स विलोकयन् ६२ न ब्राह्मणं ददर्शाथ भार्यां पप्रच्छ विस्मितः तयान वेद्मीत्युदितः संस्मरन्
द्विशंकरं ६३ ददर्शो वृषभारूढः सहगौर्या महेश्वरः स्तूयमानः सुरगणैः सचान्यैश्च गणैर्वृतः ६४ दत्वास वैश्यदंपत्योर्मु
क्तिं मुनिगणेक्षितां पश्यतां सिद्धसंघानां स्वं धाम प्रत्यपद्यत ६५ किं कर्मणा बहुविधेन च दुष्करेण ज्ञानेन किं बहुषु जन्म

सुदुर्लभेन भक्त्या प्रसीदति परं भगवान्महेशो तद्द्विसल्य सकलं भवता शुभक्ताः ९६ इति श्रीस्कांदोपपुराणे भक्तविलासे पंचदशोऽध्यायः १५ श्रीसांबसदाशिवार्पणमस्तु श्रीअगस्त्य उ॰ ॥ शिवभक्तान्नपानीयप्रदानस्यान्वहं द्विजाः नतुल्यं सुकृतं लोके शंभोः प्रीतिकरं भवेत् १ भूषणं भूतलस्यास्ति कनिष्टघटिकापुरं ब्राह्मणैः क्षत्रियैर्वैश्यैः स्वकर्मनिरतैस्सदा २ शूद्रैरपि द्विजातीनां शुश्रूषणपरायणैः संपूर्णशिवभक्तैश्च शिवव्रतधृतादरैः ३ तत्र कश्चिदभूत्ख्यातो मारो नामपदोद्भवः शूद्राणां शिवभक्तांघ्रिसेवयेशः प्रसीदति ४ एवं गुरूपदेशेन स्थिरबुद्धिस्सजायया सहनित्यान्नदानेन शिवभक्तानपूजयत् ५ तस्य न्यायार्जितं द्रव्यमवर्धत समुद्रवत् सर्वं तद्भक्तपूजायै विनियोजयति स्म सः ६ आरभ्योदयमारात्रं प्रभातं च दिने दिने ददाति शिवभक्तानामिष्टमन्नं चतुर्विधं ७ तस्य भक्तिपरीक्षायै मतिं चक्रे महेश्वरः अपुत्रस्य सभार्यस्य भक्तानामन्नदायिनः ८ धनजातमशेषं च तस्य सर्वेश्वराज्ञया दिने दिने क्षयं प्राप कृष्णपक्षे शशांकवत् ९ मारः प्रक्षीणवित्तोपि क्षेत्रपात्रादिविक्रयात् आगताय ददावन्नं यथापूर्वमखिन्नधीः १० गृहोपकरणेष्वेवं विनष्टेषु नदानतः अवशिष्टमभूद्भार्याकंठमांगल्यसूत्रकं ११ अथ प्रावृषिकस्मिंश्चिद्दिवसे तमसावृते निशीथे तापसः कश्चित्क्षुत्तृष्णापरिपीडितः १२ अन्विष्यान्विष्य शनकैः मारस्य गृहमाययौ आगत्य तद्गृहद्वारं मायातापसरूपभाक् १३ मारमाहूय भगवानिदमाह महेश्वरः क्षुधा तृषा च संक्रांतो तपस्वी वचनाक्षमः १४ दूरेत्वामन्नदं श्रुत्वा तव

स्वगृहमागतः दृष्ट्वा महत्सु क्षुधार्ताय प्राप्ताय स नंदे निशि १५ अन्नमन्नप्रदश्चासीत्पितामाता तपस्विनोः इति तद्वाक्य
माकर्ण्य निर्गतस्सह भार्यया १६ प्रणम्य प्रांजलिः पाद्यमासनंच प्रदाय सः विषण्णहृदयो मारः भार्याननमुदैक्षत १७ इ
ति निश्वस्य चोवाच मेदं मेदं कुटुंबिनी एहि साध्वि निशीथे सौ संप्राप्तस्तापसो महान् १८ क्षुधितोन्नं प्रयच्छेति याचते द्
यते मनः नोपायमिह पश्यामि येनास्य क्षुत्प्रशाम्यति १९ वृथा जन्म ममेदं स्याद्यदि होपवसेदयं माजीवतु धनः कश्चिन्मा
दृशो दुर्लभो भुवि २० यस्य मे गृहमासाद्य सक्षुत्तिष्ठति तापसः गृहणी शरणं भर्तुरिच्छतः परमां गतिं २१ भार्यानुकूला न प्राप्ता
येन तस्य वनं गतिः अनुकूला च साध्वी च मम त्वं दयिता ननु २२ चिरं त्वदानुकूल्येन भक्तानामन्नदोस्म्यहं आपदोस्यास्त्वमे
वात्र मामुद्धर पतिव्रते २३ इति भर्तुर्वचः श्रुत्वा नाथं भार्या जगाद तं न कश्चिदत्र पश्यामि नाथोपायं गृहे तव २४
लवणानां हि सोम्यास्ति दिवसे लवशोषितं अथाप्याहं वसते यो दृष्टोपायोस्म्यहं प्रभो २५ पूर्वेद्युरुप्तं केदारे बीजजा
तमदूरतः अस्माकमस्ति मोदेन्यं भजेन हि नियुज्यतां २६ आनीयतां तदुद्धृत्य तदन्नं क्रियते मया उप्ताः पल्लविता
मुद्गाः संति तत्सदनांकणे २७ न किंचिन्न्यूनमत्रास्ति महादेवप्रसादतः इति भार्यावचः श्रुत्वा हृष्टः प्रोवाच तापसं २८ मारो
हमत्र योषान्नं स्वामिन्निह इति पच्यते दिष्ट्या निशीथे प्राप्तोसि त्वकृतार्थोस्मीति दर्शनात् २९ इति मारोक्तिमाकर्ण्य संविवेशास
तापसः मारोपि प्राप्य केदारं उप्तबीजान्यपाहरत् ३० तावदेव च सा साध्वी नवैर्मुद्गलतादलैः अवसिक्तैश्च लवणैः शाकं स्वादु
चकार ह ३१ सांकुराणि च बीजानि संभर्ज्याश्च वहूनि च संपाद्यान्नं पतिं प्राह तापसो बोध्यतामिति ३२ मारोपि यावत्सुमनाः तापसो

द्रो धनो यतः आगच्छन्न पि सुस्नातो निवेद्य गृह्यतामिति ३३ भुवं प्राप्यांतिकं तस्य दद्रशाद्भुतहर्षभाक् आरूढवृषभं देवं वरदा भयमुद्रितं ३४ वामांकरूढयागौर्या परिष्वक्तं महेश्वरं प्रणम्य बहुधा भीतः तत्प्रसादं शरणं ययौ ३५ भार्या चास्मै प्रहृष्टात्मा नैवेद्यंस मुपाहरत् ववर्षुः पुष्पवर्षाणि देवाश्च मुनयोस्तुवन् ३६ अवादयन् गणाः सर्वे वाद्यानि विविधान्यपि अथ प्रसन्नो भगवानेविका पतिरीश्वरः ३७ दत्वा कैवल्यमनयोः सह ताभ्यां तिरोदधे इति श्री स्कांदोपपुराणे भक्तविलासे षोडशोध्यायः १६ श्री वृषभध्वजा यनमः श्री अगस्त्यः शिवभावनया भक्तान् पूजयंतोपि नित्यशः अपराधान् सहंते ये भस्मरुद्राक्षधारिणां १ प्राप्तेपि प्राणसंदे हे शिवप्रीतिमभीप्सवः शिवप्रसादपात्रं ते ह्यप्रतिद्रोहकारिणः २ स्वयं कृतापकारोपि भक्तैस्तान् पूजयंति ये प्रीणाति शो यथा तेषां न तथा यज्ञकोटिभिः ३ अत्रेतिहासं प्रथितमाकर्णयत भूसुराः यस्य श्रवणमात्रेण भक्तिः शंभो भवेद्दृढा ४ ५ चेदिदेशे पुरं किंचिदस्ति गोपेश्वधिष्ठितं सत्यार्थो नाम राजाभूत्त्रिषु लोकेषु विश्रुतः स एकः शिवभक्तानां नित्यमिष्टं प्र यच्छति याचितः शिवभक्तानां स प्राणांश्च प्रयच्छति ६ समंडलपतिर्दृष्ट्वा दूरे भक्तान्नमस्यति निरोधः शिवभक्तेषु ना स्ति नृद्वारि कस्यचित् ७ तस्यैवं वर्तमानस्य मुक्तिनाथो महीपतिः प्रातिवेश्यो भवच्छत्रुः तेनास्य चरणो भवत् ८ तं विनिर्जित्य समरे सत्यार्थो रिपुमोजसा बलं धनं पुरं चास्य सर्वं जग्राह पार्थिवः ९ मुक्तिनाथः स तेनैव निरस्तो दुर्बलो रणे दुद्राव सक्त सर्वस्वः क्वचिल्लीनो वनांतरे १० समयं गमयामास शत्रोश्छिद्रं विलोकयन् चिरायोपायमासाद्य निश्चित्यैवमिति स्वयं ११ तापसाकारमापन्नो भूतिरुद्राक्षपुस्तकः सत्यार्थसदनद्वारं ययौ भस्मानुलेपनः १२ तदा शेते स्म नृपतिः शारिवेदया स निद्रया छन्नतापसवेषेण रिपुं चांतर्निरैक्षत १३ निद्राणे नृपतौ कार्यं किं तवांतर्बहिर्भव द्वास्थैरिति निरुद्धोपि तान

सत्यार्थस्य राज्ञः ५

सत्यार्थः २

नादत्स्ततापसः १४ रहस्यागमनत्वार्थमुपदेष्टुंमहीपतेः गच्छामीतिहगत्वाशय्यागृहमरिर्ययौ १५ आगतंपुस्तकधरंसमुन्न
तजटाधरं समीक्ष्यतापसंराज्ञी भर्त्तारंसमबोधयत् १६ सचप्रबुध्यःसत्यार्थः छन्नवेषेणवैरिणं अज्ञानात्प्रणमं
पादेमहातापसशंकया १७ उवाचप्रांजलिश्चैव उपविश्योत्तमासने धन्योस्म्यनुगृहीतोस्मित्वत्पादांबुजदर्शनात् १८
परिपूतमिदंवेश्म गुरूणांपादरेणुभिः भवतांसेवयाचित्तमिदमद्यप्रसीदति १९ किंकरोस्मिविधेयंकिंनियुंक्ष्वानुगृहा
णमां धनादिष्वपिमेस्वामिन्प्रभुताह्निनकेवलं २० प्राणेष्वपिमदीयेषुत्वदीयास्तत्यमीर्यते इतिब्रुवाणेनृपतौगृहीतविन
यांजलौ २१ जगादतापसच्छन्नः स्मयमानमुखोथतं शृणुराजेंद्रमेवाक्यंभक्तानांप्रवरोह्यसि २२ शिवतत्वरहस्यार्थन
हंबोधयितुंनव प्राप्तोहंत्वांत्वमेवैकः शृणुसत्यार्थपार्थिव २३ इदंचशास्त्रंकैलासेगौर्याईशेनवर्णितं इत्याकर्ण्यनृपःपत्नींब
द्वारस्थे हिर्गच्छेत्यभाषत २४ तस्यांबहिर्गतायांचकपाटेनावृणोन्मुखं भस्मदत्वांगतस्तत्रमौलंनमेत्याहतापसः २५ तथेत्युक्त्वाथतंपा
देप्रणमंतंमहीपतिं निगूढेनासिनाक्रोडेजघानसतुमर्मणि २६ खड्गप्रहाराभिहतोमुमोहधरणीपतिः आहतोस्मीतिचुक्रोश
द्वास्थःक्रुद्धोभ्यगाद्द्रुतं २७ भित्वाकपाटंवेगेनगृहीत्वातापसं करे हंतुंतेनैवखड्गेनजटासुचपरामृशत् २८ क्षणादुन्मी
ल्यसत्यार्थोतदाद्वास्थंसमाह्वयत् त्रापितोसिममप्राणैःमोचयारिमितीरयन् २९ संघीभूताश्चबहवःतत्रक्रुद्धाश्चतद्भटाः
संहर्त्तुमभवन्राज्ञा निरुध्यारुषिताअपि ३० राजासौदृष्टप्रहारंतंमाभैषीरित्यभाषत वेषाच्छन्नंवेपमानं श्रुत्वाकेचिन्नृपा
ज्ञया ३१ विषयांतंनयंतिस्मनाभ्यहिंसंकृतागसं उपेक्षसेकथंशत्रुमितिपृष्टःसुहृज्जनैः ३२ कृतापराधोपिममत्रानुर्भ ३०
न

स्मां कितालिकः सशंभुरेवमेस्वामी नैषवे रीत्यभाषत ३३ क्षेमंतपस्विनस्तस्यश्रुत्वादूतमुखान्नृपः बद्धमेनेनि
जभटान् अथाश्रमपरिपालकान् ३४ दध्यौनटेशंमनसा सत्यार्थःपार्थिवोत्तमः संनिधायमहेशोपिददौमु
क्तिंमहीपतेः ३५ भक्तेर्हतोपिपरुषोक्तिभिरर्दितोपिसंप्रापितोप्यसुखसंशयमिंदुमौलेः यःप्रीतयेहितममीषु
तनोतितस्मैप्रीतःप्रयच्छतिहरोनपुनर्भवार्तिं ३६ इतिश्रीस्कांदोपपुराणेभक्तविलासेसप्तदशोध्यायः १७
श्रीकाशीनाथकीजय श्रीअगस्त्यउ॰ सदाशिवपदांभोजे भक्तिःपरमपावनी पूर्वजन्मार्जितैःपुण्यैर्धन्या
नामिहलभ्यते १ यएषदेहीतरतिदुस्तरंभवसागरं उच्छिन्नभवसंक्लेशो व्याघ्रःपंजरबंधनं २ शिवभक्ति
र्यथामुक्तेर्मुख्यंभवतिसाधनं शिवभक्तांघ्रिभक्तिश्च तथामोक्षैकसाधनं ३ सपर्यांभक्तरूपेण साक्षा
द्गृह्णातिशंकरः परोक्षएवगृह्णाति लिंगादिषुसमर्चितः ४ प्रत्यक्षेश्वररूपाणां भक्तानांपादसेवनं ततए
वप्रशंसंतिनपरोक्षेशसेवनं ५ येषांसंदर्शनात्संगात्सत्पादसेवनात् शोचतामिहसंसारे सद्यःशोकोवि
लीयते ६ विनायत्नेनतपसा विनावेदांतचिंतया मुक्ताःसहस्रंलोकेस्मिन् भक्तपादाब्जसेवया ७ अत्रैवोदा
हरंतीममितिहासंपुरातनं वीरमिंदस्यभक्तस्य भक्तिर्यत्रोपवर्ण्यते ८ अस्तिकेरलभूभागे पुरंशोणाचलाह्वयं ९
तत्राभूद्वीरमिंदाख्यःचतुर्थान्वयजन्मभाक् ९ आसीदाबाल्यमेतस्य भक्तिर्भक्तेषुभूयसी नतथाभक्तिरभवन्म
हतीपरमेश्वरे १० तस्यैवंवर्तमानस्य मतिरासीन्मनोहरा बिभ्रतःपरशुंतीक्ष्णंशिक्षायैभक्तविद्विषो ११ यःशिवे
शिवभक्तेच सापराधोनरःक्वचित् हन्यमानेनतंपापंप्राणांस्त्यक्ष्याम्यथान्यथा १२ इतितीक्ष्णःसपरशुर्दधारस

प्रालेषु ३

तमुत्तमं महापथे त्वहं तिष्ठन् भक्तानागच्छतः पथि १३ पूजयित्वा शिवधिया प्रापं तेषामनुग्रहं एवं निवसतस्तस्य वीरमिंदस्य चेतसि १४ काचिद्बुद्धिरभूद्भूमौ ये भक्ताः श्रीवृषेश्वरे विख्यातेषु शिवस्थानेष्वासते ते कथं मया १५ न सेव्यंते वृथा जन्म मयाऽतेषामदर्शनात् प्रदक्षिणीकृत्य भुवं चरित्वा तत्र तत्र च १६ स्थाने निषेव्य गौरीशं तद्भक्तानां च सेवया कृतार्थयामि जन्मेतत् संगत्यामानुषं सतां १७ इति प्रतस्थे विषयान् भार्गवेण विनिर्मितान् अती त्य सरितो मार्गे शैलान् देशान्वनानि च १८ वीरमिंदो ययौ क्षेत्रं विख्यातं भुवनत्रये तद्यत्र देहं त्यजतामीश्वरस्तारकप्रदः सेवमानोन्वहं तत्र विश्वस्याधिपतिं प्रभुं तत्रत्यानपि तद्भक्तानैनयद्वत्सरत्रयं २० ततो निर्गत्य शनकैरवापकमलालयं २ तत्र दिव्य महातीर्थे स्नात्वा त्यागेश्वरं विभुं २१ रत्नसिंहासनारूढं सिषेवे हृष्टमानसः अथालयांतस्तद्भक्तान् जितकामान् जितक्रुधः २२ भस्मावकुंठिततनून् रुद्राक्षस्त्रग्विभूषणान् पंचाक्षरीजपपरान् शतरुद्रीयजापिनः २३ शिवदीक्षा समायुक्तान् शिवव्रतपरायणान् श्रोतॄ[illegible]न् शिवपुराणानां शिवलिंगार्चनेरतान् २४ दृष्ट्वा द्वादशसाहस्रसंख्यातान् ब्राह्मणोत्तमान् भक्त्या रोमांचिततनुः प्रणनाम पुरस्सतां २५ इदं विज्ञापयामास वीरमिंदः कृतांजलिः शुश्रूषां कर्तुकामोस्मि भवतामहमन्वहं २६ शिवभक्तद्रुहामस्मि निग्रहे बलवत्तमः अनुजानीत मां सर्वे दासं वः शरणं गतं २७ तथेत्यंगीकृते स्तैस्तान् सिषेवे त्यागराजवत् ईशभावनया भक्तान् भजमानस्य भूसुरान् २८ अथ गुर्वीरमिंदस्य समाहूद्यानलूपुरे कृतेषु शिवभक्तानां कैंकर्ये पारमेश्वरे २९ तं मिलित्वा विनेनुस्ते शिवकार्यधुरंधरं

एतस्मिन्नंतरे प्रातः कदाचनससुंदरः ३० अपरित्यक्ततांबूलकपोलो धूर्त्तलक्षणः वेश्यांगरागसंसक्तसूक्ष्मवस्त्रावकुं
ठितः ३१ अतीत्यगोपुरद्वारं विवेशालयमंडपे स्थितान्नुमिलितास्सबहून्सेवमानान्महेश्वरं ३२ अवमत्यानवेक्ष्यैना
न्वीरमिंदेपिपश्यति गंतुमंतर्गृहं शंभोरियेषसमहाकविः ३३ वीरमिंदः सुसंक्रुधः तं हंतुंपरशुंदधौ आत
तायिनमायांतं तं दृष्ट्वासुंदरोभिया ३४ प्रविश्यांतर्गृहे शंभोर्द्वारे ढौचुकेरंमुखे सखायंशरणंप्राप्सुंदरस्त्यागनाय
कं ३५ स्थितोगर्भगृहद्वारे वीरमिंदोजगादतं निर्याहिव्रस्सवं धीलोंनिहन्म्यद्यहरस्रुहं ३६ विद्यामदावलिसो
सिमहाद्रोहैकसाधनं तं तु धारिणियद्यत्रलप्स्ययापिमहेश्वरः ३७ विद्यातियदिप्रीतिं सवाह्यःक्रियतेमया इत्या
कर्ण्यवचस्तस्य संत्रस्तः सचसुंदरः ३८ आपदुद्धारणोपायं अंतः प्रच्छन्नशंकरं स्तुहि भक्तानितीशस्य नियोगेनमहा
कविः ३९ भूयिष्ठभक्तिस्तान्भक्तान्तुष्टवपरयागिरा श्रीसुंदरः संसारसंक्लेशमहांधकारविध्वंसिनोंघ्रिदिव
साधिनाथान् श्रीकंठभक्तांघ्रिसरोजरेणून्विधायमौलौविपदंतरामि ४१ श्रीअगस्त्यः सुंदरेणस्तुता
सर्वेभक्ताः संभूयतेमुदा वीरमिंदं निवार्याथ वृणुतेसुंदराभयं ४२ वीरमिंदेन सख्यंच सुंदरस्ययया चिरे तथेतिशि
वभक्तानां वचनं सचकारह ४३ यदुक्तं शिवभक्तैस्तन्नने त्याहकदाचन त्यागेश्वरस्तस्यतथावृतेन संतुष्टचित्तस्तुषि

सागेश्वरं ४

सर्गान् २

भ॰ वि
३२

सद१

तःपुरस्तात् वृषेंद्रमारुह्य नंदीमया विभूलाददौमुक्तिममुष्य धीराः ४४ इतिश्रीस्कांदोपपुराणे भक्तविलासे अष्टादशोध्या
यः १८ श्रीउमापतिविश्वनाथायनमः श्रीअगस्त्यः पुराणसरिदाख्याता नगरी लोकविश्रुता तत्रास्त्यमरनीत्याख्यो
ब्राह्मणः शिवभक्तिमान् १ सभूत्तमपुरे शंभोः स्थाने प्रीतिकरे स्वयं निर्माय धर्मशालांच विदधे धर्ममुत्तमं २
अन्वहं शिवभक्तानामन्नं क्षीराज्यपूरितं अभ्यंगवस्त्रममलं कौपीनं ब्रह्मचारिणां ३ यतीनामुचिताः कंथाः सदनानि
कुटुंबिनां ददाति शिवभक्तेभ्यो यदभीष्टं क्षणेनतत् ४ एवं निवसतस्तस्य द्वात्रिंशद्वत्सरायुः विधातुका
मस्तद्भक्तिपरीक्षां परमेश्वरः ५ प्रथमाश्रमिणो वेषं गृहीत्वा नटद्धृदयो कपर्दस्तस्य शिखा जज्ञे ललाटाग्राव
लंबिनी ६ भस्मरेखा भवच्चांद्री कैलासाद्भस्मनावटोः भस्मबिंदुरभूत्फाले तार्तीयकं विलोचनं ७ य
ज्ञोपवीतमस्यासीत् प्रवाहः सोरसैं धवः आषाढदंडो जगवं धनुरस्य करे भवत् ८ करभूषणनागोभूत्पवित्रं दक्षिणे
करे कृष्णाजिनमभूच्चर्म वैयाघ्रं मौंजिवंधनं ९ आसीद्वासुकिरेतस्य दीर्घभोगः फणीश्वरः यदाव्रतमिदं चास्य
मायाकौपीनतां दधौ १० भिक्षापात्रमभूद्ब्रह्मकपालं सर्वःमाहितं समंदहासद्युतिभिर्दिगंतानुद्भासयन्निंदु
रिवस्वभाभिः गृणन्नधीतानपि वेदमंत्रान् जगाम वेश्मामरनीतिनाम्नः १२ सततदामरनीतिस्तं प्रज्वलद्ब्रह्मवर्चसं

३२

मायावपुरिवप्रांचंमहाबलमदापहं १३ हर्षितस्तेजसानस्यप्रत्युत्थायकृतांजलिः स्वागतंतेवटोतावदास्यतामि
हसांप्रतं १४ त्वद्दर्शनात्कृतार्थोस्मिप्रीतिःपशुपतेर्मम आतिथ्यंकर्त्तुकामोस्मिदययादृष्ट्याविलोकय
सएवंवटुमभ्यर्च्यप्रार्थयामासभक्तिमान् मायावटुश्चतंप्राहस्मयमानमुखांबुजः १६ त्वमेवामरनीतिःकिंश्रु
तवानस्मितेशैव्ये शिवभक्तार्चनायैवत्वदर्जितमहोधनं १७ भैक्षान्नभोजनंयुक्तमधीयानस्यमेवटोः नाहं
गृहस्थस्यैकस्यकरोम्यन्नेनभोजनं १८ दीयतामागतेभ्योन्नंभक्तेभ्योस्म्यर्चितोमुना नैकत्रभुक्तिर्विहि
क तायथेष्टंब्रह्मचारिणः १९ स्थीयतिलद्गृहेतावद्यावद्वृष्टिःप्रशाम्यति मध्यान्हसमयोस्तेतिवृष्टिश्चेयंप्र
वर्त्तते २० इतितद्वाक्यमाकर्ण्यसभक्तस्तस्यपादयोः प्रणम्यप्रार्थयामासभुज्यतामितितंपुनः २१ वटुश्चा
नुमतिंदत्वास्नात्वाहंविहितान्हिकः आगच्छामिभवद्गेहंकौपीनंगृह्यतामिदं २२ इदंसंरक्षणीयंमेमास्तुवर्षा
भसोक्षितं इत्युक्त्वाप्रददौतस्यहस्तेजग्राहसोपितत् २३ आषाढपाणिश्चवटुर्जगामस्नातुमापगां ग
पत्रिं ४ हिणीत्वरयामासत्वंहरश्चार्च्यतामिति २४ पालाशदंडादवमुच्यतद्वुतंसतत्लतादान्निगृहांतरस्थे निबध्य
पूजांविदधेपुरारेः शिवार्चनांतेवटुराजगाम २५ आपादकेशाग्रमसौतदानीमासारधाराजलसिक्तगात्रं उ
त्कंपरोमांचजुषंददर्शवटुंधृतस्वस्तिकमागतंच २६ शीतिकाबाधतेतावत्कौपीनंतत्प्रदीयतां इत्युक्तोमरनी
तिश्चतथेत्यंतर्गृहंगतः २७ यत्रतन्निहितंतत्रनसपश्यतिविस्मितः बहुधान्वीक्षमाणंचनददर्शतिरोहितं २८

स्वस्तिकपाणिः वा
रिल्पाणिः ५
कौपीनं ५
आसारसंपात ३

२८ अथागत्य बटुं प्राह गृह्यतामन्यदुत्तमं रज्जुबंधेन पश्यामि नापि कश्चिदिहागतः २९ विस्मयो मे महानत्र मा
येव प्रतिभाति मे अथ क्रुद्धो बटुः प्राह नान्यद्गृह्णामि किंचन ३० तदेवामरनीति मे देह्यज्ञानादिहागमं अस्पर्श
मन्यत् कौपीनं मादृशा ब्रह्मचारिणा ३१ नेहानयसि तद्यावत्तावन्मे नास्ति भोजनं नाहंकारेण वच्मीदं श्रूयतां
कौपीनस्य
तस्य चागमः ३२ वामदेवोपदिष्टेन मंत्रेण महता पुरा अच्छोदनसरसि प्रभो रूपरि भूभृतां ३३ आह्लादशारद
हिमवतः ४
मंभस्थो देवीं त्रिभुवनेश्वरीं अस्तोषं बसौ चेदेविसा प्रसन्ना भवन्मम ३४ तया च करुणापांगतरंगैरनुकंपितः॥
उक्तः शारदया देव्या जनन्या जगतामहं ३५ उत्तिष्ठ विरमांया हि सर्वविद्याः स्फुरंतु ते प्रीतास्मि गृहाणेदं दुर्लभं
योगिनामपि ३६ इत्युक्त्वा कोशाद्युस्यानि कौपीनमिदमुत्तमं ददौ महादयासिंधुर्वाग्देवी वरदा मम ३७ तदहं च
द्विधाकृत्य प्रतिसंध्यं धरामि च निर्णयस्सर्वविद्यासु जातो मेतस्य धारणात् ३८ तच्चेद्विनाशितं नूनं मद्दिधेश्व
र्यभूर्भव वं च कः साधुवेषेण मादृशां चरसि क्षितौ ३९ किं करोमि क्व गच्छामि वाणी कोपं करिष्यति विज्ञातो
दि ४
राजराजेन न त्वां मुंचामि सांप्रतं ४० न प्रदास्यसि चेत् क्षिप्रं भवद्देहमलं मलकं बटूक्तिभीतोऽमरनीतिरन्यतूप
कौपीनं ४
दृष्टं बरं किंचिदनर्घमस्ति ४१ स्पृष्टं न चान्येन ददामि तत्ते गृहाण तुल्यं करुणां विधेहि इत्युक्त्वा न्यपतत्पादे भी
तस्तदुपवासतः ४२ स च न प्रतिजग्राह परुषोक्तिपरो बटुः मिलिताश्च जनास्सर्वे बटोर्गर्वं प्रभाषिरे ४३ जहसु
श्चापरे तत्र पप्रच्छुः को भवानिति बटुः प्राह स्म तैः पृष्टः शिवनाम समुच्चरन् ४४ न मे मातास्ति न पिता न बंधुर्नापि
३३

कौपीनं २

सोदरः नवेशमब्रह्मचार्यस्मि भिक्षार्थमर नीतिना ४५ हृतोस्मि सकलं नष्टं तपोमितस्य नाशितः नोपायमन्यं पश्यामि सीदत्तीवमनोमम ४६ भूयादमरनीतिने पुण्यमायुश्चवर्धतां परिहासेरलं देहि मदीयमलमल्लकं ४७ तन्तु ल्यमन्यद्दातास्मी त्युक्तः प्राह पुनर्वटुः यदिसत्यमिदं वाक्यं प्रतिज्ञां जनसन्निधौ ४८ विधेहि तथ्यं चेत्स्यात्तद्गृह्मीत्यभ्यभाषत जनाश्च युक्तमित्यूचुः ब्रह्मचारी तदावदत् ४९ तुलितं देहि कौपीनं यत्नेन समं भवेत् घटाचा नीयतां तूर्णं जनाः पश्यंतु साक्षिणः ५० इत्याज्ञया घटां तत्र सभक्तस्तूर्णमानयत् वटुर्दिगंबरीभूत्वा निदधे स्वा लमल्लकं ५१ एकत्र भक्तः संतुष्टो नूतनं निदधेन्यतः ननदासीत्समं तत्र न्यधत्तान्यत्पुनश्च सः ५२ तदाप्यासी द्समं शमन्यदन्यत्तथापरं वासः पट्टांशुकत्रातं सर्वं लघुतदा भवत् ५३ जनाश्च विस्मिताः सर्वे भक्तः सोपि विस्मये प्रदक्षिणीकृत्य वटुं प्रणम्य तदारुरोहान्वित पुत्रदारः ५४ घटां तदास्तां सदृशे धटेट्टे दिवो ववर्षुः कुसुमा निदेवाः प्रसन्नो वृषभारूढस्तदाभूत्वा वटुर्हरः तस्मै प्रदायकैवल्यं कैलासशिखरं ययौ ५५ इति श्रीस्कांदे पपुराणे भक्तविलासेनामएकोनविंशोध्यायः १९ श्रीगिरिजापतयेनमः श्रीअगस्त्यः रक्षायेशिवभक्तानां स जंति प्राणमात्मनः एते शिवप्रसादेन मुक्तास्युः कर्मबंधनैः १ अत्र वक्ष्ये कथां पुण्यां श्रवणात्पापहारिणीं त्यज तस्तूल वत्प्राणान् दारकस्य महात्मनः २ अस्ति श्रीगोस्थलं नाम क्षेत्रं भुविपुरद्विषः तत्र देवं महेशानं दारकः सेवते न्वहं ३ शिवाय शिव भक्तेभ्यो वायिद्रह्यंति भूतले संहारार्थमसौ तेषां दधार परशुं करे ४ तत्रास्ति ब्राह्मणः क

अमरनितिः

कश्चिद्दुष्टः

श्चिच्छिवधर्माह्वयःपुरे आजन्मनोव्रतंतस्यस्वहस्तापचितैःशुभैः ५ कुसुमैरर्चनंनित्यंनतस्याभ्यजनव्रतं।
त्रिकालमर्चयानस्यमहांतंदेवमीश्वरं ६ पुष्पाहरणलक्ष्येणसमयस्सुमहानभूत् अनपायनयोनामतत्रराजाम
हायशाः ७ पुरंदरसमोवीर्येबभूवचतुरंगवान् सोपिभक्तेषुमहतीप्रीतिंवहतिशंकरे ८ शिवद्रोहिणमालोक्यस
द्यःशिक्षांकरोतिच नित्यार्चनपरोभूत्वाभक्तानामुत्तमोभवत् ९ तस्यसेनागजःकश्चिन्महीधरइवोन्नतः बभूव
मत्तोदानेनयस्य जंबालितंपुरं १० दानगंधंसमाघ्रायद्रवंतिस्मापरेगजाः युगमानोचतदंतौपृथुलौगिरिभेदिनौ ११
दूरेदृष्ट्वाजनाःसर्वेप्रीत्याधावंतिचान्वहं आधोरणाश्चतंपश्चाद्दनेनन्मदसूचकाः १२ संचरंतिमहारावास्तीक्ष्ण
कुंतधराःकरे राजाज्ञयाद्विवीरान्रक्षंतिनगरंभटाः १३ कदाचिद्दारकस्नातुंमध्याह्नेवापिकांययौ दूरंनिरु
ध्येचान्यत्रमार्गःपार्श्वेन्यलीयत १४ सपुष्पपेटिकांबिभ्रद्द्विपंदृष्ट्वातिकागतं उच्चैस्स्वरेणचुक्रोशपाहिशंकरमा
मिति १५ मंद्रस्तनितगंभीरंकुर्वन्बृंहितमुच्चकैः वेगात्करेणुरागत्यतत्पुष्पपुटिकांहठात् १६ अकृष्यशत
धाचक्रेपुष्पौघश्चव्यशीर्यत विशीर्णेषुप्रसूनेषुशिवधर्मःसखिन्नधीः १७ आधोरणानुवाचेदंयुष्माभिः
किंदुरात्मभिः करेणुःप्रेरितोदुष्टःशिवार्चनविरोधकृत् १८ किंकरोमिकगच्छामिशरणंमेनकश्चन नयुष्मा
भिःकृतमिदंकृतंराज्ञाशिवद्रुहा १९ विलापध्वनिमित्यस्यशुश्रुवेबहुदूरतः तंश्रुत्वादारकस्तूर्णमागतःप्रा

जामितं ५
मार्गे ६
शिवधर्मा ५
प्य
३५

शिवधर्मागं १ हभूसुरं २० महासंकेनपुष्पाणि शिवपूजापरस्यते विनाशितानितंब्रूहि पश्याद्यममविक्रमं २१ शिवधर्मोव
दन्वेष्टांदुष्टस्यद्विरदस्यतां तदाकर्ण्य करीकर्णे कृत्वा शिव शिवेतिच २२ तदाजज्वाल कोपेन हुताग्निरिवचक्षणा
त् प्राणत्यागेगतत्रासः सोनुयाय्यवदागजं २३ निहंतेस्मपदे तस्यचुक्रोधच निवृत्यसः गृण्हातिशुंडयायाव
त्तावदागत्यतत्पुरः २४ जघानदंतयोर्मध्येनिशितेनायुधेनसः गतासुःतत्प्रहारेणसपपातमहागजः २५
वारणस्कंधमारूढान् जिघांसूनाततायिनः दारकोनिजघानत्रीन् द्वौचतस्यानुयायिनौ २६ द्विरदानुचरास्स
र्वे भीत्यागतान्नृपांतिकं साहसंदारकस्यैतद्विस्मापकमबोधयन् २७ सराजातूर्णमागत्य निहतं वीक्ष्यचद्विपं
हतंकुवलयापीडं हरिणेवभटानपि २८ दारकंशिवधर्मंचकुत्समापायदुःखितं निवार्यसोघमान्योधान् प्रणम्यप्रहृतांज
लिः २९ मदीयैर्विहितंकर्म मयैवविहितंध्रुवं सापराधोस्म्यहमितिदेवे भक्तेचशंकरे ३० प्रायश्चित्तंनपश्यामि द्रोहस्या
स्यमतेर्विना तस्मात्परशुनानेन भिंधिमामपिदारक ३१ परिपूतोभविष्यामि शिक्षितोभवताप्यहं इतिवा
राजा
चंसमाकर्ण्य दयालोदारकेसति ३२ तस्यहस्तात्सपरशुं जग्राह मरणोत्सुकः स्वयमेवगलच्छेदे प्रवृत्तं वीक्ष्यभूपतिं अनपायनृपं ५
राजानं ४ निरुध्यचमहाभक्तोदारकःखिन्नधीरभूत् अनपायनयं शंभोःमहांतंधर्मचक्षुषं ३४ इमंभक्तमविज्ञायह्येतदीयाइमे
राज्ञोवाच ३ हताः मयागिरीशभक्तानांयेनद्रव्यंविलुप्यते ३५ निष्कृतिस्तस्यमरणं नान्यथाक्वापिनिष्कृतिः छिन्नकंठोभविष्या
मित्वयंपरशुनामुना ३६ अहंद्रोहस्यहंद्रोहि मुमूर्षुःप्रागहंलिति यदालंबितशस्त्रोतो तदाभूदशरीरवाक् ३७
अनपायनयंप्रीतस्तवाहमधुनान्नृप यस्त्वसाम्राज्यमुत्सृज्य भक्तद्रोहान्मुमुर्षसि ३८ तवास्मिदारकप्रीतेः

परस्परं २ राजादारकौ २

कृतंकर्मसुदुष्करं परशुंत्यजभावेनपूजयायप्रभृत्यसि ३९ मुक्तश्च निहतास्सर्वेसमुत्तिष्ठंतुसांप्रतं इत्युक्तासह
सोत्तस्थौगजःपंचभटाअपि ४० सर्वेविविस्मयंजग्मुःपुष्पवृष्टिरभूद्दिवि दारकंशिवधर्मंचप्रणम्यसमहीपतिः ४१ स
रव्यंताभ्यामियायाथगजारूढोगृहंययौ दारकस्त्यक्तपरशुर्मनसैवमहेश्वरं ४२ तत्रस्थपूजयामासतदारभ्यसमा
त्रयं ततःशिवप्रसादेनदुर्लभेनचदेहिनां ४३ साक्षात्कारादवाप्तेनकैलासपदमाप्तवान् ४४ इतिश्रीस्कंदोपपुरा
णेभक्तविलासेविंशोध्यायः २० श्रीविश्वनाथार्पणमस्तु श्रीअगस्त्यउ॰ अन्यथाभावयन्पश्चाद्दृष्टाशत्रोचलक्षणं शत्रुभावमवाप्स्य ५
येनद्विषंतिशैवानांतेषांशंभुःप्रसीदति १ शिवभक्तेषुयःपूजांविदधातिशिवेयथा तस्यनश्यंतिपापानिवर्धंतेपुण्यराश
यः २ शिवभक्तावमानेनशिवद्रोहीभवेन्नरः शिवभक्तप्रसादेनशिवानुग्रहभाग्भवेत् ३ लक्षणंशिवभक्तानांभ
स्मरुद्राक्षधारणं शतरुद्रीयपंचार्णजपादिचविशेषतः ४ भस्मधारणमेवाहुःपरमंभक्तलक्षणं ब्राह्मणस्यकुलीनस्य
वेदाध्ययनवद्भवेत् ५ अग्निहोत्रोद्भवंभस्मयस्यफालेधृतंभवेत् तस्यैवेक्षतोराजादर्शनाद्दूरतोव्रजेत् ६ धृतंभ
स्मचयत्किंचिद्यंचाक्षर्यभिमंत्रितं पंचपातकसंघाततूलदावानलोभवेत् ७ भूतप्रेतपिशाचाहिवृश्चिकादिविषापहं
आयुरारोग्यसौभाग्यभोगभाग्यसमृद्धिदं ८ भस्मैवकेवलंभुक्तंपुनर्भवविनाशनं पंचाक्षरविधानेनधृतंतन्मोक्ष
दंभवेत् ९ धृतभस्मानमालोक्यभक्त्याप्रणमतीहयः प्रसन्नस्तस्यजन्मार्तिंशिवएवनिरस्यति १० ऋषयउ॰ भस्म
धारणमात्रेणप्रसीदतिकथंशिवः महामोहजुषामेतत्कुंभयोनेवदस्वनः ११ श्रीअगस्त्यउ॰ अत्रैवोदाहृतंपूर्वैः
चरितंब्रह्मवादिभिः भक्तस्यैनादिनाथस्यशृणुतश्रद्धयाद्विजाः १२ दक्षिणापथदेशेस्तिनगरंशावराह्वयं ११ ३५

कंठनीये बिलौ चूर्णी शुद्ध कं भीवजर्जनी॥ पंचसूत्रा हस्य स्पत्ताभिः स्वर्गं न गच्छति ५

सिंहेन ५

अ॰ २-९

कश्चिदेनादिनाथाख्यस्तत्राभून्भक्तिमान्हरे १३ सह्यर्चयत्यभेदेन शिवभक्तान् शिवं यथा धृतरुद्राक्षभस्मानः स्वस्य प्राणद्रु
होपि ये १४ दृष्ट्वा तान् प्रणमत्येषः तदिष्टं च प्रयच्छति तस्यैवं वर्त्तमानस्य दाक्ष्यं सर्वकलास्वपि १५ निरंकुशं विशिष्यासीच्छस्त्रेश
स्त्रे महौजसः सर्वायुधविशेषाणां प्रयोगपरिमोक्षयोः १६ यथाभूदस्य सामर्थ्यं न तथान्यस्य कस्यचित् येतत्र नगरे योधा देशांतरग
ताश्च ये १७ शूरा विख्यातिमंतश्च तेषामासीदयं गुरुः अभूदन्योतिशूराख्यो तस्य ज्ञातेयवानिह १८ वीरमानी सकेषां च आचार्य इ
तिसंमतः स्पर्धते न्वहमेतेन गोमायुर्हरिणा यथा १९ नमत्समोयमेनादिरित्यघोषयदन्यतः चलरेके दनंतस्य श्रुत्वापि
सनकुप्यति २० गर्जितं प्रति भेकस्य न हि क्रुध्यति वारिदः शिष्याः कदाचिदेतस्य तस्यास्य र्धासहा न्वहं २१ समरा
योधमं चक्रुस्तान्क्षांत्यासन्निन्यवारयत् असमर्थतयायो धुममुष्येतन्निवारणं २२ पुनरुक्तोपि चस्पर्धामि
५ तिशूरश्चकारह चक्षमेतदपि श्रीमान्महात्मा शिवभक्तिमान् २३ अतिशूरो दिनेक्कापि मुहुः प्रोत्साहितः खलैः
आगत्यैनादिनाथस्य गृहद्वारं जनैर्वृतः २४ प्राहयुँष्व शूरश्चेन्मयासार्धं न चेन्मम त्यक्त्वायुधं पदे कृत्वा प्र
र्णमस्वेच्छया वस २५ इति तस्योक्तिमाकर्ण्य कर्णयोः परुषाक्षरां हसन्नेनादिनाथोपि प्रत्युवाच भयाग्रणीः
२६ गृहाण शस्त्रं निर्याहि बहिर्याबो रणांगणं अथैवमुक्ते सर्वेपि श्वः प्रभाते स्तु संयुगं २७ नेदानीमिति मध्य
स्थाः प्रतिषेधं व्यतन्वत अथापरेद्युरुषसि बद्धकक्षौ गतावुभौ २८ रणांगणं विविशतुः शिष्यैः सह धृता
युधैः पौराः सर्वे च ददृशुः साक्षिणः संयुगं तयोः २९ प्रणादिनेषु तूर्येषु सिंहनादे दिविस्पृशि पश्यत्सु वी

एनादिनाथेन ५

९१

२८

ध्य

एनादिनाथातिशूरौ २

अतिशूरः २

रवर्येषु रणकक्षां बबंधतुः ३० चरंतौ विविधैर्मार्गैः हेतिभिः परिभूषितौ दर्शयामासतुः शिक्षां नानाशस्त्र
प्रयोगतः ३१ परिश्रांतोतिशूरोभूत्प्रस्विन्नो दितयो वने चर्मखड्गं च बिभ्रंतं जग्राहेभं यथा हरिः ३२ निजया

एनादिनाथः २

नग्रहीलातं दययातं भटोत्तमं तेमुवाचातिशूरस्त्वा श्वोजेतास्म्यधुनात्यज ३३ तथेति तं हतप्रायं तत्याजैना
दिनायकः अतिशूरो गृहे प्राप्य चिंताक्रांतो बभूवह ३४ उदेष्यति रविर्युद्धं भविष्यति च तत्र मां विजित्यै
नादिनाथोपि कीर्तिं प्राप्स्यति शाश्वतीं ३५ वृथा प्रोत्साहितो मूर्खैः स्पर्धालुरधुनास्म्यहं प्रबलस्या
पराधेन प्राप्तोहं प्राणसंशयः ३६ येनादिनाथं समरे संपश्यामि धृतायुधं क्रुध्यंतमिव मत्तेभमनुके
सरिणं वने ३७ प्रातः कथं निरीक्षेहं सईभस्फुरिताधरं मुखमेनादिनाथस्य शार्दूलस्येव जृंभतः ३८
यदि भूयोपियोत्स्यामि गमिष्याम्यंतकालयं प्राक्प्रार्थितः कथं भूयः करिष्ये स्वपदानतिं ३९ त्राणोपायं न पश्या
मि प्राणानां कथमप्यहं रणे विनाप्रणामेन न विमोक्ष्यति मां रिपुः ४० अप्ययुक्ततरं मन्ये मम रात्रौ पला
यनं इति चिंतापरस्याभूत् उपायः प्राणरक्षणे ४१ इति कर्तव्यमित्युक्त्वासौ तिशूरोस्वपन्निशि रजन्यां
तु प्रभातायां त्रिपुंड्रालंकृतालिकः ४२ चतुर्विंशतिरुद्राक्षभूषितौ च दधद्भुजौ खड्गखेटधरैः सार्धमति

आकू २

शूरो विनिर्ययौ ४३ प्रास्थादेनादिनाथोपि श्रुतत्तद्विरुदावलिः गच्छंतमन्वयुः शिष्यास्ताराश्चंद्रमसं यथा
४४ तत्र सर्वेषु पश्यत्सु कलयोर्युद्धमवर्तत वांछतोः कीर्तिमतुलां शुष्मिणोरिव मत्तयोः ४५ हस्तदू

हस्तिनोः १

प्रस्थानात् २

एनादिनाथः १

तेनखड्गेनसंजघानरणेरिपुं अतिशूरोपिखड्गेनतत्प्रहारंन्यवारयत् ४६ एनादिनाथोथोत्कर्षन्लग्नं चर्मण्यसिंनिजं भालेभस्मरिपोर्दृष्ट्वासंभ्रांतहृदयोभवत् ४७ विचारंचागमत्तीव्रं शिवद्रोहभयेनसः कथंमयाशिवद्रोहमविचार्यदुरात्मना ४८ आहूतोभस्मरुद्राक्षधारीयुधिरिपूकृतः शिवभक्ताभिषंगांहो निष्कृतिर्नमृतिर्विना ४९ यदित्यक्तायुधोहंस्यामयशोस्यभवेदघं पराङ्मुखवधात्तस्मादत्तिष्ठामिसो युधः ५० छिंनग्रीवोस्यखड्गेनप्राणांस्त्यक्ष्येघशुद्धये नान्यथानिष्कृतिर्मेस्तिवर्षकोटिशतैरपि ५१ ध्या सासिरेवंनिश्चित्यतस्थाउद्यमवानिव भावज्ञोपिरिपुस्तस्यनजानन्निवतत्क्षणे ५२ अतिशूरःशिरश्छेत्तुंशत्रुंकेश्येपरामृशत् निर्विकारोयदातस्थौप्राणानामत्ययेपिसः ५३ तदानींवृषभारूढःशंकरःप्रत्यदृश्यत पार्वत्याचगणैस्सार्धंविबुधेंद्रैरभिष्टुतः ५४ स्थितिंदत्वास्यकैलासेचक्रेपारिषदोत्तमं किंवा नसुलभंपुंसांप्रसन्नेपरमेश्वरे ५५ प्राप्यापायापदमीशस्यप्रीतिंसंपादतःसतः इतिश्रीस्कांदेउपपुराणेभक्तविलासेएकविंशोध्यायः श्रीविश्वनाथायनमः श्रीअगस्त्यः शिवेजन्मादिसंक्लेशध्वांतार्कांघ्रिसरोरुहे भक्तिंवितन्वतेयत्रतेषांनास्तिपुनर्भवः १ नकुलंनश्रुतंनेज्यानव्रतंनतपोमहत् न स्वाध्यायोनदेवार्चनचतीर्थनिषेवणं २ पुनर्भवक्लेशहरंभवतिब्राह्मणास्तथा शिवभक्तिर्यथापुण्याजन्मदोषविनाशिनी ३ शमादिगुणसंपन्नोब्राह्मणोविजितेंद्रियः अपिब्रह्मविदीशांघ्र्योःविनाभक्तिंनमु

एनादिनाथस्य २



च्यते ४ शिवभक्त्यैकया लोके निषादश्वपचांत्यजाः छिन्नबंधा विनायोगै रनावृत्तिपथंगताः ५ मांस
नेत्रार्पणेनैकश्चंद्रचूडप्रसादतः निषादसूनुः परमां गतिमापद्द्विजोत्तमाः ६ श्रीऋषयऊचुः कथमर्पितवान्नेत्रं निषा
दो निंद्यजन्मभाक् कथं शंभोः प्रसादेन विमुक्तभवबंधनः ७ अवाप सिद्धिं परमां दुर्लभां योगिनामपि चरित्रं न
स्य धन्यस्य वद नः कुंभसंभव श्रीअगस्त्यऊ कांचीपुरस्य महतः स्थानस्येशानकोणतः सुवर्णमुखरीतीरे पर्व
तोस्ति महत्तरः ९ नाम्ना वेणुगिरिः श्रीमान्कुंजराकारभूषितः शरण्यो वन्यसत्वानां नानाधातुविचित्रितः १०
कुंदमंदारहिंतालतालबिल्वचलच्छदाः सप्तपर्णाश्मशम्याकशालल्पासनरोहणाः ११ नागकेसरपुन्नागनालिके
रविभीतकाः वारणोदुंबरारिष्टपारिभद्रादयो द्रुमाः १२ वेणुभिः सह वर्धंते यत्र भूमिरुहांगणाः निकुंजनी
लया यत्र वर्षातपनिरोधिनः १३ वर्धमानमहावेणुपर्वनिर्मुक्तमौक्तिकैः हर्यक्षनखनिर्भिन्नहस्तिकुंभच्युते
श्च्युतैः १४ रत्नकुंजांतरासंगापरभागमनोहरैः निशातशल्लीसूचीकृतरंध्रासमुज्वलैः १५ निबध्यं
ते निषादीनां हारा यत्र वनेचरैः छिंधि भिंधि धिनमुंचानुद्रवप्रहरमारय १६ इति यत्राभितः शब्दाः श्रूयंते शबरे
रिताः कलभायत्र बध्यंते लताभिः शबरार्भकैः १७ भिल्लमल्लभ्रुनो यत्र भाषंतो वीक्ष्य सूकराः तरक्ष
वभ्रुशार्दूलाः पलायंते वने वने १८ हरिकेसरदामांतबद्धव्याघ्रनखांकुराः स्तनंधया निषादीनां यत्र क्रीडंति
दंष्ट्रिभिः १९ कापोतशौकमायूरमार्गकौक्कुटमांसभुक् दुर्भिक्षं नैव जानाति श्रितायां व्याधवाहिनी २०

तत्रास्ति गोधापुरमित्यनेकशबरास्पदं यत्र पर्युषितमांसौघविस्रगंधिर्दिगंतरं २१ नानापक्षिगणसाहस्रशतयूथपसेवितं सिंहव्याघ्रवराहेभखगावृतमहातपं २२ नाम्नो नामाधिपस्तस्य निषादकुलवल्लभः कुलाचलपुलिंदौघदीयमानकरो महान् २३ महाधनश्च शूरश्च भूपालानां च सम्मतः सदंता नाम शबरी समानकुलसंपद २४ उद्वाह्य हर्षवानासीत् हस्तिन्या गजराडिव रूपयौवनसौजन्यशालिन्या च तया सह २५ रममाणो मुदं प्राप योगी वब्रह्मविद्यया ॥ तस्यैवं वर्तमानस्य नापत्यमभवद्द्विजाः २६ दंता नपत्यभावेन खिन्ना शोचयति स्म तं अनुधृतापि बहुशो रत्नवस्त्रविभूषणैः २७ भर्त्रा प्रणयिना नित्यं बहुमेनेन किंचन पपौ न मधु मांसानि बुभुजे च न चाशने २८ दधौ मृगमदं नापि न सस्नौ कुंकुमांभसि न वेण्युद्वर्तनं चक्रे न दुकूलं बभार सा २९ तामवेक्ष्य निषादानामनुशोचन्नधीश्वरः नूनं नं तन्महन्मन्ये पूरितं पुत्रसंपदा ३० एवं याते बहुतिथे काले स व्याधनायकः कदाचित्स्वजनान्सर्वानानीय प्राह संसदि ३१ अनपत्योस्मि खिन्नोस्मि सदारो निंदितः कुले न भूतपूर्वः कोप्यस्ति मादृशो भाग्यवर्जितः ३२ यत्र कुत्रापि गच्छामि अनपत्येन मे फलं यदि कश्चिदुपायोस्ति पुत्रसंपत्प्रदो मम ३३ प्राणानपि परित्यज्य तस्य कर्तास्मि संशयं व्याधास्तस्य वचः श्रुत्वा पप्रच्छुश्च कुलोत्तमाः ३४ पक्षिगणस्य बहिर्वृक्षांजटिलां पर्णवेश्मगां आधजातीयां प्रियंगुपिष्टभांडानां सहस्रं मधुसर्पिषां ३५ प्राभृतं प्रस्थसाहस्रं दत्वाग्रे जलयोनिके नागोपि मौक्तिकप्रस्थं प्रणामं तेन ददौ पुनः ३६ माणिक्यवेत्रमतुले त्वचं पट्टांबरं तथा प्रतिगृह्य च तत्सर्वं जरती शबरीक्षणं ३७ ध्यात्वा शक्तिधरं देवं सहवल्ल्या पत्न्या १

मनोऽत्तया चालयंती शिरः किंचिदिदमाह वनेचरान् ३८ सह भर्त्राप्रसन्नेन वल्यस्मै देवनंमहत् मौक्तिकप्रस्थशतकं
यद्यनेनप्रदीयते ३९ नागादप्यधिकः पुत्रो भविता प्रतिभूरहं इतितस्यां ब्रुवाणायां शकुनानामभूद्ध्वनिः ४० प्रत्ययं प्रापितो व्या
धः प्रत्यज्ञासीत्तथैवतु मुक्ताप्रस्थशतं दद्यां सेज्जातेतनयेमम ४१ तथाविधे हि मातर्मे यथा वल्ली प्रसीदति वृद्धा तद्वचनं श्रु
त्वा नागमाह स्थितं मिथः तवदत्तं व्रतं मत्तः गृहीत्वा वत्सरं यदि तिष्ठेन्मनोरथः पूर्णः भविता वल्यनुग्रहात् ४३ अस्ति स्फुक्का
गृहीत्वोगितद्धाचात्तोषयद्वधूं साप्रीता व्याधवचनाद्धृष्टां प्रानर्नेनामतां ४४ उपस्थश्य व्रतं वृद्धा स्पृशंती भस्म नालिके पद्यं चपाठ
यामासवल्लीप्रीतिकरं परं ४५ नमोनमः षण्मुखवल्लुभायै नमोनमो नम्रजनार्तिहंत्र्यै नमोनमस्सर्वसमृद्धिदायै नमोनमस्ते
दिशवल्लिपुत्रं ४६ एतत्सद्यं जपंती सा मधुमांसविवर्जनात् दधार व्रतमच्छिद्रमस्ति धाराव्रतं यथा ४७ मासत्रयेप्यतिक्रां
तेनाभवल्लक्ष्म किंचन पुनः सापद्यमदिशत्षण्मुखस्तुतिसुंदरं ४८ नमोनमः शैलसुतात्मजाय नमोनमो बर्हिणवाह
नाय नमोनमो वल्लिमनोहराय नमोनमो देहि सुतं गुहेश ४९ इति पद्यद्वयं वृद्धा पाठयित्वा चतान्नतां बभूव परमप्री
तिं कृतार्थासीत्यभाषत ५० अतीते सप्तमे रात्रे दंता निद्रावशंगता स्वप्ने ददर्श सोत्संगे स्थापितं पूर्णमंडलं ५१ निषा
दाधिपतेर्भार्या भास्वरं रजनीचरं अंतर्गृहे प्रदीपं च प्रवृद्धायै न्यजिज्ञपत् ५२ मान्यत्र कथयेस्फुक्का सा प्रहृष्टतरा भवत् १
अथ मासेत्वतिक्रांते प्रास्फुरत् गर्भलक्षणं ५३ व्याधाश्च मुदिता नेमुः व्रतां तेजरतीमपि प्रागेवजन्मनः सूनोर्यथोक्तं शबराधिपः ५४
मौक्तिकप्रस्थशतकं वल्लीदेवी मुदे ददौ शुभे मुहूर्ते व्याधेंद्रः सर्वाभरणभूषितां ५५ आसन्नप्रसवां दंतामवलोक्य दधौ मु

निषादाधिपं ५ दंता ५ ७ चंद्र ५ नागपत्नी ५ चंद्र ५ तू ३९

दं बाहुभ्यामवतीर्णोब्धिपारंगतइवस्वयं ५६ इयेषतनयंजातं कर्त्तुंशबरनायकं ततः शुभान्वितेलग्ने शुभग्रहनिरीक्षिते

५७ दंतासूतात्मजं प्राची हरिश्चंद्रमसंयथा नागःश्रुत्वात्मजं जातंबभूवमुदितांतरः ५८ नष्टदृष्टिःपुनर्दृष्टिलाभेनतनुमानिव मधूनिदापयामासपक्कणेषुचसर्वशः ५९ निषादजरतीसाक्षाद्देवीवत्स्तौममन्यत काहलीशृंगहिक्कानांशब्दास्तत्सुतजन्मनि ६० वियतोधोव्यजृंभंतनादयंतोदिशोदश ववर्षुःपुष्पवर्षाणि खेचराःशबरालये ६१ यथाधिकारं व्याधेंद्राः रत्नप्राभृतपाणयः उपासतांतिकेनागं यथापूर्वंप्रियंवदाः ६२ जगुः कलंचगंधर्वानन्नृतुर्नाकयोषितः उदभूद्दैवतनुर्वाणिःसर्वेषांहृदयंगमा ६३ शिवभक्तिपरीक्षायां प्रदधेनयनार्पणात् अत्युत्तादधिकांकीर्तिं संप्राप्यशबरान्वयं ६४ अलंकर्त्तुमयंजातः दंतायास्तनयोमहान् इतिनद्गिरमाकर्ण्य सिध्वाह श्लाघमकुर्वत ६५ रोदनध्वनिमाकर्ण्य शिशोर्दंताकलाक्षरं अविंदतपरानंदं योगसिध्येवयोगिनः ६६ क्रमेणववृधेबालो मात्रासमुपलालितः शुक्लपक्षमनुप्राप्य कलानिधिमिवोदितः ६७ शबरीशबराणांच तस्मिनूतनयेपङ्क्तयः पूर्णामितमिवासाद्यतटाकंतृषिताजनाः ६८ देहवर्णस्यसदृशं नामचक्रेपिताशिशोः नीलवर्णतयानीलः प्रथितःपक्कणेषभून् ६९ जानुभ्यामपिबाहुभ्यांचंक्रमंतंकुमारकं पश्यतोर्व्याधिदंपत्योः प्रीतिंजानातिशंकरः ७० जातदंतस्यनीलस्यव्यक्ताव्यक्ताक्षरामुदा गिरस्सुधासमरसाःश्रूयंतेस्मतदामुहुः ७१ किंचिदारयभिंधीति नागःपाठयतिस्मसः धूलीकेल्यांनिषादानांशिशूनाक्षिप्यखेलति ७२ बालंविलोकयन्नागः भोजनस्यनचास्मरत् व्याघ्रभल्लूकभूदारहर्यक्षगजपोतकैः

ध्वनोतुमधुरा
स्फुटेकलः५

६ आकाशवाणि:

साध:२

क्रीडंतं बालकं दृष्ट्वा प्रहरेत्यब्रवीत्पिता श्वानो बभूवतुस्तस्य किशोरकसमौ सदा ७४ पार्श्वयोर्भोजने निद्रासमये पि समीयतुः व्याधवृद्धानुदिवसं भस्मरक्षां वितन्वती ७५ वल्ली षण्मुखकारुण्याच्चिरंजीवेत्यवाचसा ॥इ
तिश्रीस्कांदोपपुराणे भक्तविलासे द्वाविंशोऽध्यायः श्रीविश्वनाथसपरिवारायनमः श्रीअंबायैनमोनमः ॥ द्वादशे वत्सरे तस्य नूतनायुधसंग्रहं कारयिष्यन्मुदा नागो व्याधान्सर्वानमेलयत् १ हिमालये महामेरौ निषधे गंधमादने विंध्ये महेंद्रे मलये त्रिकूटे मल्लिकार्जुने २ गिरावन्यत्र ये व्याधाः ते च सर्वे समागताः नानोपायनहस्तांस्तान्नागतानखिलानपि ३ संपूज्य मधुमांसादिजात्याहारप्रदानतः द्रव्यजातं स संगृह्य त्रिपादे रूपदीकृतं ४ शुभे मुहूर्ते तनयं व्याघ्रचर्मणि नूतने निवेश्य प्राङ्मुखं हस्ते नागस्तां क्षुरिकामदात् ५ उलूकध्वनिमातेनुः शबर्यश्च समंततः अथ बध्वांगुलित्रं स्य सूनोर्वामकरे धनुः ६ ददौ नागः शरं किंचिद्विदं सदसि चाब्रवीत् पुरः पुत्र शमीवृक्षे निबद्धः क्रोडपोतकः ७ शरेणाकर्णकृष्टेन शरव्यं तन्निपातय इति नागेन संदिष्टो नीलः संधाय कार्मुके ८ सायकं तं प्रतिनिर्विससर्ज कृतास्त्रवित् स भूदारार्भकं लक्ष्याद्विभिन्नं वीक्ष्य सर्वशः ९ श्लाघमाना वनचरास्साधु साध्विति चाब्रुवन् पुलिंदकुलवृद्धानां कारयित्वा लतिं पदे १० नागः पुत्रं समाश्लिष्य परां निर्वृतिमापह ॥ ततः परं समामंत्र्य पुलिंदास्तेन पूजिताः ११ युवराजस्य नीलस्य चाज्ञया स्वपदं ययुः ॥ बध्वकक्षस्ततो नीलः शबराचार्यशिक्षया ॥ १२ ॥ सर्वायुधेषु परमां शिक्षामध्यगमच्चिरं ॥ शर्करामरुकांतारधावने हरिणद्विषां ॥ १३ ॥ निरोधे निर्भयामर्दे नतस्यासीत्समोपरः ॥ आनया

द्विप्रयोगेषुयुद्धेकेशरिभिःसह १४ सत्वप्रहारमोक्षेचसदृशस्तस्यनापरः आखेटकौतुकाक्रांतचेतसोऽस्यानुवासरं

नीलस्य २

१५ नशेकुरनुयानेपिनागसूनोर्वनेचराः सिंहव्याघ्रवराहेभशरभारण्यवासिनः १६ नतस्याविदितंकिंचिद्वन
मस्तिमहीतले मार्गानुसारिणोतस्यसुहृदौद्वौबभूवतुः १७ वलिशःकणिशश्चेति व्याधयोधाधिपात्मजौ स
हताभ्यांविनिर्गत्यप्रातराद्दिवसात्ययं १८ चरित्वासहैमारण्येरात्रावायातिपक्कणे एवंविचरतस्तस्यपंचसंव
त्सराययुः १९ वर्षवातातपास्तस्यबभूवुर्नैवदुस्सहाः ततोवनचराःप्राप्यनागपक्कणवासिनः २० ऊचुर्दक्षि
णतोबाधांवहंतीदुष्टसत्वजां निशम्यवचनंतेषां नागः व्याधःप्रोवाचतानिति २१ नप्रागिवबलेव्याधाःमृगयायांम

वृद्ध

याधुना वृद्धःकारणमां येनखिन्नोस्मीहवनेचराः २२ भवंतएवदुष्टांस्तान्निवारयतसायुधाः तरुणाबलवं
तश्चबलिभिश्चान्विताश्वभिः २३ नमूचुःश्रुतंतद्व्याधाःपुलिंदामिलिताःशतं पुत्रस्त्वदधिकंनीलंकुरुसेनाग्र
यायिनं २४ नागोपिप्रीतयेतेषांप्रेषयामाससैःकृतं प्रतस्थेव्याधसेनासदुष्टसत्वजिघांसया २५ नीलःसुहृ

वलिशकणिशाभ्यां ५

भ्यांसहितोनीलमेघसमद्युतिः धनुर्धरैःकवचितोमहद्वनमगाहत २६ विस्तार्यवागुराःव्याधाःतस्थुश्च

सामर्थ्यभक्षणः ३

परितोवनं डिंडीभिंधि ग्रहाणेतिवदंतःसत्वभूषणाः २७ ततःश्वानादमुखरेवनेसर्वत्रसंश्रयाः बभ्रमुर्मृगयू

१

थानिगगनेघनयूथवत् २८ जघ्नुर्व्याधाश्चलगुडैःमृगानंतिकचारिणः नीलराजेनदलिताः निष्टंतोमहाबलाः
सिंहव्याघ्रवराहाश्चनिपेतुस्त्यक्तजीविताः नीलबाणप्रहारार्तनानासत्वसमाकुलं ३० आसीदरण्यमथितं

क्षुद्भिन्नार्णववारिवत् नीलो निकुंजाद्धावंतं दक्षिणाशामुखं भयात् ३१ कृष्णसारमनुद्रुत्य प्रतस्थे धृतकार्मुकः कनिशो बलिशश्चोभौ सह तेनाभ्यधावतां ३२ दृश्यादृश्यतनुं नीलं कृष्णसारोपि दूरतः विचकर्ष परिश्रांतं मारीचो राघवं यथा ३३ धावतः कृष्णसारस्य मध्ये कश्चन सूकरः विनिर्ययौ नागसुतो निजघान शरेण तं ३४ उज्जिहार शरं यावत् वपुषो वन्यदंष्ट्रिणः स कृष्णसारः सहसा वने क्वापि तिरोदधे ३५ अथ तापपरिश्रांतः क्षुधितस्तृषितो वने व्याधराजसुतः प्राह सुहृदौ च धृतश्रमौ ३६ मृगः पलायितोरण्ये परिश्रांता वयं ध्रुवं क्षुत् उपलभ्येत चेद्वारि श्रांतिः शांतिमुपैष्यति ३७ कनिशोथ तमाहेदं सखे स्वादुतरं ननु जांगलं वन्यलोकस्य भुंजतां किं विलंबसे ३८ न वन्हिमिह पश्यामि पिपासा महती मम उपायः को नु भावी ते त्याह नीलो धृतस्तरुं ३९ कनिशः प्राह तं भूप श्रूयतां मद्वचः सखे क्रोशद्वयादितः शैलो दृश्यते कश्चिदुन्नतः ४० सिद्धचारणगंधर्वसेवितो देवभूषितः फलभारानतैः पुष्पैः सांद्रैः सानुशतं श्रितः ४१ सुवर्णमुखरी नाम ततउत्तरतो नदी कमलोत्पलकल्हारवनामोदाधिवासिता ४२ घृतपिंडोपमा यत्र चरंती शफराः सखे तत्र गत्वा महाजलधौ स्नात्वा पीत्वा झषोत्तमान् ४३ स्वादनस्तेन पुनरावृत्तौ बुद्धिर्भविष्यति मया परिचिता पूर्वं सा नदी मृगयांतरे ४४ उत्तिष्ठोत्तिष्ठत न्नीलं बलिशः प्राह हे सखे त्वया वनवराहोयं मया विध्रुः प्रतीक्षतां ४५ अन्नैव जलमानीय तव दास्याव हे पुनः तथेत्युक्तेपि स्कहृद्वा नागसूनुर्नदीं प्रति ४६ श्लाघमानो निमित्तानि प्रतस्थे कणिशान्वितः मुहूर्तेनैव तां गत्वा पर्वतं तस्य चांतिके ४७ ददर्श नीलस्तरिनीं सुवर्णमुखरीं त

सूकरस्य ४

नीलो वदति ५

सुहृत २

नीलः २
५०

चा

तः॥ स्वादुशीतलपानीयमतिस्वच्छं महामुदा॥ ४८॥ तरंगमधुराधूतपांथजालपरिश्रमं॥ नानातीरतरुव्रातशिरःसाहस्र

वर्त्तिनं॥ ४९॥ विहंगमानां ध्वनिभिः मुखरीकृतदिङ्मुखं मज्जन्मुनिवरस्तोमशिष्यकोटिसमावृतं॥ ५०॥ कालहस्तीशनिर्माल्य

पुष्पभासुरवेणिकं॥ मत्स्यकच्छपसंघूरसमाधूतसरोरुहं॥ ५१॥ मकरंदरसास्वादमत्तालिध्वनितादितं॥ मरालचंचुसंदष्टबि

सलालसहंसिकं॥ ५२॥ मज्जन्निर्जरवारस्त्रीस्तनकस्तूरिकाविलं॥ पानावतीर्यवन्नेभदानचंद्रिकमंडितं॥ ५३॥ हर्यक्षहतम

त्तेभकुंभमौक्तिकशर्करं॥ बालदूर्वादलश्यामसरोमांचमृगांचितं॥ ५४॥ गंधर्वगीतमाधुर्यद्रवदश्ममनोहरं॥ उपांतकुंज

संशुष्यन्मुनिवाधकवल्कलं॥ ५५॥ इंगुदीफलसंक्षोदस्निग्धश्लक्ष्णशिलांतरं॥ नटकीचकसंदष्टवालार्तचमरीमृगं॥ ५६॥

खंजरीटविहारस्मारखानरांकुवनेचरं॥ स्फुरदावर्त्तनाभीकां नीलोत्पलविलोचनां॥ ५७॥ उन्नमत्पुलिनारोहां शुभ्रफेनव

रांशुकां॥ विकसत्पंकजमुखीं दीर्घशैवालकुंतलां॥ ५८॥ नीलः चक्रवाकस्तनवतीं चारुकुंचितहंसकां॥ महिषीं सिंधुराजस्य मंडितामि

वभूषणैः॥ ५९॥ सुवर्णमुखरीं दिव्यां सरितं शबरात्मजः॥ समीक्ष्य मुमुदे नीलः सख्या सह कलितेन विगाह्य तां॥ ६०॥ अपहाय परिश्रांति

मभवन्मोदनिर्भरः॥ सद्यः सुवर्णमुखरीसलिलावगाहाद्व्याधस्य नष्टमखिलं दुरितं बभूव॥ चेतश्च निर्मलमभूद्दृहुजन्मभाग्य

कल्पद्रुमोप्यथ फलोन्मुखतां प्रपेदे॥ ६१॥ इति श्रीस्कांदोपपुराणे भक्तविलासे त्रयोविंशोध्यायः॥ श्रीसांबसदाशिवार्पणमस्तु॥

श्रीअगस्त्यः॥ तीरद्रुमफलं स्वादु भुक्त्वाथ सुहृदर्पितं बभूव स मुदितो नीलः शांतपरिश्रमः १ पश्यन्नभ्रंलिहान्वृक्षान्सुवर्ण

मुखरीतटे बिभ्राणस्सशरं चापं विचचार वनेचरः २ अथ श्रीकालहस्तीशसेवासंप्रीतचेतसां आसीदप्सरसां तस्मिन्सं

भ्रमः शैलमूर्धनि ३ निक्काणलरवोन्मिश्रो वेणुस्वनविचित्रितः मंद्रमर्दलनिर्ह्रादकृतमायूरकौतुकः ४ तानतारवालापलीला

शिवलिंग २

कोरकितद्रुमः गंडशैलशिलासारद्रवीकरणपंडितः ५ कालहस्तीशभूषाहिराजराजानुमोदितः संगीताडंबरस्तासां
ध्यानशेदिक्षुसर्वशः ६ तेनाकृष्टमनानीलः सुहृदं प्राह कौतुकात् परिश्रमममश्रांतिरपिशांताक्षुधातृषा ७ सुवर्णमुखरीस्ना
नात्परिपूतोस्मिसांप्रतं न्यस्तभारमिवाभाति प्रसन्नमिवमानसं ८ आपूरयति कोयंमेमुहुः शब्दामृतैः श्रुतिं अवतीर्ण
इवस्वर्गः शैलाग्रे किन्नपश्यति ९ अथतंप्राह कणिशः पितुर्लेमृगयांतरे मयासहगतेनप्रागिदमाकर्णितंतथा १० शिखरेशै
लराजस्य दिव्याकाचनदेवता देवतास्तांपूजयंतीति किंवदंतीमहीयसि ११ इयमेकपदीतत्रसेवार्थंगच्छतांसखे मधुमाक्षिकश
ब्दानुविधायीश्रूयतेध्वनिः १२ दिदृक्षायदिगच्छावः तत्रापिप्रियसांप्रतं तथेतिनीलः प्रथितः त्वरितः सुहृदासह १३ आरुरोह
गिरिश्रेष्ठं सोपानैः क्षुल्लुकाश्मभिः समाधिमिवयोगीद्रः शनकैः सयमादिभिः १४ पार्श्वेपरिणमद्वेणुपर्वांतोद्भूतमौक्तिकैः
समंततः शर्करिलामतिक्रम्यसवर्त्तनीं १५ चरंतियत्रजीमूताः कलभाइवमेचकाः अध्यारुरोहतन्नीलः ससुहृत्तर्दधित्यकां
१६ ददर्शशैलशृंगाग्रेनमेरुवनमुत्तमं कृतमालावनोन्मिश्रमपिश्रीफलमुत्तमं १७ बिल्ववृक्षंतमुद्दिश्यगच्छन्व्याधो
त्तमास्तजः ददर्शपरितःसर्पान् शांतवैरान्सहस्रशः १८ गच्छतः पदवीतस्यसीमावधिमगाहत मुनेशिवप्रसादेन
संसाराब्धावधिर्यथा १९ पदेपदेस्यपापानिकोटिजन्मार्जितान्यपि प्रणष्टानियतस्तस्मात्प्रससादनरोमनः २० ततो
दर्दुरफूत्कुर्वदुत्फणाहिफणाकृति लिंगंमाहेश्वरंदिव्यंप्रत्यङ्मुखमवस्थितं २१ कृतोपहारंभक्तेनकृतमाल सगंधितं
कोटिसूर्यप्रतीकाशंकोटिशीतांशुशीतलं २२ सकृद्दर्शनमात्रेणसर्वपापहरंपरं सन्निधौमुनिविन्यस्तपुष्पदूर्वातिला

(margin:) प्रथितस्पकांडरा... तत्नोभूमि... २०
(margin:) अग्निलतासर

सारग्वधेराजवृक्षशम्याकचतुरंगुलाः ॥ आरेवतो
माधघातः कृतमालः सुवर्णकः इत्यमरः २
अग्निलतासर

क्षतं २३ कपोलकषणासक्तमत्तेभमदवासितं वल्मीकाहिशिरोरत्नदीपांचितदिगंतरं २४ दुकूलेनैवमहता
निर्मोकेणपरीवृतं कस्तूरिकामृगासंगकस्तूरीरसवासितं २५ कालहस्तीश्वरंनामकालमत्यनिवारणं बभूव
मुदितोदृष्ट्वा योगीवज्योतिरांतरं २६ ननामदंडवद्भूमौ प्रदक्षिणमथाचरत् स्वामिन्मांरक्षरक्षेतिवदन्नंजलिमादधे २७
अभूद्रोमांचितननुरानंदाश्रुकणांचितः भक्तिंदधारातितमांभवेभवभयापहां २८ पश्यतोव्याधपुत्रस्यभगवंतंमहेश्वरं।
चक्षुश्चक्षुष्यवस्थानेसर्वाःकरणवृत्तयः २९ नवंनवमिवादोभूत् क्लीबंव्याधःसशंकरं भिषेवेसादरंतस्मान्यस्मरज्जा
तिमात्मनः ३० पिबन्निवमुहुःप्रीत्यालिहन्निवउदन्यया जिघ्रन्निवचसंश्लिष्यतत्किमाकर्णयन्निव ३१ गृह्णन्निवकरे
शंभुंव्याधःस्ववशमानयन् आलिंग्यसाहरंवृत्तिव्याधपुत्रस्यमानसि ३२ जारिणीवदृढंतस्थौप्रियसंप्रोषितागतं येता
वंतमिमंदेवमनिषेव्यातिवाहितं ३३ कालंकृष्टमहंमन्येवृथैवायुर्व्ययःकृतः इतःप्रभृतिनैवास्यसक्तव्यःसन्निधिर्म
या ३४ कृतकृत्योभविष्यामिकालहस्तीशसेवया इतिनिश्चित्यमनसासखायंप्रियमानसः ३५ केनवामूर्ध्निदेव
स्यम्लानःपुष्पांजलिःकृतः उत्सार्यहिविधास्येस्यनवांरग्वधमालिकां ३६ इमानिवन्यपुष्पाणिनिपतंतिकथंयथा इति
नीलोक्तिमाकर्ण्यकणिशःप्राहविस्मितः ३७ पितुराखेटकालेतेदृष्टःकश्चिदिहागतः तस्यमुष्टिमिताःकेशाःमौलिमध्येदृढी
कृताः ३८ त्रिगुणैस्तंतुभिःकृप्तंवामांसेवामतोवहन् असावन्वहमभ्येत्यस्वर्णमुखरीजले ३९ आनीतकलशेनामुंमूर्ध्निसिं
चतिदेवतां नवानिविल्वपत्राणिशम्याककुसुमानिच ४० मौलौपादेचनिक्षिप्यमंदंकिमपिजल्पति अग्नेस्थूलान्नकव

लिं १

आरग्वधेराजवृक्षशम्पाकचतुरंगुला॥ आरेवतोव्याधघातःकृतमालःसुवर्णकः इत्यमरः। अभिलता
सदतिमसिद्धस्य ४

लें कृत्वा हस्तं च दक्षिणं ४१ दर्शयित्वा गृहीतान्नं प्रत्यहं यामि मंदिरं हस्तस्पर्शजलक्षेपं सहते नैव देवता ४२ महतीयं न
चास्माकं छायामपि सहिष्यते तस्मात्वं दूरतस्तिष्ठ यदेकः स्वामिनः सुतः ४३ सख्युर्वचिं समाकर्ण्य नीलः प्राह स्मयन्निव
वनेचराणामस्माकमेतच्छिकुलदेवतं ४४ अस्मद्गिरिवने यस्मादसत्याहतमस्ततः सुहृत्तमं विधास्यामि त्वामिवामुं महे
श्वरं ४५ दिन्नैरेव दिनैः पश्य भक्त्या किं किं न सिध्यति स्कवर्णमुखरी वारि सुलभं कुसुमानि मे ४६ बहूनि मृगमां
सानि कथं नाराध्यते हरः जन्मकर्मादि देवस्य प्रसादेनैव कारणं ४७ साधनं भक्तिरेवास्मिन् जात्याहीनोप्यहं प्रियः
रमते न मनस्तत्र सखे मे पितुरालये ४८ यथात्रानंदभरितस्तस्मादत्र वसाम्यहं इत्युक्त्वा सन्निधिं प्राप्य सांजलिः
सव्यजिज्ञपत् ४९ कथमेको निवससि वने दुष्टमृगान्विते प्रभुस्त्वमसि लोकानां शैलाग्रे वर्तसे कथं ५० अर्प्यस्माकं मध्ये१
परिजनो न ते कश्चिदिहापरः अहमेव भविष्यामि दिवारात्रं च पार्श्वतः ५१ अंगीकुरुष्व मां देव दासमागः क्षमस्व मे करोम्यंज
लिमान्नं ते प्रसीद मयि शंकर ५२ एवमात्मार्पणं कृत्वा शबराधिपनंदनः सपर्यां शांकरीं कर्तुं तदारभ्योपचक्रमे ५३ शरैराछिद्य
तस्याराल्तृणगुल्मलतादिकं दूरी चक्रे क्षणेनैव दुरितान्यपि भक्तितः ५४ मृगान्निहत्य बहुशो मृगयायामथानले नि
क्षिप्य चिंतां महतीमवाप शबरात्मजः ५५ वनदूरे सरिद्वारि वने पुष्पाणि नांतिके कलशादिन मे किंचित्करिष्ये चार्चां कथं विभोः
५६ इति चिंतयतस्तस्य प्रत्यचात्तबुद्धिरुत्तमा एवमस्त्विति निश्चित्य स चक्रे यन्महात्मनः ५७ अनन्यसुकरं तच्छिश्रूयंतां
भक्तिसाहसं अभिषेकांबुकलशमतनोन्मुखमात्मनः ५८ सोपानत्प्रपदं चापि व्यधान्निर्माल्यशोधनं ॥ ॥ ४२

दे ३

दूराहृतानांपुष्पाणां भाजनंकेशिकांतरं ॥५९॥ हस्तंचदक्षिणंमेनेनैवेद्यफलभाजनं ॥ अथसंवीक्ष्यपिशितंअनलोद्धृन

हैति२ शोधितं ॥६०॥ उधृत्यैनां कृत्वाफूत्कारैःस्पृश्यमूष्मलं ॥ इदंयुक्तं किमीशस्यस्वादुपक्वंनवाभवेत् ॥६१॥ परीक्ष्यदासेदेवायन

चेद्द्रोहोभविष्यति ॥ दृष्ट्वेदंतेस्तनोमासंपर्यैक्षतचजिह्वया ॥६२॥ यद्यत्स्वादुतमंमांसंमधुसिक्तंवनेचरः ॥ शैलरंभादलपुटेत

तत्रसं४ तस्थंजगृहेपृथक् ॥६३॥ स्वर्णमुखरीवारि निमज्ज्याग्नेयकेशिके ॥ तत्रपुष्पाणिसंगृह्यमुखेसंजगृहेजलं ॥६४॥ वामेन

सशरंचापंआदायनिजपाणिना ॥ अन्येनमांसपुटिकामनुप्रातिष्ठतेश्वरं ॥६५॥ यत्रास्तेकालहस्तीशोलरयाभेत्य

तत्रसः ॥ सोपानंहापदाग्रेण भक्त्यानिःशंकमेश्वरं ॥६६॥ इतिश्रीस्कांदोपपुराणेभक्तविलासेचतुर्विंशोध्यायः ॥ श्री

शिवमौलौ१ श्रीअस्यैगे ॥ मौलौनिरस्तनिर्माल्येगंडूषजलधारया ॥ अभिषिच्यनिधायाग्रेमांसपत्रपुटंविभोः ॥१॥ प्राक्षि

पत्केशभारस्थं नतास्यःकुसुमोत्करं ॥ निवेदितानिमांसानिनोपयुक्तानिकिंमया ॥२॥ विचारयन्नितिप्राहप्रांज

लिस्संनिधोहरं ॥ भुंक्ष्वमांसमिदंस्वादुमार्गमायूरमाघृतं ॥३॥ मधुनेदंतुकापोतंबोधामांसमिदंप्रियं ॥ ऐणेयं

यदिवाराहंप्रियंतेचानयामितत् ॥४॥ स्वर्णमुखरीमीनान्निमान्पश्यघृतोपमान् ॥ भुज्यतांकालहस्तीशशपेमयिदयांकु

रु ॥५॥ यदिनाश्नासिदेवेशनाश्नीयामप्यहंध्रुवं ॥ ददामिवदनेवातेमधुसिक्तंमहेश्वर ॥६॥ एवमस्त्वितितद्वक्त्रेमांसंकिंचिदथार्पय

त् ॥ दयालुःकालहस्तीशोतन्मांसंबुभुजेयदा ॥७॥ ददौसर्वंतदाव्याधःस्वीचकारचशंकरः ॥ अथोत्थायमुदानृत्यन्निदमाहकृ

तांजलिः ॥८॥ प्रातर्भुक्तमिवस्वादुमांसंकिंतुममापिते ॥ व्याधवाक्यंनिशम्याथमहाग्रासीन्महेश्वरः ॥९॥ ततोप्यधिकमे

वेति शिरः कंपाद्मोदत विवक्षुर्व्याधवृत्तांतमिवदेवो दिवाकरः १० वरुणस्यापरां भो धोममज्जब्राह्मणोत्तमाः ब हि
र्गते रिवाघोर्घे स्तिमिरैर्विश्वमावृतं ११ गृहीतस्तंभिताहींद्र फणारत्नप्रदीपिते सन्निधौ निशि देवस्य तस्थौ दीपप्रदो हि
सः १२ चिकीर्षुरालयं पूजामेवमेव वनेचरः अन्येद्युः प्रातरवी मृगयार्थमगाहत १३ अर्चकोपि समागत्य मांसगंधि महेशि
तुः दृष्ट्वा लिंगं विनिश्वस्य रुरोद पतितः क्षितौ १४ उच्चैः स्वरेण चुक्रोश व्याधेर्दुष्टैरिदं कृतं नरके निपतिष्यंति शिवद्रोहरता हि ते
१५ इति संप्रोक्षणं कृत्वा पूजयित्वा च पूर्ववत् जगाम स्वालयं विप्रः शबरोथ समाययौ १६ अतीतः किंनु समयः क्षमस्व क
रुणाकर इति नत्वा यथापूर्वं कृत्वा निर्माल्यशोधनं १७ स्वगंडूषाभिषिक्तस्य मांसाहारं न्यवेदयत् तथैव भोजयामास त
च्छेषं बुभुजे पुनः १८ एवमर्चयतः शंभुं मासएकोन्यवर्त्तत दूषितं प्रत्यहं मत्वा लिंगं संप्रोक्षणादिना १९ अर्चकः शोधयामास
विचाराक्रांतमानसः वनदेवगृहीतं स्वं नागः श्रुत्वा गतः स्कंते २० वैद्यैश्चकार भेषज्जं निराशः स्वालयं ययौ प्रतियाते थ
शबरे ततः पितरि पक्वणं २१ दीर्घरोगी वनीरोगस्स बभूव वनेचरः प्रतिबंधविनिर्मुक्तो मुमुक्षुरिव शंकरे २२ दधार परमां
भक्तिं प्रीतिं कामी वयोषिति गंधोदकाभिषेकं तं गंडूषजलसेचनं २३ सपादत्राणनखाद प्रहारो मूर्ध्नि चान्वहं स्कंदस्या
न्वशिशोर्लश्ला विन्यासो घ्रिरुमापतेः २४ भक्त्यापरिक्षितं स्वादु वन्यमांसं यदर्पितं सहस्रांशतुलां तस्य नैवार्हत्याध्वरं
हविः २५ माल्यं तत्केशविभ्रष्टं निर्दोषं हेमपुष्पवत् पर्यटन् विपिने निघ्नन् सत्वान् जक्षन् पिबन् हसन् २६ न किंचिदन्यं सं
रं भात् एवमेव वनेचरः वारिपूरितगर्भास्यं मांसपत्रे धनुः करे २७ शिवार्चनार्थमायांतं खेचराः प्रशशंसिरे शिवार्चकः प
रं तस्मिन् शबरे द्वेषमादधे २८ परं शंभुस्त्वनिलरां शबरे प्रीतिमाततनोत् अथैकदा द्विजः प्रातः पूजार्थं प्रागिवागतः २९ ददर्श

लिंगमीशस्य शबरेमृगयां गते मांसकीकससंकीर्णं वसामंत्रितमक्षिकं ३० काकगृध्राकुलोपांतं श्वपदैः परितोवृतं दृष्ट्वा
रोदीद्धृदु विधं कराभ्यां प्रहृतोदरः ३१ देवस्थानमिदं पुण्यं सूनास्थानमिवाधुना पापिनद्रोहिनाकेन कृतमेवं दुरात्मना ३२ अ
पराधं कथं नित्यं सहसे शबरैः कृतं हाहतोस्मिन मेमृत्युः किं पश्यसि महेश्वर ३३ न पश्यामि दुरात्मानं शिवलिंगविदू
षकं गतेमयि प्रतिदिनमेवं दूषयते खलः ३४ अद्य क्षांतमिदं सर्वं श्वः सर्वाहं मृतो ध्रुवं इत्युक्त्वास्थीनि मांसानि स्वय
मुत्सार्य दूरतः ३५ संप्रोक्षणविधिं कृत्वा गंधतैलादिलेपयत् सुवर्णमुखरीतोयकलशीशतसेचनात् ३६ शतरुद्रीयमंत्रे
ण पूजयित्वा महेश्वरं यथापूर्वं ययौ वेश्मन भुक्तिं विदधे शुचः ३७ अथ स्वप्नेन माहेशः शावरीं भक्तिमुत्तमां तस्मात् प्रि
यतरो नान्यः तद्द्वेषी तु मम अहितः ३८ परीक्षणाय याय दिते भक्तिस्तस्य महात्मनः वसैकत्र निगूढस्त्वमू रात्रौ गुल्मे परेहनि
३९ इत्युक्त्वांतर्धिमकरोत् कालहस्तीश्वरो विभुः अथार्चकः समुत्थाय भयात् पुलकितो निशि ४० नैव निद्रामवापायं
स्मारं स्मारं विभोर्वचः शबरोपि यथापूर्वं पूजयामास चादरात् ४१ नीतारात्रिं ययौ वन्यमाखेटायारुणोदये द्विजोप्या
जंतुसंचारे दर्शनात् प्राक्समुत्थितः ४२ आगत्य कालहस्तीशमर्चयित्वास विस्मयः उपांतवनवृक्षाग्र शाखामारुह्य
संस्थितः ४३ अतिक्रांते थ मध्यान्हे लंबमाने दिवाकरे निहत्य विविधान्सत्वान् आदाय पिशितं बहु ४४ स्नातः सु
वर्णमुखरीवारिसंपूरिताननः मांसायुधकरः शंभोरंतिके समदृश्यत ४५ द्रुतमागत्य पादाग्राकृत्वा निर्माल्यशोध
नं गंडूषपयसा मौलावभिषेकं विधाय च ४६ क्षिपन् केशस्थितं पुष्पं पिशितानि न्यवेदयत् यथापूर्वमभुंजानमिदमाह
महेश्वरं ४७ विलंबसे कथं देव मांसं मधुरसाप्लुतं भुंक्ष्वाद्य स्वयमेवासि श्रांतो दूराद्धनं गतः ४८ इत्युक्त्वा विकुर्वन्व्या
धो दृष्टिमार्गनिरोधिनः सन्नद्धे शं भोजयितुं मांसहस्तोंतिकं ययौ ४९ वामनेत्रस्रवद्रक्तं मुखमालोक्य शांभवं आहतो

अर्चकानां मध्ये अपसदस्नीचस्याग:अपराधं २

स्मीति शबरः परं मूर्छामवाप ह ५० क्षणादुत्थाय विरुदन्ममार्ज रुधिरं दृशः पुनश्च रुधिरं तस्मान्नयनादपतद्द्रुतं ५१
गजदंताभिघाताद्वा मृगाणां वा खुराहतं देवदेवस्तव ह्यक्तं तव वामविलोचनात् ५२ अर्चकापसदस्यागो महदस्तिन संशयः
अस्तु वा येन वा केन दृग्रोगस्ते न शाम्यति ५३ यावत्तावन्न भोक्षेहं ज्ञातमस्त्यौषधं च मे इत्यरण्यादुपादाय विशल्यकर
णीरसं ५४ असिंचन्नयने शंभोः दृग्विकारस्तथैव सः व्याधोपि भूत्खिन्नश्चक्रे भेषज्जं विविधौषधैः ५५ नशशामय
दा तावद्देवं चक्रे स निश्चयं ममनेत्रार्पणेनास्य विकारः शांतिमेष्यति ५६ करिष्यामि तथैवाहं नान्यस्त्यौषधं भवेत् इत्य
कृत्य शरेणाक्षि निदधे भगवद्दृशि ५७ विकारः शंभुनेत्रस्य शशाम मुमुदे च सः उपाजहार पिशितं दक्षिणाद्रक्तमीक्षणात्
धारात्तमपतच्छंभोः व्याधश्चिंतामवाप ह न तेरोगो महादेव मम भक्तिं निरीक्ष्यसे ५९ अन्यदप्यक्षि दद्यां चेत् सपर्याश्वं त्वं कथं भ
वेत् किं व्याधपूजयैदेव दक्षिणाक्षि गृहाण मे ६० इत्यर्पयिष्यन्व्याधेंद्रो द्वितीयमपि लोचनं क्षणं विचारमगमत् लक्ष्याज्ज्ञानं कथं न्विति ६१
ततो वुधिःसमुत्पन्नं व्याधवंशशिरोमणेः चरणांगुष्ठमीशस्यकृत्वा दक्षिणदृक्पथे ६२ उन्मूलयिष्यं नयनं निदधे शस्त्रमक्ष्णि सः
आविर्भूय तदा देवो भ्यनंदत्स महेश्वरः ६३ ववर्षुकुसुमासारान्खेचराः शबरोपरि ददर्श वृषभारूढं सोमास्कंदमहेश्वरं ६४ सेव्य
मानपदांभोजं गणैर्द्दैरष्टषष्ठिभिः प्रणम्य शंभुं व्याधो भूत् त्रिणेत्रस्तदनुग्रहात् ६५ तमाश्लिष्य महादेवः प्राह गंभीरया गिरा म
द्भक्त्या परिपूतस्य न जातिर्विघ्नसाधनं ६६ भवेन्मद्भक्तिभूत्यस्य सन्न्यासोपि न सिद्धिदः दत्तास्थितिस्ते कैलासे किमन्यद्वांछि
तं तव ६७ न किंचिच्चकमे व्याधः प्रसादाच्च परं विभोः सह तेनैव भगवान्ययौ कैलासमीश्वरः ६८ दत्वास्वमांसनयने शबरोपि
यस्मै दूरीचकार महतीमपि कालभीतिं वंदे समस्तसुलभार्चितपादपद्मं तं चंद्रशेखरमपारदयांबुराशिं ६९ इति श्रीस्कांदोप

(margin notes:) नैवेद्याय ५८ ; किंतु मम संभवेत् ; ५९ ; ६२ ; ५५ अध्यायः

पुराणेभक्तविलासे किरातमुक्तिप्रदंनामपंचविंशोध्यायः २५ श्रीउमापतेविश्वेश्वरायनमः॥ श्रीअगस्त्यः
येनकेनापिनियमात्पूजयंतिमहेश्वरं येधन्याशंकरस्तेषामचिरेणप्रसीदति १ अस्मिन्नर्थेपुरावृत्तंइतिहासंब्रवीमिवः
यस्यश्रवणमात्रेणशिवभक्तिःप्रजायते २ दक्षिणापथमध्येस्तिचोलभूमिविभूषणं कलशीपुरमित्याख्यं यदिहब्राह्मणो
त्तमाः ३ यत्रप्रीतोमहादेवोमृकंडुसुतपूजया निहत्यकालंपादेनचक्रेतंचिरजीविनं ४ चतुर्वेदविदांस्थानंतदासीद्द्विज
जन्मनां शिवार्चनरतध्यानघंटाध्वनिपवित्रितं ५ तत्रास्तिब्राह्मणःकश्चित्कलानाथइतिश्रुतः वेदशास्त्रागमांभोधि
पारदृश्वागुरुःसतां ६ सशास्त्रंसर्वमालोक्यकर्मब्रह्मविविक्षया कथंचिन्निश्चयंचक्रेयथानस्यात्पुनर्भवः ७ अविधा
यथापूजांनमेभक्तिर्भविष्यति शिवभक्त्याविनाजंतुर्मृत्युंनातितरिष्यति तस्माद्दुःखनिवृत्यर्थंविधेयंगिरिशा
र्चनं नियमद्रव्यसंपत्त्यकयापूज्योमयाशिवः ९ केनसातिशयंभूयाच्छिवार्चनमितिद्विजः परीक्ष्यागममर्माणिधूपेबुद्धिं
दृढांदधौ १० तस्यभार्यास्मिताचंद्रवदनानामइंदोरिवचंद्रिका तयासहद्विजःशंभोःपूजायांनियमंदधौ ११ द्रोणगुग्गुलुधूलीभिःधूपं
देवायशंभवे कलानाथवितीर्णेनधूपजालेनभूयसा १२ पूजाकालेपुरारातेःसर्वाश्चामोदितादिशः परीक्षितुमनास्तस्यभ
क्तिंपरमपावनीं १३ विघ्नंचकारसर्वत्रतस्यद्रव्यागमोयतः धनेष्वलभ्यमानेषुकलानाथोमहामतिः १४ सभूषणानिविक्री
य नियमंपर्यपालयत् कंठसूत्रस्थितंहेमविनाभार्याविभूषणं १५ विक्रीयपूजयामासशिवंगुग्गुलधूपतः धान्यक्षेत्रग
हादीनांविक्रियादपिगुग्गुलुं १६ संपाद्यधूपयामाससंनिधौचंद्रशेखरं भार्याप्यनशनात्पुत्राःकृशांगास्तस्यजज्ञिरे १७ ह
संतिस्मजनाःशंभोःप्रसादःकमहानिति तथापिनात्यजद्धूपदानंधीरःशिवागतः १८ अथैकस्मिन्दिनेनष्टंसर्वंगुग्गुलुसं

१६ प्रस्थ

चयं नास्तिप्रसृतिमात्रंवा धान्यंतंडुलमालये १९ यदातदाकलानाथः प्राह भार्यांपतिव्रतां नवाहंसाध्विसाहाय्याद्पूजयंम
हाप्रभुं २० अस्मिंनक्षणपर्यंतंकेनस्याद्द्यपूजनं इति भर्तुर्वचंश्रुत्वासतीसाप्युत्तरंददौ २१ किमस्तिभवदज्ञातंभक्तिमीशःप
रीक्षते नियमंपालयाद्यापिमांगल्यमणिविक्रयात् २२ इतिभर्तुर्ददौहस्तेसूत्रमात्रधरासति तदादायकलानाथःप्रीतोस्तनवशं

मौ॰ लं॰ ५

करः २३ इत्युक्त्वापर्णमासाद्यगुग्गुलंद्रोणिकागतं विक्रीयतद्गृहीत्वाथसायंदेवार्चनंव्यधात् २४ कुबेरःशिवसंदिष्टःप्रदोषेतस्य
वेश्मनि ववर्षकांचनीधारांमेरुतुल्यांसमंततः २५ प्रसदृश्यंतगोष्ठेषुभूपस्यःकामधेनवः महामूल्यानिपात्राणिदासीदासाः
सहस्रशः २६ क्षौमाभरणकोशाश्च धान्यकोशाःपरःशतं पयःफेनोज्वलाःशय्याश्चोद्यानंनंदनोपमं २७ आसीत्स्वप्ने
तुतद्भार्यांतवैतानीति शंकरः बोधयित्वास्वयंदेवः तत्रैवांतरधीयत २८ अथस्तुलाकलानाथोत्रियामाप्रहरावधि महे
श्वरंप्रणम्याशुप्रतस्थेमंदिरंनिजं २९ स्वमिंद्रभवनप्रख्यंवेश्मदृष्ट्वातिविस्मितः किमेतदितिपप्रच्छदासीदासाभिनंदितः
प्रत्याहसाध्वीत्वत्पूजाप्रसन्नेनपिनाकिना भुंक्ष्व भोग्यानिदत्तानिदुर्लभान्यपिदैवतैः ३१ श्रीमांगल्यमणिक्रीतगुग्गुल्वर्पणतोषि
तात् शंभोःप्राप्तंत्वदैश्वर्यंपश्यशंभोरनुग्रहं ३२ इतिभार्यावदद्धीरःसोन्नदानपरोभवत् अर्चयामासहरवच्छिवभक्तान्
समागतान् ३३ गृहक्षेत्रान्नवसनवाहनाभरणादिभिः द्विगुणंधूपमीशस्यचक्रेगुग्गुलुधूलिभिः ३४ अथचोलेश्वरःश्रीमा
न् अदूरेलिंगमैश्वरं अंतराभुग्नमतनोत् ऋजूकर्तुंसमुद्यमं ३५ तारकापूजनमिति क्षेत्रेलोकेषुविश्रुतं बहवोमिलितास्तत्रना
नादेशांतरागताः ३६ जनाराजान्वहंचक्रे लक्षब्राह्मणभोजनं आकृष्यपलान्मनुजैः ऋजूकर्तुंनशक्यते ३७ यथातथापरंपलं
चोलेंद्रःसचकारह गजद्वादशसाहस्रहस्ताग्राकृ[illegible]ष्टदामभिः ३८ अप्याकृष्टंमहालिंगंनत्वासीत्समहीपतिः ॥श्रीशिवा

उषोषितश्चोलपतिः परां चिंतामवापह ३९ अथ द्विजान्नृपं प्रोचुः कलानाथं त्वयार्चितः यद्यागतस्तदा नूनमुपायं संवि
धास्यति ५० स्वयमागत्य चोलेंद्रः प्रार्थयामास तं द्विजं स तथेति समाहूतः स्थानं नत्वाप शांकरं ५१ आभुग्नं लिंगमालोक्य
बहुधा विहितस्तवः स्नानः कृतजपः शुभ्रो भस्मरुद्राक्षभूषितः ५२ निवार्य लौकिकोपायान् उत्सार्य च बहिर्जनान् स्वकंठे
शिवलिंगे च कृत्वैकं दाम सांजलिः ५३ ऋजूकरिष्यन्नित्याह वक्रतेयं कुतस्तव ऋजूभव महादेव नोचेन्मे मरणं ध्रुवं ५४
द्रुतं कृत्वा विचकर्षेशं लिंगं तज्जिह्मतां जहौ चोलेंद्रः प्रणमन्पादे लिंगं वीक्ष्य ऋजूकृतं ५५ को क्षितं किं वदेत्याह कलाना
थं द्विजोत्तमं अभिषेकजलाधारघटानयनकिंकरान् ५६ गजान्द्वादशसाहस्रसंख्यातान्नृतस्य शासनात् विद न्
धे देवदेवस्य चोलेंद्रश्चातिविस्मितः ५७ दिवि दुंदुभयो नेदुः पुष्पाणि ववृषुः सुराः ॥ प्रशशंसुश्च तत्कर्म खेचराश्चारणेः स
ह ५८ यथापूर्वं कलानाथः स्वपदं प्राप्य पूजयन् ॥ शंभुं गुग्गुलुधूपेन देहांते मुक्तिमाप्तवान् ॥ ५९ ॥ श्रीमत्कलानाथचरित्रमे
तत्पठंति शृण्वंति च ये मुनींद्राः ॥ आयुःश्रियं भक्तिमपीह शंभुर्मुक्तिं च तेषां भगवान्ददाति ५० इति श्रीस्कांदोपपुराणे
भक्तविलासे षड्विंशोऽध्यायः श्रीगौरीकेदारार्पणमस्तु संति लोका महाभागाः भक्तापेक्षितदानतः अवा अगस्त्य उ० ५
पुर्दुर्लभां मुक्तिं प्र सन्नात्पार्वतीपतेः १ माहेश्वरावदं तीमामितिहासं महाद्भुतं श्रवणाद्यस्य पापानि विलयं याति
देहिनां २ आस्पदं संपदामस्ति श्रीमत्कंचनदीश्वरं षडंगवेदविदुषामास्पदं तद्विजन्मनां ३ बालाकारांबुजालू
नाशेषकल्हारवासितैः सरैः समृध्दिरभितः संवृतं कुसुमाकरैः ४ उद्यानैरुन्मिषन्मत्तमधुव्रतकलस्वनैः वीथी

विहारविश्रांतदंतिदानाधिवासितं ६ नृत्यज्ज्ञातितुरंगांघ्रिसंक्षुण्णोदरमंदुरं कृशांगीजनसंगीतदंतसोपान
वापिकं यायजूकमखारब्धशालाशतसमुज्ज्वलं प्रशांतहरिणोपांतमठार्चितमुनीव्रजं ७ शिवभक्तद्विजाधीत
शतरुद्रीयजपनादितं कर्मकांडब्रह्मकांडवादिमंदिरशारिकं ८ दिवःप्रतिनिधीभूतंचतुर्वर्णनिषेवितं यत्रसंपूजि
तोभक्तैःसन्निधत्तेसदाशिवः ९ तत्रासीदुत्तमोराजामहेंद्रसमविक्रमः यस्यन्यायार्जितंद्रव्यंसंधत्तेमेरुणासमं १०
नित्यान्नदाननिरतोविख्यातोदिक्षुसर्वतः मानविक्रमशालित्वान्मानविक्रमनामकः ११ प्रजास्सपालयामासपि
तापुत्रानिवौरसान् प्रतिजज्ञेसभूपालःशिवभक्तेष्टपूरणं १२ प्राणपर्यंतदानेपिभक्तानांतन्मतिस्थिरा सनास्तिशि
वभक्तोनराज्ञायस्तेननार्चितः १३ भार्याकलावतीतस्यभानोरिवसुवर्चला तयोर्बभूवदांपत्यंरतिमन्मथयोरिव १४
ऐश्वर्येवर्तमानोपिमहतिस्मयवर्जितः नबभूवतयोःपुत्रःततश्चिंतापरोनृपः १५ भार्ययासहदेवेशमपत्यार्थंमहेश्वरं ॥
उपास्ततेनसंतुष्टःप्राहतंचंद्रशेखरः १६ नजन्मन्यत्रपुत्रस्तेकन्याकाचिद्भविष्यति इत्युक्त्वांतर्दधेशंभुर्मुदितौतौबभू
वतुः १७ गतेनातिचिरेकालेकन्याकाचिदजायत नष्टेवदृष्टिरंधस्यजाताशंभोरनुग्रहात् १८ जातकर्मचकारास्या
मुदितोमानविक्रमः षोडशेदिवसेनामसुकेशीतिव्यधत्तसः १९ माणिक्यमंचमध्यस्थशयनोत्तमशायिनी दिनेदि
नेसावव्रधेचांद्रीलेखायथोदिता २० कुटिलालकसंवीतंनिटिलोत्तललंतिकं चटुलेक्षणमुन्मीलदंतमालोक्य
तन्मुखं २१ अभ्यनंदन्महीपालोनिधिंदृष्ट्वेवनिर्धनः घनसाररजःसांद्रेस्वांकणेकृतचंक्रमां २२ जानुभ्यामपिबाहु
भ्यांनिर्निमेषमुदैक्षत धूलिकेलिपराबालाधूसरालकजालका २३ स्फुरदेकावलीसिंजत्कांचीनूपुरकिंकिणी ॥

रा०स०१

तनुपट्टांबरधरा तरुणायनलोचना २४ विस्मृताहारमवहद्धिकारैस्सिकेमनः कुबेराक्षीभिरन्यासांपांचालीद्वंद्वकंतुकैः २५ चिक्रीडसायंचसखीनयनाच्छादनादिना पुनःपुनश्चविस्तीर्णकबरीसंवृताननां २६ क्रीडांतरिषुबालायाःस्मृत मुद्दांतहल्लकं ह्रिंतालस्तबकाकारं कुटिलेकबरीभरं २७ जनाविलोक्यनगरे विस्मयंपरमंययौ कुरानरमात्रंतदा वृतोर्ध्वमुखांबुजं २८ प्रवृधकबरीभारं चंद्रोपरितमोयथा वर्धमानाग्देहेतस्य मेरौहेमलतेवसा २९ अतीतबाल्यापदे शामासन्नकुसुमोद्दयां अलंचक्रेतारुण्यबालामव्याजसुंदरी ३० यथामणिमहामौल्यः शाणोपलनिघर्षणात् मरा लावलिकाध्येयसोकुमार्यगतिश्रियं ३१ नखप्रभासमासक्तपरभागांघ्रिपंकजां शाम्लिगर्भधमोवृत्तजंघानिस्तलजानुकां रंभाप्रकांडस्निग्धोरुपुत्रावलिविभूषितां मेरुकांतारतटिनीपुलिनारोहमंथरां ३३ मनोभवरथाकृष्टचक्रचारुनितंबि नीं सदसत्संशयाधारमध्यांवटतलोदरीं ३४ स्तनाद्रिचरतारुण्यद्विपांदूरोमराजिकां वलित्रयप्रभाधूतनिक षास्वर्णरेखिकां ३५ अहिनिर्मोकधवलसव्यानस्थगितोरसं स्निग्धपल्लवकल्पद्रुशाखासमभुजद्वयां ३६ कंठनालपरा भूतपांचजन्योदरश्रियं बिंबाधरांतविश्रांतमंतस्मितमनोहरां ३७ लावण्यामृतसंदोहसमानरदनद्युतिं कपोलश्रीजितानं गरतिविभ्रमदर्पणां ३८ उन्नमन्नासिकाधूतवज्रपुष्पसदोदयां लावण्यलहरीचारुविहारन्मीनलोचनां ३९ विश्रां तयमुनावीचीभ्रूविभ्रमविमोहिनीं॥ चतुर्थीचंद्रसश्रीकललाटतिलकोज्वलां ४० कर्णाभरणमाणिक्यमयूखालंकृताल कां अंशुकाडंबराक्षिप्तकिंशुकप्रसवप्रभां ४१ मंजीरमेखलाहारग्रैवेयकटकांगदैः नासामौक्तिकताटंकचूडामणिवि भूषणैः ४२ भूषितांमान्मथींमूर्त्तींमिंदुजालकलामिव कलालापसुधाधूतगंधर्वालोपतंत्रिकां ४३ तांदानुच

थ

स्थि

त्ति

मानविक्रमः१

राशे१ मेनत्र कलिकामायभूपतिः लग्नं शुभं विनिश्चित्य नगरीं समभूषयत् ५४ आहूता बांधवास्तेन समवेतास्तदालये राजानश्चाययुः सर्वे नानो
पायनपाणयः ५५ ध्वजानशेनगरं सर्वं धूपः कालागरूद्भवः दिशो मुखरयांचक्रुः वादित्राणि समंततः तोरणैर्भूषितावीथ्यः सर्वा गांगे
रिवोर्मिभिः अभ्यनंदनूपरिजनानंदः हाहमहोत्सवं ५७ ततस्संनिहिते लग्ने कलिकामो विभूषितः स्वबंधुभिर्गजारूढोययौ राज
निवेशनं ५८ प्रत्युज्जगाम राजापि कन्यामादाय भूषितां भूषयामास कन्यां च वस्त्राभरणचंदनैः ५९ शंखतूर्यमृदंगानां नादे व्यो
म्नि विसर्पति कुलपालिकसन्मुक्तलाजपुष्पनिरंतरां ५० विवाहवेदिकां तत्र कलिकामो विवेश ह एकासनस्थितो वी
क्ष्य बांधवास्तौ वधूवरौ ५१ दांपत्यमेतयोरासीत् रतिमन्मथयोरिव एवं संभाषमाणास्ते चक्षुः प्रीतिपरां दधुः ५२ तदा मा
हेश्वरः कश्चित् प्रत्यदृश्यत संसदि आपादमस्तकं शुभ्रभस्मना लिप्तविग्रहः ५३ केशदामपरिष्वक्तवराटशतसंवृतः कर्णद्वित
यसंस्यूतमहास्फटिककुंडलः ५४ कपालपात्रं बिभ्राणः परशुं च करे परे किंचिदापूरणीयातां बिभ्रत् संचवटीमयीं ५५ भुजंग
कटिसूत्रांतकंथाकौपीनभूषणः आपीनांसो महाबाहुः मांसलो रक्तलोचनः ५६ भाषया भीषयन् सर्वान् उपागान्मानवि
राजा मं ८ क्रमं अथ संपूजितस्तेन राज्ञा दत्तासने स्थितः ५७ जनानां संभ्रमः कोयमिति पप्रच्छ भूपतिं संप्रीतश्च महीपालः तापसं प्रा
ह सांजलिः ५८ स्वके शीममकन्येयं कलिकामायदीयते दिष्ट्या मुहूर्तसमये प्राप्तस्त्वं किमपेक्षितं ५९ अथ राजवचः श्रुत्वा
कंपयन्मौलिमात्मनः माहेश्वरस्तं प्रत्याह दीयते नैव दीयते ६० प्रति जल्पितो नृपतिना तथेत्याह स तापसः मद्वाक्यं शृणु
माकार्षीरमर्षं मानविक्रम ६१ असंपूर्णमिमां पश्य प्रियां पंचवटीं मम विलूय कन्याकबरी दीयतां किं विलंबसे ६२ तदाकर्ण्य
जनाः सर्वे कर्णे विन्यस्तपाणयः हंत हंतेति जगदुः चुक्षुभे न महीपतिः ६३ माहेश्वरः पुनः प्राह दीयते चेन्न गम्यते इत्युक्तातुष्ठ
तो योगमुपवेश्य वरासने ६४ वंदस्व तापसमिति प्राह कन्यां निजां नृपः वंदनं चापि भार्यायाः कथमित्स विलोकयन् ६५ उत्ति ४१

२ केशसहितः

छल्यानमस्कृत्वास्फकेश्याः कबरीभरं विरूयामूलमुकुलहल्लकामोदवासितं ६६ निजश्छुरिकयाधीरो निःशंकं शंकरप्रियः ॥ मायामाहेश्वरायादात्सकेशः सतिरोदधे ॥ ६७ ॥ कलिकामस्यवदने यावत्कार्ष्ण्यं विदृश्यते ॥ तावत्सएवधमिल्लो राजपुत्र्याव्यवर्धत ॥ ६८ ॥ देवोपिवृषभारूढोनृपतेरग्रतोभवत् ॥ शतशः प्रणनामेशं भीतिमान्समहीपतिः ॥ ६९ ॥ कलिकामेपितांकन्यां उद्धेश्वरशासनात् प्रीतिमापपरामिंद्रः पुलोमतनयामिव ॥ ७० ॥ परीक्षितोसिराजन्त्वं दृढा भक्तिर्यतोमयि ॥ दत्तामुक्तिरिती शोपितेनापरजताचलं ॥ ७१ ॥ स्वकालपाशेनसहावलूयभक्त्याननूजाघनकेशपाशं ॥ रात्तेवदान्यायपिनाकपाणिः दत्ताभयः पातुभवोपदोनः ॥ ७२ ॥ इति श्रीस्कांदोपपुराणे भक्तविलासे २ श्री अगस्त्य ॥ मुक्त्युपायेनिस्फलभेविनायलेनदेहिनः ॥ यत्नंतेदुर्लभेप्यत्र साहसंकिमतः परं ॥ १ ॥ द्रव्यदेशक्रियाकालमंत्रकर्त्रादिशुध्यः ॥ क्वयत्नहेतवः क्वायं विषयव्यापृतोजनः २ क्वनुवैराग्यनिष्ठार्यसीमाब्रह्मादिदुर्लभं क्वनुवेदांतविज्ञानं तत्साध्यं क्वायमल्पधीः ३ तस्मादन्यत्परित्यज्य विशिष्यचकलौयुगे भक्तिरेवमहादेवेकर्तव्यामुक्तिमिच्छता ४ पूजनीयः सदाशंभुः कालकर्मभयापहः अक्लेशशुभ्रद्रव्येण प्रसीदत्यर्चितोविभुः ५ लिंगार्थं सुलभोनद्याः सिकतादिश्च निर्मलः जलदूर्वादिविपिने कर्तव्यः सकृतांजलिः ६ एतत्कर्तुमशक्यस्य ज्ञातुं चेत्सफलं भवेत् यथाकाशचंद्रग्रहणं शिशोश्च सफलं तथा ७ अपि शाकं नियमतो भक्त्या शंभोः समर्पयेत् योवाकोवापिमुच्येत संसारात्सत्यमुच्यते ८ अस्मिन्नर्थे पुरावृत्तमितिहासमिमं विदुः श्रृणुत श्रद्धया विप्रा भक्त्यार्माहात्म्यमुत्तमं ९ अस्तिशालीसहोद्भूतेअपिकांतारकोद्भवैः मौक्तिकैः सांद्रकेदारोदेशश्चोलेंद्रपालितः १० सूर्याश्वखुरनिर्भिन्ननारिकेलफलांभसा निष्पंदैर्यत्रविच्छिन्नैर्नदीमातृकतांगतः ११ कावेरीतीरपर्यंते तत्रास्तिचपुरं महत् चतुर्वर्णाश्रमयुतं नामतः कणमंगलं १२ अस्त्येकः शंकुलादायना

केलार्थं ५

तथाभवेत्

मागांगेयवंशभूः हालिको दिक्षु विख्यातः शिवभक्तार्चनेरतः १३ सकौशद्पमात्रस्थे श्रीचिदंबरनामके वाल्यएवपरां
भक्तिमुवाहानन्यदुर्लभां १४ तस्यभक्तिमतीनामभार्यातुल्यान्वयाभवत् तयासहप्रतिदिनं चिदंबरमहेश्वरं १५ नत्वानियमनैवे
वेद्यं दत्वाभुंक्ते निशामुखे श्रीऋषयः किंवा नियमनैवेद्यं शंकुलादायकल्पितं १६ वंदे तत्कुंभयोनेनः प्रीतोयेनसभापतिः श्री
अगस्त्यः नवीनशालीसंभूतंशुभ्रतंडुलमक्षतं १७ ससंपाद्यचशाकंचसहचूतशलाटुकं प्रपच्छतिनटेशायकृत्वासंकल्पित
व्रतं १८ कारयित्वभिषेकंच विशेषदिवसेसति तस्यैवंवर्त्तमानस्यगताःषोडशवत्सराः १९ तस्यभक्तिपरीक्षार्थमासीत्कौतु
कवान्हरः महामारीप्रकोपेननष्टंगोधनमुत्तमं २० सस्यानितस्यनशानि ह्यनावृष्ट्याथमंदिरं सधान्यधनकोशंचवन्हिदग्धं
क्षणादभूत् २१ तथापिचुक्षुभेनैवसभक्तः सहभार्यया कृषिमानर्थमादायशंभोः पूजामचीकरत् २२ शकुटंनिष्कुटेस्वीयेबहुधा
समवर्धयत् तेन तौदंपती कृत्वावृत्तिं तुष्टौचिरार्जितैः २३ शालिभिः शंकरस्यैवनियमार्चां वितेनतुः कोद्रवैश्चापिगोधूमैः श्या
माकैश्चकुलुत्थकैः २४ कुल्माषैर्जीवनोपायं विधायसहभार्यया वर्त्तमानस्यभक्तस्यचित्तमीश्वरदर्शनात् २५ कर्त्तुं नियमनैवे
द्यं सुलभाः शालयोभवन् सोमवारदिनेक्वापिशंकुलादायनामकः २६ कृत्वाभिषेकद्रव्याणि भार्याशिरसिचस्वयं शाली
तंडुलमुद्धृत्य शाकंचूतशलाटुकं २७ वहन्मूर्ध्निमहेशस्यपूजार्थंसायमाययौ गव्यानिपंचतैलंचनारिकेलफलानिच २८ बो
ढुमत्यक्षमास्साध्वीपश्चान्मंदमुपागमत् आदित्यायाहिहे भद्रे दृश्यते गोपुरं विभोः २९ इतिकिंचिद्विवृत्तास्योभूत्वाहूयकुटुंबि
नीं गंतुमैच्छत्तथाग्रे ग्निपुरस्तादस्खलत्पदं ३० क्वचिन्मूर्ध्निचतत्पात्रंन्यपतद्भुवितंडुलाः सरक्तशाकं विविशुः सहचूतशलाटु
कं ३१ निदाघतपनापुष्टभूगर्त्तांक्वापिभूसुराः खिन्नस्तदाविनिःश्वस्यव्रतभंगं विनिश्चयन् ३२ स्मृत्वासकुंशंकुलादायःस्वयंनि

उत्तरुदंरुशाकं ७

खादारो २

अमिदृत्वेश्वालाटुः सात ४
शंकुलादायस्य ५
शालिजातिः ९
रुहारामः ९

यममादधे ममास्तमरणंश्रेयोनन्वस्माद्व्रतभंगतः ३३ न्यधत्तचायुधंकंठे शंभुराविरभूत्तदा तावत्तस्तंडुलास्साज्यशाकचूतशला
टुकाः ३४ दर्शिताःशंभुनावक्त्रे तद्गुलाद्गृहा चायुधं वृषभारूढमीशानंदंपत्योःसेव्यमानयोः ३५ असकृन्यपतद्भूमौदिव्याःकुसु
मवृष्टयः तयोःसायुज्यमुक्तिंचदत्वादेवोमहेश्वरः ३६ पश्यतांसर्वदेवानांकैलासशिखरंययौ ३७ इतिश्रीस्कांदोपपुराणेभक्तविला
सेअष्टाविंशोध्यायः २८ श्रीअगस्त्यः सपर्यांशांकरींकर्तुमशक्तायेमुमुक्ष[illegible]वः नामसंकीर्तनंशंभोस्तेषांमोक्षैकसाधनं १अ
त्रैवोदाहरंतीमसनकाद्यामहर्षयः इतिहासंमहापुण्यमयत्नान्मुक्तिसिद्धिदं २ अस्तिश्रीचोलराजेंद्रकोशवृद्धिंकरोमहान् श्री
मौञ्जनपदःशंभोस्स्थानैर्दिक्षुविभूषितः कवेरकन्यकायत्र बालकानिवपादपान् पुष्णातिपयसानित्यंपुष्पारामशतैस्सह ४ कदली
दलगर्भेषुवातवारिविलाहकैः घनीभावंगतंयातिदिव्यकर्पूरसारतां ५ यत्रकुमुकराजद्गुस्तबकामोदवीचिषु क्रीडतांमत्तभृंगा
णांझंकारैर्मुखरादिशः ६ स्वपंतिवापीनलिनीषुहंसाःचूतप्रवालेषुपिकाश्चयत्र विलासिनीकुंतलगर्भशय्यामध्यास्यमत्ताभ्र
मरारमंते ७ मंगलाख्यंपुरंयत्रपुंडरीकपुरांतिके अस्तितत्रसदैवास्तेदेवीमंगलदेवता ८ गोनाथइत्यभूत्कश्चिद्गोपालकुलसं
भवः कुलक्रमागतंयस्यदेशगोकुलरक्षणं ९ सबाल्यएवगारक्षन्नूब्रत्सरणेविजितेंद्रियः घृतैःपयोभिःदधिभिर्द्विजान्शुश्रू
षतेन्वहं १० तस्यप्रीतोमुनिःकश्चित्संजातोभार्गवान्वये प्रार्थितःप्रददौतेनपंचाक्षरमनुत्तमं ११ सहात्रिंशत्सहस्राणिजजा
पानुदिनंसुधीः महामंत्रजपस्तत्रमहिमानमवर्धयत् १२ पालकस्यगवामंतःसर्वंशिवमयंजगत् व्रजन्तिष्ठन्शयानश्चभुं
जानश्चपिबन्नपि १३ नविसस्मारतंमंत्रंतद्दातारंचदेशिकं शिवशंकरगौरीशनीलकंठत्रिलोचन १४ महेश्वरमहादेवत्रिपुरांतकधू
र्जटे कालशासनकामारेबालचंद्रकलाधर १५ कारुण्यालयपाहीतिसदाभक्त्याप्रजल्पति जिह्वाजल्पतिनैवान्यत्गोनाथस्यमहो

त्मनः १६ प्रीतस्तस्य महादेवी भारती समचोदयत् सा स्वप्ने तु समागत्य ददौ वेणुमनुत्तमं १७ उत्थितः सहसा हृष्टो वेणुमालोक्य गोपतिः गातुमैच्छस्मरारेभे पंचाक्षरमहामनुं १८ अथ मंत्राक्षरं भ्रस्य मणिवेणोर्महायशाः आधरं भ्रे धरं न्यस्य रंध्रे ष्वन्येषु चांगुलीः १९ व्यापारयन्यथास्थानं जगौ सप्तस्वरान्वितं अपदानं महेशस्य यूथं पुलकयन्गवां २० भावावेशावशं विश्वं कृत्वा स्थावरजंगमं तोषयामास देवेशं वेणुनादामृतेन सः २१ दिने दिने च गोनाथवेणुगानरसाहृताः ग्रावाणस्तनुतां याताः शुष्कवृक्षाश्च पुष्पिताः २२ अथैकस्मिन्दिने प्रातश्चारयित्वा स गोकुलं प्रातिष्ठत प्रतिवनं गोपालशतसंवृतः २३ संचारयित्वा गास्तत्र तृणसौहित्यमंथराः छायांतरेषु वृक्षाणां शरीरं स्वं न्यधाद्भुवि २४ दामाकलितचूलीकः कटीकलितकंबलः नमेरुतरुसंसक्तापरांगो भुग्नकंधरः २५ सन्यस्तवेणुरधरे त्रिभंगिललिताकृतिः निषादर्षभगांधारषड्जमध्यमधैवतान् २६ त्रिषु त्रिषु पिरंध्रेषु चालयन्पंचमं पुनः पंचमे मूर्छयामास सक्षिपन्सकलं जगत् २७ अगायत्स्वरमीशानं ध्यात्वा पंचाक्षरीमनुं कलं जगौ कलालापान्मुद्रयन्पिकोविलन् २८ अमंदतारमच्छिद्रमविलंबितमद्भुतं पयोहीनास्त्रवद्दुग्धा गोगर्भस्थिरगर्भवत्स्यपि २९ यथा दोग्ध्रीभवत्सधीरा गावस्तथा जगौ वेणुनादामृते विश्वं चराचरममज्जयत् ३० तस्य गीतिरसाकृष्टैः वियद्विमानिकैर्वृतं विस्मृतान्योन्यवैरैश्च महीव्याघ्रगवादिभिः ३१ आसीत्सपदि नीरंध्रा तस्मिन्गायति वेणुना स्वरयोगः समं वेणोः बबंधे तस्य सत्तथा ३२ कपर्दादिव निर्याति हृ देवस्य जान्हवी वशीकृत्य जगत्सर्वं गीतेनाब्रह्मकीटकं ३३ नृत्यत्तोनुपपातांरात्कर्णे हिमसभापतेः अथ कनकसभेशः सार्धमागत्य गौर्या श्रुतिमधुरमुदारं गीतमाकर्ण्य तस्य प्रमदभरितचेतो मुक्तिमस्मै वितीर्य श्रुतिभिरभिनुतांघ्रिः संपदं प्रापभूयः ३४ इति श्रीस्कांदोपपुराणे भक्तविलासे एकोनत्रिंशोध्यायः २९ श्री विश्वनाथ सपरिवाराय नमः श्री अगस्त्यगु॰ ॥

कोमलतो ५

षड्ज॰

स॰२

नटेश्रास्य३

४९

अगस्त्य उ०१ ४ चंद्रचूडार्चने नित्यं चंदनादिप्रदानतः इहैव श्रियमासाद्य प्राप्ता मुक्तिं च केचन १ अत्रायमितिहासोस्ति शिवभक्तैरभिष्टुतः श्रीमतो मू

वैश्यस २ र्तिनाथस्य च रितं यत्र गीयते २ अस्त्यगस्त्य दिगंगाक्षि मुखश्रीतिलकायितं प्रथितं त्रिषु लोकेषु नगरं मधुराह्वयं ३ यत्र मौक्ति

कताटंकमंडिता शफरेक्षणा ममतां सततं धत्ते माता त्रिजगतामपि ४ यत्र पांड्यमहाराजपूजितः परमेश्वरः विराजते चतुःषष्ठि लीला

रत्नाकरः सदा ५ यत्र लीलाशुकालापरसिकां परदेवतां विरिंचि विष्णु वीशपदं वदान्यापांगवीक्षणं ६ कदंबवनसंचार झणझणि

तनूपुरां अच्युताद्यवतार श्री नेत्रमीनोत्पलाकृतिं ७ अंशुकद्युतिनिर्धूतकिंशुकस्तबकप्रभां नखनादितमाणिक्यवीणाकोरकित

द्रुमं ८ महानीलमणिश्यामां मलयध्वजकन्यकां अर्चंति तां मन्त्रासंभूते र्दिव्यैश्च नवमौक्तिकैः ९ नित्यमप्यमराधीशेनैवानमितमौ

कयः दक्षिणाशाधनाधीशाः पांड्यवंशभवा नृपाः १० सर्वसंपत्समृद्धासासमृद्धविपणापणा बभूव भूषणं भूमेर्दोर्शिवप्रतिबिं

बितं ११ तत्रास्ति मूर्तिनाथाख्यो वैश्यवंशो महाधनः किंकरः शिवभक्तानां शंकरे दृढभक्तिमान् १२ दृष्ट्वा भस्म च रुद्राक्षं प्रेमैणे सा

हितांजलिः ननदस्त्यन्यतः क्वापि रत्नाद्यस्य न यद्गृहे १३ सोनंदीपान्तरानीत दिव्यचंदनलेपनं नित्यं हालास्यनाथस्य कारयामास भ

क्तिमान् १४ एवं नियमशीलस्य ययुर्विंशतिवत्सराः तदा पांड्यपतिस्त्रेणो नैव किंचिद्विचारयत् १५ रंध्रान्वेष्या ध्रनपतिर्मधुरा

मभ्यवर्तत स निष्कास्य पुरात्पांड्यं राजाभूज्जिनसेवितः १६ तस्य प्राग्जन्मपापेन जैनतंत्रे भवन्मतिः वेदनां पंचकं यत्र मूर्तेरालेति गीय

ते अवतीर्णो मितेनत्र वेदे विद्वेषवानभूत् ततो भूद्वैदिकद्वेषी वेदांताध्वरदूषकः १८ क्रमेण द्विजदेवानां संपूजां न्यरुणत्तदा स्वमतानुस

तानेव पूजयामास नेतरान् १९ मूर्तिनाथं विना तत्र बभूवुस्तन्मतानुगाः मधुरानगरे सर्वे यथा राजा तथा प्रजाः २० मतानन्नुप्रवेशि

त्वान्मूर्तिनाथो विरोध्यभूत् आज्ञातिलंघने राज्ञां कोपः खलु सुदारुणः २१ सपंचपरमेष्ठिश्रि चरणांभोरुहार्चकः सप्तभंगीप्रपूजा

स्कवंचयामास वैदिकान् २२ अप्रत्यक्षं कथं वा स्यात्प्रमाणमिति पालयत् खिलीचकार पाषंडो वैदिकं मार्गमुत्तमं २३ हरिशंकरपूजाया

अंध्रदेशस्य कलिंगराजा ६

शिवे धीन् ९

मेंतरायपरंपरां आविष्कुर्वन्त्रयीब्राह्मानर्चयामासदुर्मतिः २४ यदाहालास्यनाथस्यसपर्यातेनविघ्निता मूर्तिनाथस्तदास्त्रीयैःपूजांप्रा
वर्त्तयज्जनैः २५ पूजांहालास्यनाथस्यमूर्तिनाथप्रवर्तितां निजाज्ञोल्लंघनंचापिदृष्टातंतुमहीपतिः २६ विनामदनुमत्यायोविक्रेताचं
दनस्यसः वध्यःस्यादित्यापणेषुघंटांनित्यमघोषयत् २७ मूर्तिनाथस्तदारभ्यसंगृहीतैस्तुचंदनैः नित्यालेपनमीशस्यनिर्विघ्नम
तनोच्चिरं २८ यदानलभ्यतेक्वापिचंदनंवणिजांवरः विचारमगम द्घोरंहालास्येशंविचिंतयन् २९ अद्यास्तिचंदनंशंभोस्तवाले
पनसाधनं श्वःकरिष्यामिकिंवाहंहालास्येश्वररक्षमां ३० इत्युक्त्वादत्तपाटीरो वणिक्कामनयन्निशां अथप्रातस्समुत्थाययावदर्को
स्तमिच्छति ३१ पर्यटन्नगरेतावद्वणिग्गेहेनचंदनं अथहेमार्जनीतोयेस्नात्वांभसितलांछितः ३२ अदत्तचंदनस्याद्यममहस्तेनकिं
भवेत् इतिप्रकोष्ठमापेष्टुंयावच्छाणोपलेर्पयेत् ३३ तदातंवारयामासवाणीकाप्यशरीरिणी मैवंकुरुभवानेवभूत्वापांड्यमहीपतिः ३४

शारा पा बालोव
एतत्र

वेदबाह्यांनिराकृत्यवैदिकान्स्थापयिष्यति अद्यायेशत्रुणायुद्धेनिहतोमृत्युमेष्यति ३५ पश्येत्याकर्ण्यहालास्यनाथसन्निधिमापसः

मूर्त्तिनाथः २

अथान्येमधुरामेत्यरुरुधुर्जिनशत्रवः ३६ आंध्रनाथोपियुयुधेनिर्गतोनगरात्सतैः रणेप्येनंप्रहरंतोसंचतेविलयंययुः ३७ हताव
शिष्टजैनास्तुदूरेदुद्रुविरेदिशः ततस्तुसचिवाःसर्वेसंभूयेश्वरशासनात् ३८ दुकूलबध्ननयनंनगरेचालयन्गजं सोंतःशिवालयं
गत्वागृहीत्वामूर्तिनायकं ३९ निजस्कंधेतमास्थाप्यप्रतस्थेवीथिकांतरे ववर्षुःपुष्पवर्षंचखेचरानागरैःसह ४० अस्तुवन्वंदिन
श्चापिदिविभेर्यश्चदध्वनुः सिंहासनेप्रतिष्ठाप्यमूर्तिनाथंगजेश्वरः ४१ अभिषिंचत्स्वहस्ताग्रकलशामृतधारया अथाभिषिक्तः
साम्राज्येमूर्तिनाथोमहीपतिः ४२ वेदबाह्यांसमूलान्मेचक्रेवैदिकसंमतः चंदनालेपनंशंभोःसांद्रंकालत्रयेव्यधात् ४३ वैदिकान्स्था
पयामासपांड्यभूमिमवर्धयत् शतसंवत्सरंराज्यंकृत्वावैदिकसंमतः ४४ मुक्तिंहालास्यनाथस्यप्रसादादगमत्ततः मूर्तिनाथस्य

न्

चरितं शृण्वंति च पठंति ये ४५ तेषां शिवप्रसादेन कैलासं स्फलं भवेत् इति श्रीस्कांदोपपुराणे भक्तविलासे त्रिंशोध्यायः॥ श्रीकाशीकेदारेसंगतिः॥ अगस्त्यः॥ पंचाक्षरादिभिर्मंत्रैर्दिव्यपुष्पैर्महेश्वरं नित्यंपूजयतां पुंसां पुनर्जन्म न विद्यते १ अत्रैवो दाहरंतीदं नंदिकेशाच्युतादयः चरितं स्कंदनाथस्य शिवभक्तशिखामणेः २ अस्ति कावेरिकावारिप्ररोहत्सस्यसंपदि देशे दिव्यपुरे रम्ये देवद्विजविभूषिते ३ अग्रहारो महानस्ति श्वेतद्वीपद्दार्णवे आश्रयः सर्वभूतानामावासो ब्रह्मवादिनां ४ दीनांधपंगुबधिरमूकानां थरुजापहः शरण्यभूतः सर्वेषां प्रख्यातः शरणार्थिनां ५ अग्निहोत्राग्निसंभूतहविराज्यकुशेधसां धूमेनामोदसांद्रेण समाक्रांतदिगंतरः ६ वध्वधी ऋग्यजुःसामध्वनिध्वनितमंटपः पदवाक्यप्रमाणज्ञैः शोभितो ब्राह्मणोत्तमैः ७ तटाकोपवनोद्यानपुष्पगंधाधिवासितः यूपालंकृतपर्यंतवेदिकाशतसंवृतः ८ अष्टादशपुराणार्थवेदनानिकषोपलः तत्र भूद्भूलणः कश्चिच्छिवनाथान्वयो महान् ९ प्रतिग्रहे समर्थोपि प्रतिगृह्णाति न क्वचित् तत्रोंछवृत्तिर्निवसन् प्रत्यहं नूशिवमर्चति १० तस्यैवं वर्त्तमानस्य महादेवप्रसादतः पुत्रो वै स्कंदनाथाख्यः कश्चिदासीन्महामतिः ११ नित्यं पूजयितुः शंभुं स पितुः सविधे व सन् स्वयं स्निग्धोपलेक्कापि पत्रैरर्चयतीश्वरं १२ पितासंवत्सरे षष्ठे ददौ ब्रतमनुत्तमं वेदानध्यापयामास षट्शास्त्राण्यपाठयत् १३ व्याकरोदथ मीमांसां पुराणार्थान् निबोधयत् पंचाक्षरं महामंत्रं ददौ लग्ने शुभे सुधीः १४ पूजाविधिं महेशस्य पाठयामास सूनवे स परीक्षितसर्वशास्त्रतत्त्वस्स विकल्पं सकलं निरस्य दूरे गिरिशार्चनमेव निर्विकल्पं निरपायार्थकरं स्म निश्चिनोति १६ अथ काले गते तस्मिन् शिवनाथे दिवं गते गतिं कालस्य महतीं स जानन् समशोचत्ति १७ कृत्वोर्ध्वदैहिकं तस्य वेदोक्तेनैव वर्त्मना॥ दधार परमां भक्तिं परमात्मनि शंकरे १८ पुष्पारामं स्वयं कृत्वा पुष्पाणि समवर्धयत् तत्रत्यैरेव कुसुमैरर्चयामास धूर्जटिं १९

द्वीपनाम ४

द्वीपः

भा

जटावान्चीरवसनो भस्मरुद्राक्ष भूषितः पंचाक्षरेण महता मंत्रेण कुसुमैर्हरं २० अर्चयन् गमयामास समयं न वृथा क्वचित् जपन् द्वादशसाहस्रसंख्यं पंचाक्षरीमनुं २१ पुष्पैर्द्वादशसाहस्रसंख्यैरानर्च शंकरं ॥ अवकाशे स नित्यापि महेशं हृदि भावयन् २२ प्राग्जन्मस फलीकुर्वन्नभिष्टौति ससादरं नमः शिवाय त्रिगुणात्मकाय नमः शिवाय त्रिविधात्मनेते २३ नमः शिवाय त्रिजगद्विधात्रे नमः शिवाय त्रिदशैकधाम्ने इति स्तुवन् महादेवं शिवभक्तद्विजोत्तमैः २४ पूजितश्च यथा शंभुः विरक्तः सर्वतो भवत् गौरीस्तन्यामृतास्वा दधन्यो भक्ताग्रणीश्च सः २५ यस्य सौहार्दलाभेन कृतार्थं स्वममन्यत सदृत्थमभ्यर्च्य महेश्वरं सदा महामनुं च प्रजपन्नितन्वन् ॥ स्तुतिं च देवस्य विभोः प्रसादादावृत्तिशून्यां च गतिं प्रपेदे २६ इति श्री स्कांदोपपुराणे भक्तविलासे एकत्रिंशोध्यायः श्री शिवः अगस्त्यः ॥ वेदसारेण ये देवं महांतं समुपासते न गर्भवाससंक्लेशास्तेषां भूयो द्विजोत्तमाः १ दुर्लभं ब्राह्मणकुले जन्म प्राप्यापि किंचन नयंतीह वृथा कालं रुद्राध्यायपराङ्मुखाः २ अजप्त्वा शतरुद्रीयमन्यत्रापि कृतश्रमः विंदति यदि कैवल्यं तन्मिथ्या दप्यनश्वतः ३ दृष्ट्वापि हयमेधेन पुनरावर्तते मुनिः शतरुद्रीयजपकृत् न हि भूयो निवर्तते ४ स्तेयं कृत्वा सुरां पीत्वा हत्वापि गुरुदारिकां यदि प्रमाणमाम्नायो रुद्राध्यायी विमुच्यते ५ श्री रुद्रसूक्तं प्रजपन्नियमेन द्विजोत्तमाः दर्शनाल्लोकपापानि हरत्यर्को यथा तमः ६ अपि गोघ्नः कृतघ्नो यः शतरुद्रीयमंत्रतः लिंगे शिवं समभ्यर्च्य लिप्यते नाब्जपत्रवत् ७ आद्यंतयोर्यः प्रणवेन युक्तं श्री रुद्रसूक्तं प्रजपत्यघघ्नं तस्यांघ्रिरेणुः शिरसा वहंति ब्रह्मादयः स्वाघविशुद्धिकामाः ८ यथा सर्वेषु तेजस्सु ज्योतिः सौरं महत्तरं तथैव मंत्रकोटीषु शतरुद्रीयमुत्तमं ९ सद्योजातादिभिर्मंत्रैः धृत्वा भस्माभिमंत्रितं यो जपेच्छतरुद्रीयं धृत रुद्राक्षमालिकः १० अभिषिंचन्महालिंगे महादेवं महेश्वरं त्रिसप्तकुलमुद्धृत्य शिवलोके महीयते ११ यतः कुतश्चिद्विहिता न्नभक्षणः यतः कुतश्चापि कृतप्रतिग्रहः श्री रुद्रजापी दुरितानि सर्वशः विहाय मुक्तः स भवेद्ध्रुतिर्यथा १२ इतिहासं वदामी

वंदत्तिहासं १

ह श्रृणुत श्रद्धया द्विजाः श्रुत्वायं शतरुद्रीये पुमान्भवति भक्तिमान् १३ अस्ति श्रीसह्यजातीरे श्रीकालाख्यपुरं महत् वेदशास्त्रार्थ तत्त्वज्ञैः यज्वभिः समलंकृतं १४ तत्र कश्चिद भूद्विप्रः षडंगाम्नायतत्त्ववित् स नित्यं सह्यजातोये स्नात्वाहुतहुताशनः १५ कंठदघ्नजले स्थित्वा रुद्रा ध्यायं जपत्यसौ पुष्पैः श्री रुद्रमंत्रेण समर्चयति शंकरं ॥ १६ जपतः शतरुद्रीयं तस्य श्रुत्वा त्रियोजनं विमुक्तशापा अभवन् पैशाचीमास्थितां तनुं १७ तस्य श्री शतरुद्रीयजपमहात्म्यवेदिभिः पशुपत्य भिधादत्ता वसिष्ठाद्यैः मुनीश्वरैः १८ द्रोणपुष्पैः सनिर्दोषैः बिल्वपत्रैरखंडितैः तिलाक्षतैश्च दूर्वाभिः शम्याकैरुत्पलैरपि १९ शतरुद्रीयमंत्रेण शंकरार्चनतत्परः जिगाय सकलान्लोकान् ब्रह्माद्यैरपि पूजितः २० अणिमादिविभूतीश्च तृणीचक्रे महामतिः पशुपत्यर्पितपुष्पं सदा शंकरमूर्धनि २१ शैलादिप्रमुखास्सर्वे दृष्ट्वं तं प्रशशंसिरे श्रीरुद्रीयमहात्म्यविद् स्वपुत्रान् शिष्यांश्च शैवार्चनजागरूकान् भुवि प्रतिष्ठाप्य शिवप्रसादात् द्विजोत्तमो धाम जगाम शंभोः २३ इति श्रीस्कांदोपपुराणे भक्तविलासे द्वात्रिंशोध्यायः ३२ श्री काशीनाथगुरवे नमः॥ श्री अगस्त्यः॥ सन्निधौ प्रणतिं शंभोः नियमेन दिने दिने कुर्वंतिये हरस्तेषां जन्मदुखं निरस्यति १ अस्त्यासनाख्यं श्रीचोलविषयाभरणं पुरं वेदवेदांगतत्त्वज्ञैः क्रतुप्रवरदीक्षितैः २ निष्ठाविशेषनिर्धूतवसिष्ठादियशोभरैः आतिथ्यकारिभिः शांतैः दांतैरगन्याहितैरपि ३ अधिष्ठितं सदा सद्भिः ब्रह्मघोषाभिनादितं तस्य पर्यंतकेदारकुल्यारोधसि काचन ४ श्रेण्यंत्यजानां महती रुधिरैः पंकिलांतरा पुराणमांसखंडास्रग्वासनाहूतवायसा ५ कुक्कुटानां महारावसन्नादितदिगंतरा पर्यंतशुष्यद्गोचर्मपर्यस्तत्रीहिसंचया ६ मद्यास्वादमदोन्मत्तचंडालकुलसंकुला तत्रास्ति नगरे ख्यातः कश्चिन्नंदाह्वयोंत्यजः ७ स दिष्ट्या बाल्यमारभ्य दृढभक्तिः शिवे भवत् स शिवालयवाद्यानां जीर्णानां मुखबंधनं ८ विदधाति त्वचा नित्यं दत्ते गोरोचनामपि कदाचित्कर्मणा

पर्यंतं २

प्रमिलतासपुष्पैः ५

मर्यादीनां १

चर्मकारः २

नंदः श्वपचः

वाधं कृत्वा चंडालसत्तमः ९ करंजीपुरनाथस्य सन्निधौ न्यस्य दूरतः लिंगसंदर्शनाकांक्षी मुहूर्तं न स्थितवानथ १० महावृषभसं छन्नं स्वामिनं द्रष्टुमक्षमः विषसाद स्वकं जन्म निंद्य जातो किमागतं ११ स्मरन्निति शिवं दध्यौ भक्तिपूतमनाः क्षणं शशास देवस्तु त्वन्या प्रीतः सन्निधिशंकरं १२ पार्श्वगस्त्वं भवेत्याह सच दक्षिणतो भवत् ततो ज्योतिर्मयं लिंगं दृष्ट्वा दूरे स्थितोपि सः १३ प्रणनाममुदुः प्रीत्या ननर्त करतालवान् गर्तं देवाग्रभागस्थं विदधेन लिनाकरं १४ स स्मरन् सर्वदा शंभुं जातिनैच्यभयातुरः शिवं मां रक्ष रक्षेति मनसा व्याजहार ह १५ सेवां नटेश्वरस्याथ करिष्यन्नातुमुद्यतः यज्वसांद्रपुरं तत्वं नगच्छेति स्वजातिभिः १६

स्वजातिभिः १६

निवारितोपि श्वो गंतेत्याह भूयः परे हनि प्रस्थितस्तै र्निरुद्धश्च तथैवाहानुवासरं १७ पुंडरीकपुरेशान सेवासादरचेतसः वदतश्चैवमेवागात् मासैकोनश्च वत्सरः १८ अथैकस्मिन् दिने प्रातः प्रस्थानपरिपंथिनः शपन् भार्यामपि खलां समाश्वास्य निरुंधतीं १९ निमज्य सद्य जातोये धृत भस्मा निजालिके गव्यूतिमात्रे संवीक्ष्य गोपुरं तत्सभापतेः २० प्रणतिं विदधे हृष्टः प्रपेदे च पुरांतिकं प्राचीनगोपुरद्वार क्रोशमात्रे पुरस्थितः २१ शालाशतं द्विजेंद्राणां नानाध्वरविधायिनां नादितं ब्रह्मघोषेण पुण्यधूमाचितांबरं २२ दृष्ट्वा भीतो लमे युक्ता जातिहीनस्य हि स्थितिः विधास्ये चान्यतो यत्नमिति दक्षिणतोगमत् २३ ददर्श गोपुरस्याग्रे दक्षिणस्य मठायुतं सनकप्रख्यसन्यासि वेदसाराभिनादितं २४ महावाक्यपदव्याख्यापरकीलांकितद्रुमं पुरे केन पथा गंतुमयुक्तमिति सोंत्यजः २५ क्रोशमात्रे गोपुरस्य प्रत्यग्भागस्थितस्य च स्थिलाद्ददर्श तत्रापि योगारूढान् महालनः २६ उदीच्यां गोपुरद्वारि राजपश्चिनपरानपि शैवान् सदाचारपरान् दृष्ट्वा निंदत्स्वकां जनिं २७ हीनजातेः कथं भावि दर्शनं मे सभापतेः अनिषेव्य सभानाथं नाहं गंतेत्यवर्तत २८ ततस्तद्भक्तिमुदितः पुंडरीकपुरेश्वरः स्वप्ने तमाह श्वो वह्निं प्रविश्यायाहि

नटेश्वरस्य १

नटेश्वरस्य १

मत्सभां २९ इत्यादिश्य तमेवैकं त्रिसहस्रद्विजोत्तमान् नंदस्य शुध्यै वह्निर्दीयतामित्यचोदयन् ३० प्रातः प्रबुद्धास्ते सर्वेस्व
प्रसंवादविस्मिताः प्रार्थयंतश्च तं वह्निमालोक्य धांस्यथानयन् वर्धयामासुरनलं दक्षिणद्वारसंनिधौ नंदः स्नात्वाथ मध्या
न्हे धृतभस्मानुलेपनः ३२ नत्वा द्विजान्विवेशाग्निं भृंगः पद्मवनं यथा वह्निना दह्यमानात्तद्देहात्कश्चिद्द्विजोत्तमः ३३ भ
स्मत्रिपुंड्ररुद्राक्षमालाभूषितविग्रहः वामे दंडमथो वामे पाणौ बिभ्रत्कमंडलुं ३४ शिखाबंधोल्लसन्मौलिः दिव्यांबर
परिष्कृतः उत्तस्थौ पश्यतां तेषां वामदेवो यथा मुनिः ३५ तदाववर्षुः कुसुमानि मौलौ वैमानिका दुंदुभयश्च नेदुः तमस्तुवन्चारण
यूथमुख्या येहित्यमित्यूचुरमुं गणेंद्राः ३६ स यज्वभिस्तैरुपदिष्टमार्गः चिदंबरेशस्य सभां प्रविश्य देवं चिदाकाशमयं निषेव्य
पश्यत्सु सर्वेषु न दृश्यते स्म ३७ श्रीसूतउवाच इति नंदस्य चरितं भक्त्या मुक्तस्य संसदि कथितं ब्राह्मणश्रेष्ठाः भक्तिर्मुक्तौ हि साधनं
३८ इति श्रीस्कांदोपपुराणे भक्तविलासे त्रयस्त्रिंशोध्यायः ३३ श्रीगणेशाय नमः श्रीअगस्त्यउवाच शिवस्य शिवभक्तानां कैंकर्यं ये वित
न्वते विनैव ज्ञानयोगाभ्यां तेषां मुक्तिरदुर्लभा १ अत्र सिद्धेश्वरे गीतमितिहासं ब्रवीमि वः विस्मयं ते यदाकर्ण्य ज्ञानिनो क्षीण
वासनाः २ अहं कुर्वति कैलासे स्वावासे च महागिरौ तन्निग्रहाय देवेश शंभुना सृष्टमद्भुतं ३ दैनंदिने लये यस्य लयो नास्ति शि
वाज्ञया यद्वाङ्मुखनिक्षिप्तं कुंभवत्प्रलयार्णवे ४ अनष्टमंतः सलिले विभाति शिवयोः पदं कामाक्ष्येकाम्रनाथाभ्यां केलि
मज्जनसंगतेः ५ भस्मकस्तूरिकालेपैर्यत्र गंगायते सरित् अस्ति तच्छांभवस्थानं त्रिषु लोकेषु विश्रुतं ६ विंध्यस्य दक्षिणे
देशे स्वर्गस्य प्रतिबिंबवत् उपागतानां समये गौरीसेवार्थमन्वहं ७ विमानैरिव सिद्धानां संबाधं भवनोत्तमैः आक्रीड

स्थानं ४

भस्मा नं १

एकाम्रनाथस्थानं २

वाटीरंभाग्नस्पृश्मंदाकिनीझरं ८ सुरसिंधुनिमग्नस्वस्वेणाभरणभद्रमं उद्यानन्तारिकेलाग्रविश्रांतार्काश्वमंडलं ९ क्रमुकस्तबकाहूतदेवोद्यानमधुव्रतं कृशांगीजनसंगीतद्रुतरत्नाग्रगोपुरं १० रमणीवेणिकामोदश्रेणीवासितवीथिकं तरुणीरत्नताटंकसूर्यपीततमोव्रजं ११ मुग्धामंदस्मितज्योत्स्नातृप्तकेलिचकोरकं क्वचिन्मत्तेभदानांभोजंबालितनृपांकणं १२ क्वचिदश्वखुरक्षुण्णक्ष्मारजस्थगितांबरं क्वचित्कभरखड्गाग्रसहोलंपितभास्करं १३ गौरीसेवागतोपेंद्रश्रीकटाक्षसमन्धिमत्कूलेकंपामहानद्यामूलेचैकाम्रभूरुहं १४ द्वात्रिंशद्धर्मचारिण्यशिवोयत्रोमयार्चितः पराकाशबिलंयत्रमुक्तिद्वारमपावृतं १५ महाभैरवमुख्येनगणयूथेनपाल्यते सर्वैः सिद्धैश्चदेवैश्चसेवितंपरमाद्भुतं १६ अद्यापियत्रकामाक्ष्यास्संनिधौतिष्ठतांदिशः न ज्ञायंतेचिरेणापिब्रह्मणापिमुनीश्वरैः १७ छायाग्नाद्दिप्रतिस्पर्धेयत्रदिव्यसुधारसः कृतोपहारैःसिद्धेशैः सकौतूहलमीक्ष्यते १८ वेतानवह्निधूमेनयज्वनामनुमंदिरं वर्धितैःसमयेमेघैःपयस्समभिवर्ष्यते १९ कामाक्षीकुंतलामोदिकल्हारोत्तमवासितः सेवागतानांयत्रार्तिंमिनिलोहरतेन्वहं २० कामाक्ष्यालिंगितोयत्रभगवान्परमेश्वरः कामीबालकृतोद्यापिस्तनकंकणमुद्रया २१ देवीगर्भगृहेयत्रलिखितानिशिलांतरे लोकत्रयरहस्यानिनज्ञायंतेपियोगिभिः २२ आसीदेकाम्रनाथस्यतत्रवस्त्रावनेजकः ख्यातोविचारवान्नामभक्तिमान्परमेश्वरे २३ सशिवानुग्रहादासीच्छैवानांवस्त्रशोधकः नैवादत्तेभृतिंक्वापिरजकान्वयसंभवः २४ विभूतिरुद्राक्षभृतांकांचीपुरमुपेयुषां आसन्वासांसिशुद्धानिभक्त्यातस्यमनोयथा २५ आलोक्यवसनेदूरेशैवानांमलिनंस्वयं प्रार्थयत्येसतान्नत्वाशोधयित्वातदंबरं २६ आतपेशोषयित्वाचसा

कथ्रंमन्त्रधूषितमिसत्ः २

यमेवप्रपच्छति ननिर्णेजेन्यवसनंराज्ञोपिरजकोत्तमः २७ एवंनिवसतस्तस्यद्वात्रिंशद्वत्सराययुः एकाम्रनाथस्तद्भक्तिं
परीक्षितुमनाह्यभूत् २८ कस्यचिद्वृद्धविप्रस्यगृहीत्वावेषमीश्वरः कंचुरामुद्वहन्कंथांरजकस्यागतोभवत् २९ सहस्ररु
रजकः ३ द्राक्षधरंभस्मोद्धूलितविग्रहं विचारवान्विप्रवृद्धंनत्वासांजलिरब्रवीत् ३० प्रवयास्त्वमसिब्रह्मन्महतामस्मिकिंकरः ॥
मालिन्यमंबरस्थंतेमाभूयान्मयितिष्ठति ३१ श्रीवृद्ध उ० कामाक्षीदर्शनायाहंदूरादस्मिसमागतः पुरीनदृष्टपूर्वेयंनेवज्ञा
नामिकंचन ३२ कालोयंहिमभूयिष्ठःभूयसीमिहिकानिशि नवस्त्रांतरमप्यस्तिकंचरंचपरंच्चरं ३३ विशिष्यवृद्धः जीर्णवस्त्र ५
शीतालुःनजानेत्वांगृहंचते परकीयंनवसनंधार्यमाहुर्मनीषिणः ३४ आचारःशीलमाचष्टेभक्तस्त्वंसाधुसंमतः कंथां
संशोधयितेमांशोषयित्वामहातपे ३५ सायंदातुंसमर्थश्चेत्गृहाणनमृषावद इतिवृद्धोक्तिमाकर्ण्यभूयःप्राहविचारवान् ३६ नाम्ना १
नमेकार्यांतरंकिंचित्त्वद्वासःक्षालनादृते चंद्रिकाधवलंकृत्वाशोषितंचातपेनते ३७ वासःसायंप्रदास्यामिभगवन्मातुराल कामाक्ष्याः ६
ये आस्वेत्युक्त्वागृहीत्वंकंथांवृद्धस्यरजकोत्तमः ३८ स्वजन्मशतपापौघैःसहतांसमशोधयत् बहिःप्रस्तारयामासपुलिनेतांद्रु
तातपे ३९ रजकःस्नमहत्यासीद्वृष्टिरीशाज्ञयातदा कंथासाचंडवातेनक्वापिनीतादिगंतरे ४० आदिनांतमविच्छिन्नेचासा वृष्टेःपर्व ४
रेसविचारवान् प्रतिज्ञाभंगतःप्राण..त्यागएवमहत्तरः ४१ इतिनिश्चित्यधीरंस्वंवृद्धेतस्मिन्कृतागसं त्यक्तुकामोंति
पाठइति केप्राप्यवस्त्रनिर्णेजनाश्मनः ४२ शिरोघातयितुंयावत्प्रवृत्तस्तावदीश्वरः तयेवकंथयासार्धमाविरासीद्वृषोपरि ४३
स्यातस्य२ देवोद्यानप्रसूनानिववर्षुःखेचरस्त्रियः देवदुंदुभयोनेदुःसंवादश्चसतामभूत् ४४ निवार्यसहसोद्युक्तंरजकंवृषभध्वजः

नित्यं स्वसंनिधौ वासं कैलासे लस्य दत्तवान् ४५ इति श्रीस्कांदोपपुराणे भक्तविलासे चतुस्त्रिंशोऽध्यायः ३४ श्रीशंकराय नमः॥
श्रीअगस्त्यः॰ क्षीराभिषेकमीशस्य गवां यत्र वितन्वते ते विमुक्ता महापापैर्मुक्तास्युस्सत्यमुच्यते १ इतिहासमिति प्राहुः प्रा
चीना ब्रह्मवादिनः यस्य श्रवणमात्रेण ब्रह्महत्या विनश्यति २ अस्ति स्कंदपुरं नाम ख्यातं स्कंदप्रतिष्ठितं मणिनिर्झरणीती
रे यो रिवाम्भसि रिन्नते ३ अप्रमत्तधियो धर्मे नित्यं हुतमखाग्नयः अधीतचतुराम्नायाः सर्वत्र ब्रह्मवादिनः ४ षट्कर्म
निरता नित्यं सप्तर्षिसमतेजसः अष्टमूर्तिस्तुतिपराः नवद्व्यकलाधराः ५ दशेंद्रियनिरोधारः एकादशधृतेश्वराः द्वा
दशादित्यसंकाशाः यत्र ब्राह्मणसत्तमाः ६ त्रयोदशस्वरार्थज्ञाः चतुर्दशसुदेशिकाः यत्र यज्ञविशेषेषु मरुतां यज्व
नामपि ७ रथाश्वव्योमयानानि दृश्यंते राजवीथिषु यत्र श्रीशतरुद्रीयमहामंत्रजपो सुखान् ८ तेजोधिकान्विलो
क्यार्को नारिकेलेषु लीयते यत्र यूथगता गावो दुर्ग्रहा अपि योषितां ९ बटूनां सामगानेन दोहे पुस्तकरग्रहाः तत्रासीद्य
ज्ञदत्ताख्यः कश्चिद्ब्राह्मणसत्तमः १० विद्यासाम्राज्यलक्ष्मीर्यं वव्रे श्रीरिव केशवं सभापतेः शिष्यवरार्पितेन स्वदक्षि
णाद्रव्यभरेण भक्त्या ११ सगां वितेने धृतमूर्ध्नि पट्टं यस्तस्य भार्या जनि सा पवित्रा तयोरर्चयतोः शंभुं निपमेन महीयसा
नाम्ना विचारशर्मा |१२ भाग्योदयेन पुत्रो भूत्षण्मुखः शिवयोरिव ववृधे लालितो मात्रा एक एव निशाकरः १३ संतांसंधानमासाद्य बाल्य सज्जनानां
एव द्विजार्भकः स पंचमाब्दप्रागब्दात्सुखाद्भ्यस्यताः कलाः १४ विनैव वेदे वाङ्जग्राह सकृदाकर्ण्य तीक्ष्णधीः व्रतं ददौ
च गायत्रं पंचमेब्दे विधानतः १५ उपनीतः स गुरुणा सकृदेवोपदेशतः अधीयायाखिलान्वेदान्सांगोपांगपदक्रमान्

भा४

पठितानिच शास्त्राणि सर्वाण्यष्टप्रवर्षतः अष्टादशपुराणानां वेदानामपि तत्त्वतः १७ तात्पर्यं शिव एवेति निरचैषीत्स वृत्ति-
भिः परित्यज्याखिलं कार्यं भक्तिं चक्रे महेश्वरे १८ नित्यं द्वादशसाहस्रं पंचार्णं प्रजपन्मनुं जजापैकादशावृत्तिरुद्राध्यायं दिनां
तरे १९ आदधे समिधोपन्नो सायं प्रातरतंद्रितः सहस्रकृत्वा गायत्रीजपस्य धौ दिते रवौ २० भस्मावकुंठितो मौंजी दं
डकृष्णाजिनांचितः रक्षयालंकृतः फाले ज्वलन्नग्निरिवाबभौ २१ आमध्याह्नं मठे स्थित्वा शिवलिंगार्चनं व्यधात् भैक्षं च पंचमे
काले भुंजानो गुर्वनुज्ञया २२ विचारशर्म समयं गमयामास भूसुरः कदाचित्त्वं बमानेर्के कृतलिंगार्चनाजपः २३ प्रत्यग्र
हारं भैक्षार्थं प्रातिष्ठत गृहं मगात् अजघ्यवसं धेनुं वत्सवात्सल्यतः पथि २४ हनंतमथ दंडेन तद्ग्रामपशुपालकं तन्नि
रुध्य दुरात्मानं महात्मा धेनुसादिनं २५ दर्शनाद्दर्शिनो दस्युः पलायनमशिश्रयत् अथ धेनोर्दोग्ध्यासं शाड्डलाद्दाहितैस्त
णैः २६ कमंडलुजलैस्तस्य पिपासामप्यपाकरोत् महिमानं च संस्मार गवां वाचामगोचरं २७ सर्वदेवमयी धेनुः स
र्वतीर्थमयी तथा सर्वयज्ञमयी प्रोक्ता सर्वस्यामृतसाधनं २८ शकृदप्यग्निनिर्दग्धं यस्या भस्म प्रशंस्यते पंचगव्यं पदुत्पन्नं
महापापहरं विदुः २९ यस्याः क्षीराभिषेकेण प्रीणाति परमेश्वरः स्तुवंति यज्ञतत्त्वज्ञाः सर्वधर्मदुघां च यां ३० यत्पादधूलिं गंगेव पुना
ति शिरसा धृता वृषभेंद्रो यदुत्पन्नो महादेवस्य वाहनं ३१ दर्शनादेव पापघ्नी सेयं धेनुर्जगत्प्रसूः ब्राह्मण्यसाधनं यस्य होमेषु घृत
मुच्यते ३२ दंडेन हंति तामेव दुरात्मा पशुपालकः अद्यारभ्य करिष्येऽहं अग्निहोत्रं गवां सदा ३३ परिचर्यां किमन्येन कर्मणा भा
वितामम इति निश्चित्य गोपालं निष्क्राश्य स्वयमेव सः ३४ स्वकर्मासंगवं कृत्वा चारयामास तास्तृणं ररक्ष शार्दूलेसर्वाः पी

तोदाच्छाययान्विते ३५ सुहितासुस्तृणैस्तासु शिवमानर्च नित्यशः स्निग्धशुश्रूषयातस्य पुष्टांगास्ताश्च धेनवः ३६ द्वि
गुणं दुदुहुः क्षीरं समयं नातिवर्तते यदा कंडूयते तास्तु ददुस्तावत्पयस्स्वयं ३७ दुग्धा पयस्स्वयं दुग्धं वर्णी निजकमंडलौ तेना
भिषिंचति शिवं सिकतालिंगपूजितं ३८ एवं दिने दिने चक्रे श्लाघितः सकलैर्द्विजैः क्षीरबाहुल्यमुदिताः नैर्ष्यां तत्र वितन्व
ते ३९ प्रीतौ च मातापितरौ तन्निष्ठां वीक्ष्य तस्थतुः गवां शुश्रूषणं नित्यमेवमेव वितन्वतः ४० विचारशर्मणस्तस्य य
युः संवत्सरास्त्रयः अथैकस्मिन्खलः कश्चित् दिने कर्म महात्मनः ४१ गत्वा ग्रामद्विजान्सर्वान् श्रावयामास दुर्मतिः वि
चारशर्मपितरावाहूयोचुश्च ते द्विजाः ४२ कृतस्ते पालनं व्याजात् मध्याह्ने चालयन्पशून् निरुध्य शाड्वले धूर्तो दुग्धा स्वैरं
पयो गवां ४३ दोग्धा स्थंडिलीकृते सिंचन् सैकते विचरत्यसौ त्वत्सूनुः शिक्षणीयोसौ तद्योनसहामहे ४४ इति तस्योक्ति श्रावयामासमूहस्य
माकर्ण्य पितरौ खेदमापतुः यत्तदन्तः परेद्युस्तत्कृत्यं शोधयितुं क्वचित् ४५ तस्थौ निकुंजे संलीनो भूयो विप्रवचस्मरन्
अथो दिते दिवानाथे कृतकृत्यो हुतानलः ४६ समां समीनां गच्छंश्च नैचकीश्च चिरप्रसूः अपि वष्कयणीसो गाश्चारयित्वा
तृणं बहु ४७ एकच्छाये तरुमूले ता निरुध्यात्मकमंडलुं अधस्तादूधसां कृत्वा मंदं कंडूयते स्म सः ४८ पयःपूर्णं समादाय क
मंडलुमथात्मनः कृत्वा सैकतलिंगस्य समीपे लिंगमर्चितुं ४९ वर्णिप्रवरवृत्ते तत्र पत्रपुष्पैरुपार्जितैः धातकीमूलमा
पवित्र १ साद्य तीर्थपात्रैः फलैरपि ५० भक्त्या समर्चयामास यथापूर्वं महावटुः अथागत्य पिता कोपात्सादिनास्य कमंडलुं ५१ ॥॥ ५५

चिक्षेप किंकिं दुशात्मन्निस्फक्का भर्त्स्यस्कृतं पादप्रहार विध्वस्तं तस्य दुग्धं कमंडलोः ५२ विशीर्णमपतन्मूर्ध्नि शंभोः सैकतरूपिणः शिक्षादंडं गवांपाणेो गृहीत्वा द्रोहकारिणः ५३ जघानपादौ कोपेन परशुं भूयसो छिनत् सकृत्तपादो निपपात भूमौ हाहेति मूर्छो सहसा प्रपन्नः ५४ तावत्प्रसन्नः पतिरंबिकायाः प्रादुर्बभूवास्य वृषादिरूढः श्रीसूतः कैलासशिखराकारे वृषभे गिरिजासखं ५५ अवलोक्य महादेवमस्तोषित्प्रणिपत्यसः अवरुह्य हरस्त दा वृषेंद्राद्दुमाश्लिष्यसुरान्ततो जगाद मयि भक्तिमता जिता त्रिलोकी भवमुक्तः सततं भवांतिके मे ५६ निवेदितं मेयत्किंचिद्दत्तं तेस्तु फलप्रदं आधिपत्यंच मद्द्वारि शाश्वतं तेस्तु मारुद ५७ कैलासे ललितुर्भूयान्मुक्तिः सालोक्यरूपिणी इत्युक्त्वा भगवान् शंभुः सह तेन तिरोदधे ५८ प्रसादादथ देवस्य यज्ञदत्तो पि तत्क्षणात् भवबंधाद्विनिर्मुक्तः कैलासपदमाप्तवान् ५९ इति श्रीस्कांदे पुराणे भक्तविलासे त्रिपंचाशो ध्यायः ३५ श्रीचंद्रमौलयेनमः श्रीअगस्त्यः शिवकैंकर्यमात्रेण मुच्यंते यद्यपि स्त्रियः प्रणतं दर्शनादेव तारयंति भवांबुधेः १ अत्रैवोदाहरंतीममितिहासं पुरातनं स्थाणोः प्रसादप्रत्यक्षो यद्यपि क्रियते जनैः २ अस्ति किंचित्पुरं रम्यमूर्ध्वपाटीति विश्रुतं यत्र हालिककेदारसंचितो व्रीहिसंचयः ३ वर्धमानो न्नपि स्पर्धां भजते हिमभूभृता यत्रोद्यानतरुस्तोमकोटरेषु द्विजन्मनां ४ अग्निहोत्राग्निधूमौघो धत्ते पारावतश्रियं तरुणीवदनांभोजसौरभोर्मिषु मज्जतां ५ मधुव्रतानां विरुते र्दिशो यत्र निरंतराः यदाहुर्यामुनं नाम पुरं भुवि पुराविदः ६ यत्रावतीर्णो विख्यातो भक्तो वागीश्वरं

दरी तत्राभूत् कीर्तिमान्नाम चतुरः कुलवल्लभः ७ हलसंभूतया भक्त्या नृश्रियायस्समपूजयत् धर्मः श्रद्धेव तस्याभून्मार्द नीनामवल्लभा ८ कुलसौंदर्यसौजन्य विनयादिगुणान्विता कौमुदीव शशांकस्य प्रेयसी तस्य सादेसे ९ कालेनाथ तयोरासीत् कन्यैका तिलकावती सावर्धमाना बाल्यापि मनोनयनहर्षिणी १० शरदीव शशांकस्य कलाप्राप्त नवोदया अथ पुत्रार्थिनस्तस्य जातः कीर्तिमतस्सुतः ११ लक्षिण्यो बोधवान्नाम निशाकर इवांबुधेः कृतनामादिसंस्कारो बोधवान् पंचवार्षिकः १२ विनीयमानो गुरुभिस्तानमोघश्रमान्व्यधात् स्वातंत्र्यं सच विद्यास्व दृष्ट्वा तस्याखिला जनाः १३ कुलस्थितिं कीर्तिमतो मेनिरे सुप्रतिष्ठितां कीर्तिमानपि कन्यायाः वयसि द्वादशे सति १४ वरमन्वेषयामास समानकुलसंपदं एतस्मिन्समये तस्य पूर्वसंबंधिवंशजः १५ कलिशत्रुरिति ख्यातः मंत्री राज्ञः शिवार्चकः उद्वोढुकामः स्वान्बंधून् प्राहिणोत् कन्यकार्थिनः १६ कीर्तिमंतं च ते प्रोचुर्मानिताः स्वजनांतरे कलिशत्रोरियं भार्या कन्या ते तिलकावती १७ भूयादनन्यसामान्यं तयोर्दांपत्यमद्भुतं इत्युक्तः कीर्तिमानाह तथास्त्विति सबांधवः १८ अतीते चैत्रवैशाखे मुहूर्ते स्त्विति मानिताः कलिशत्रुं पुनः प्राप्ताः बांधवास्तरच क्षत १९ कलिशत्रुरभूत् प्रीतो वार्तामाकर्ण्य मंगलां अप्यभूत् तिलकावत्या मनः प्रीतिर्महीयसी २० अथ राजा हयाशत्रून्विजेतुं समरं प्रति कलिशत्रुर्बले स्सार्धं वरर्मन्यो रणस्थलीं २१ प्राप्तो विद्विषतां सैन्यैर्हन्यमानैर्वृतो निशि मारयित्वा बहून्योधान भवद्वैरिणाहतः २२ दिवसैः पंचषैरेव कीर्तिमान् ज्वररोगतः पीडितो विजहौ देहं मानिन्यपि तमन्वगात् २३ चकार पित्रोः सकलं बोधवानौर्ध्वदेहिकं कलिशत्रुं हतं श्रुत्वाशुशोच परमातुरा २४ मर्तुकामम न्यस्मै बोधवं तं निवार्यता वचः पित्रोः क

वरमानी ३
पुत्रः १

मानिनी १ भार्या २ तिलकावती १

अग्रजया श्रेष्ठया तिलकावत्या ६ बालः बोधवान् ६

अन्यजन्मनि २ / विद्रुमः पर्वतः / तस्ये न विड्ड्मा चीश्वरं कर्मांतरे शिवलिंगवीर देशं ५ / यौवनवती ५ / बोधवतः ५ / पाखंडः ३

रिष्यंतीदधारव्रतमुत्तमं २५ पितृभ्यां मनसादत्तापुराहं कलिरात्रवे सचेद्धि निहतोयुद्धे मम भाग्यविपर्ययात् २६ प्रवेक्ष्याम्य
ग्निमस्त्वेषपतिर्जन्मनि मामिनि इति तां विहितोद्योगां प्रत्यषेधन् द्विजातयः २७ अनूढानां मतिः शास्त्रे विहितानेति सो
गताः ततस्सा त्यक्तभोगेव स्थापितानुजरक्षणे २८ काषायवासिनी नित्यं पंचाक्षरजपान्विता भस्मोद्धूलितसर्वांगी धृ
तरुद्राक्षमालिका २९ वीरहे शालयं गत्वा मार्जनालेपनादिकं कुर्वती शिवनामानि कीर्तयंती जितेंद्रिया ३० ददाना शि
वभक्तेभ्यो वासश्चान्नं प्रदीप्सितं मितभुग्यौवनवत्यासील्लोकवार्तासु मूकवत् ३१ अचिरात्तिलकावत्याः सदा शिवकथा
श्रुतेः प्रससाद मनः शंभोः प्रसादेन गुरावपि ३२ शिक्षितोग्रजया बालो द्विजशुश्रूषणे रतः अशदशपुराणार्थान् श्रुणो
द्गुरुसन्निधौ ३३ चकारोच्चावचान्धर्मान्मत्वा सर्वं विनश्वरं वापीकूपतटाकांश्च पुण्यभूरुहवाटिकाः ३४ प्रतिश्रयांश्च गो
शालाः पुष्पारामाननेकशः आर्तौषधप्रदानं च दीनांधपरिपालनं ३५ क्षीरं तैलं शिशूनां च दानं घर्मे जलान्नयोः चक्रे किं बहुनोक्ते
न नास्त्यनास्तीति वाग्यभूत् ३६ तस्यैवं वर्त्तमानस्य पापैः प्राग्जन्मसंचितैः मूर्तिमद्विरभूत्संगः पाषंडापसदैर्जनैः ३७ एक
दा तेस मागत्य वेदबाह्यमते स्थिते सह अहिंसयोचुः प्राधान्यं हिंसयान्यत्र दुश्कृतं ३८ अप्रमाणमुपादिश्य प्रत्यक्षं श्रुतं च यत्
विहितः क्षणिकः शब्दैः धर्मः किं साधयिष्यति ३९ नष्टे कर्त्तरि नान्वेति स्वर्गादिर्यत्फलं भवेत् उपचारश्च बिंबेषु पूर्णस्य
ज्योतिषः कथं ४० ऐक्ये जीवात्मनोनुस्यात्स्वत्वादेः किं विचित्रता कर्मणा चेत्समुत्कर्षो न कोपि ब्रह्म विद्भवेत् ४१ देवालये

कर्मकर्त्तरि २

विहारस्यात्तस्मात्त्वनमेहुधः नवर्णेचाश्रमे भेदो दृश्यते क्वचिदात्मनः ४२ बुधस्त्वमसि किंवाचां विस्तरेणानुचिंतय युक्तंचेदा
र्हतमतंगृहाणान्यत्र किंश्रमैः ४३ इत्यादिवचसां गुंफै राईतानां सवंचितः वैदिकाध्वस्थितोप्यश्रामत्यज दुष्टसंगतः ४४ कि
मत्रेतिप्रलोभ्यैनं अनयन्स्वपदं जिनाः समंततः प्रवेशेन जनान्सर्वानतोषयत् ४५ बोधवानथतत्याज स्नानं दानं द्विजार्चनं
वर्णानिदायधर्मंचवेदबाह्योचिरादभूत् ४६ चैत्ये प्रणामं विदधे वस्ते स्म कटमंबरं सपाटनिपुरेसर्वैरभिषिक्तो जिनैरभूत् ४७
तत्काप्राङ्गामनामान्य धर्मसेनाह्वयो भवत् तमार्हतम ताध्वान्यास्तस्थुरावृत्य सर्वदा ४८ दर्शयंत्यः पदंनेमुः संध्ययोरा
र्हतस्त्रियः दृष्टतच्चित्तसाहस्त्रः सोभवत्पुरुषार्थवान् ४९ कृतवासो मताचार्य संमतो वनृ धेसच जिनतंत्राध्वगं श्रुत्वा भ्रातरं
तिलकावती ५० विदीर्णहृदया शोकेक्षरणं प्राप शंकरं सा ताक्ष्यसरितिस्नात्वा सायं प्रातर्दिनेदिने ५१ जलार्द्रवसनादेवं भेजे
गुं भस्मावकुंठिता स्वहस्तापचितैः पुष्पैः निर्माय विविधास्स्रजः ५२ ददानाप्रत्यहं भेजे विद्रुमाधीश्वरं विभुं नमः शिवाय त्रिदशा
र्चिताय नमः शिवाय त्रिपुरांतकाय ५३ नमः शिवायाधिविमोचनाय नमः शिवाय प्रणतार्तिहंत्रे पतितं दुर्मते वोधे भ्रात
रं करुणानिधे ५४ स्वामिन्नुद्धर देवेश दयामयि विधीयतां एवं संप्रार्थयंती सा कृत्तिवाससमीश्वरं ५५ उपवासपराकार्श्यं
जगाम तिलकावती इति श्रीस्कांदोपपुराणे भक्तविलासे षट्त्रिंशोध्यायः ॥३६॥ श्रीदंडपाण्यर्पणमस्तु ॥ श्रीअगस्त्य उ॰ ॥ तप
सा तिलकावत्या प्रसन्नः परमेश्वरः इदं स्वप्ने समागत्य जगाद हृदयंगमं १ श्रीमहेश्वर उ॰ तिलकावति मा शोकं कृथा मनसि तेन्न

विद्रुमनामापर्वतः
तस्याधीश्वरं ५धीर
देशं ५

संन्यासी ३ — भिक्षुः परिव्राट् कर्मंदी पाराशर्यपि मस्करी समाः

तैः प्रीतोस्मि मयि सुप्रीते स तिजंतुर्न शोचति २ श्रृणु चाप्यपरं वाक्यं तिलकावति येन त्वं तथागतमतं प्राप्तो भ्रातायदनु
शोचसि ३ आर्यावर्ते भवत्कश्चित्सुतपा नाम सर्ववित् मुनिरासीन्महाप्राज्ञः सर्वशास्त्रविशारदः ४ भक्तिमान्मयि धर्मा
र्थविद्यामुपदिदेश च अज्ञानिनो येन पुरा बहवः सुधियोभवन् ५ तदा कश्चित्समागत्य शांतिमान्नाम मस्करी ब्राह्मणे
र्विहितातिथ्यो शिष्याणां नर्मदातटे ६ व्याकरोद्वेदसारार्थं जीवात्मैक्यं यतो भवेत् तदा तस्य परीक्षायै प्रवृत्तः सुतपा
मुनिः ७ तथागतमतालंबी व्याजहारात्मनो भिदां नैष वेदांतसमयः त्वं यदात्थेति सोब्रवीत् ८ प्रामाण्यं नैव वेदानामित्याह
सुतपाः पुनः शशाप शांतिमानेनं तदानीं वेदनिंदया ९ कुपितो वेदबाह्यानामस्त्वेकोयं कुले त्विति पुनर्न त्वा क्षमस्वेति शापां
तं तमयाचत १० दयया स पुनः प्राह शिवभक्तिस्तदास्त्विति मद्भक्तस्य वचो भूयात्तन्न मिथ्या मद्वचो यथा ११ तव भ्राताईत मतं
तस्माद्वेषप्रवेशितः पश्य मे शक्तिमतुलां त्याजयिष्यामि तन्मतं १२ इत्युक्त्वांतर्हितः शंभुः तस्मै शूलगदं ददौ प्रीता तद
दृतं स्वप्नं दृष्ट्वासीत्तिलकावती १३ अथैकदा पिबद्दुग्धं धर्मसेनो निशांतरे अजीर्णमिभवत्क्षीरं ततश्चासीद्गदो महान् १४ उ
दरे वर्धते व्याधिः कालकूटाग्निसंनिभः दावाग्निरिव जज्वाल तेन मूर्च्छाभवन्मुहुः १५ स्वच्छंदपीतमशितं यदल्पमपि तद्धृदु वि
ह्वलः शूलरोगेण धर्मसेनो जिनालये १६ निपतन्नुत्पतन्निद्रां नान्वभून्न मतिं ययौ तस्य रोगं विनेष्यंतः संभूय करवाससः १७
प्रायुंजन्नौमयघ्नास्ते विद्या नानाविधाः पृथक् औषधानि च दत्तानि सिद्धानि स्थलकोटिषु १८ सर्वाणि तानि नशानि

तस्मिन्नन्नं निप श्वादस्तु ६

जैनमतं ६

तेगं ५

बोधवतो नामांतरं ४

रोगैर्वन्ह्योयथालणं व्यजं भतोदरे तस्य भूयः शूलो महामयः १९ धर्मसेनः प्रवृत्तंस्या ह्माणत्यागे यथास्वयं अथ देशांत
रात्केचिद्भिषजो जिनसंमताः २० आपादकेशं पिंबाग्नेराम शांतो जपन्मतुं द्विगुणं सचतन्मंत्रैः समुद्रवद वर्धत २१ निरा
शाश्चार्हताः सर्वेमत्वातं निशि निर्ययुः धर्मसेनो सहायस्सन् रुरोद भृशमातुरः २२ नान्नं किंचित्क चिल्लेभे पीड्य
मानः क्षुधातृषा प्रत्युतन्नामतिस्तस्य द्वित्रैरथ दिनैस्वसा २३ रक्षां विधास्यती त्येकां तस्यै धात्रीमचोदयत् जिना
लयप्रवेशो मे धात्रियुक्तो नचेत्स्वयं २४ अत्रागते स्वयं रक्षां करिष्यामीति साब्रवीत् धर्मसेनायतत्सर्वमुक्तातं स्वयमानयत् २५
निधूयजैनसमयं दीनदीनस्तथातुरः स्नात्वा सपादयोः प्राप शरणं तिलकावतीं २६ पादयोः प्रणतं रुग्णं चिबुकश्मश्रुधारिणं
करावसानंकरयोः पिंडिकाकुंडिकाधरं २७ महोदरं जीर्णकंठं स्वत्या जात्येवसा नुजं त्वत्प्रसादमीशस्य स्मरंती च विसिस्म
ये २८ किमेतदिति रैश्रुस्तां धर्मसेनोब्रवीत्सतीं आर्येदुशर्हनैरस्मिवं चितो वेददूषकैः २९ व्यध्वभाजं जिनाश्चक्रुः मां निवर्त्या
गमाध्वनः यदामेशूलरोगोभूत्तदाते कटवाससः ३० रोगापनयनं कर्तुमशक्ता दुदुवुः खलाः त्वामस्मि शरणं प्राप्तः रक्षमामा
त्मजं यथा ३१ नास्त्यौषधं मे रोगस्य नप्रयांत्यसवो मम निद्रा नैव क्षुधा बह्विर्भुक्तं किंचिन्न जीर्यते ३२ कुक्षौ शूलामयः सो
यं हालाहलवैधते स्पृश त्वमुदरं किंचित् कृतार्थः स्यान्न संशयः ३३ अथाह भ्रातरं साध्वी दयालुस्तिलकावती कृत
स्यैहैसेते काले कर्मणः फलभाजनः ३४ अकृत्वा कोप्यविहितं नदुःखी स्यात्कदाचन प्राग्जन्म निकृतं तावन्नूलयावेदांत

(margin, left) ५ भगि॰ मानवश्च॰ (margin, right) कुमार्गगामिनं ५

(margin, left) त्वौ

(margin, right) ५८

अर्थाद्विहितं कर्म कृत्वा न दुःखी स्यात् १

नास्तीकं १ सर्वज्ञः सुगतो बुद्धो धर्मराजस्तथागतः इत्यमरः १

पुरुषः १

दूषणं ३५ फलं तस्यैव पापस्य प्रवेशो जिनवर्त्मनि दूरे तथागतं दृष्ट्वा धीमान्चक्षुर्निमीलयेत् ३६ सदृष्ट्वा प्रमादेन पश्यन्नर्कं शिवं स्मरेत् असंभाष्यस्त्वनेन स्मान्नस्पृशाम्युदरं न मे ३७ बंधुस्त्वमसि जीवन्वा मृतो वापि जिनोऽस्यसि इत्युक्त्वा गंतुमिच्छंती सरुदन्तिलकावती ३८ उच्चैःस्वरेण चुक्रोश पाहि पाहीति दीनवाक् दयावती तमाहाथ निवृत्यातं जिनानुगं ३९ यदि रक्षा विधेया ते मया तावत्तथागता जिनचिन्हानि संत्यज्य स्नाहि तार्क्ष्यसरिज्जले ४० इत्युक्तः स तया सर्वं संत्यज्यार्हतलक्षणं सस्नौ तार्क्ष्यसरित्तोये सा दात्तस्मै नवांशुकं ४१ ददौ च विमलं भस्म दद्यो भक्त्याल्लिके च सः अथ नत्वा गुरुं शांतं संस्कृतं तं पुनर्व्यधात् ४२ प्रणतस्तिलकावत्या तस्मै पंचाक्षरं गुरुः उपदिश्य ददौ भस्म वीरदेश्वरसन्निधौ ४३ जठरात्तस्य रोगो पिकाकरूपेण निर्गतः समुड्डीयांबरे गच्छत्सद्यः सर्वे ति विस्मिताः ४४ निरोगो बोधवानासीन्निर्मुक्त इव पन्नगः भस्मालेपनमात्रेण दिव्यं रूपं पुनर्दधे ४५ रोगापनयनात्सद्यः तस्य भक्तिः शिवे भवत् न परं मन्यते देवं महादेवान्महेश्वरात् ४६ स्नात्वा भस्मांकितः कुर्वन्पंचाक्षरजपं सदा व्यनन्नो तिलकावत्या शिवैकैकर्यमुत्तमं ४७ तदा म्लेच्छाधिपः कश्चित्सल्लवो नाम भूपतिः तद्देशस्य विजित्यासीदशेषधरणीपतिः ४८ बोधवानपि कैंकर्यं शंभोरामाससप्तकं कृत्वा रात्रौ पुरः शंभोः स्तोत्रं कर्त्तुं मनो दधे ४९ अथ महेश्वरशासनचोदिता भगवती वचसामधिदेवता व्यधित बोधवतो रसनाग्रसंस्थितिमभूत्स यतो रसनापतिः ५० इति श्रीस्कांदोपपुराणे भक्तविलासे सप्तत्रिंशोऽध्यायः ३७ श्रीदंडपाणये नमः श्री अगस्त्यउ० ॥ महादेव

बोधवते ५

१ बोधवान्

प्रसादेनप्राप्तसारस्वतामृतः जिह्वाराजःस्ववाक्पुष्पैरानर्चपरमेश्वरं १ जिह्वाराज उवाच ताक्ष्यापगातटस्थायवि
द्रुमाद्रिनिवासिने वीक्षणध्वस्तरोगायवीरदेशायतेनमः २ अचिकित्सामयव्यूहध्वांतविध्वंसभानवे अनाथजनना
थायनमस्तेकृत्तिवाससे ३ अज्ञानरोगवैद्यायविज्ञानामृतदायिने विश्वाधिकायविष्ण्वाद्यैरस्तुवंद्यायतेनमः ४ जगन्मं
गलमूलायजन्ममृत्युभयच्छिदे जटामंडलसंरुद्धजाह्नवीकायतेनमः ५ दुर्मतेःसन्मतिंदत्वाविनीयचरुजंमम स्वभक्तंविद
धेयोमांनमस्तस्मैदयाब्धये ६ समुन्नतिंनाणुरवेस्तिमिरोःखद्योतपोतश्चनसूर्यतेजः गांभीर्यमब्धेर्नतुषारलेशःनथाविभू
तिंतववेद्मिनाहं ७ मंदस्मितप्लुष्टपुरत्रयायमनोभवासंभवघस्मराय महाभयत्रस्तकृताभयायमहानुभावायनमःशिवाय ८
यन्मेप्राग्जन्मकोटीषुक्वचिदपिनमयापादपद्मंस्मृतंते तेनाभूँजन्मदुःखंममजिनमतभाग्यत्रजालाहिताधिः भक्तायास्तेप्रसा न्
दात्स्वसुरपिजिनतानुन्नतिर्नोमियतांभूयःशंभोनजन्मास्त्वथयदिवदतोलसदेभक्तिरस्तु ९ इतिस्तुत्वामहादेवंभक्त्याप्रणतमग्रतः
बभाषेभारतीदिव्याविनातन्वातमोरिपुं १० तमोरिपोकृर्थोतोसि भक्तिमानसियन्मयि पूतोसिजिनसंघातात्सुहिमा
सर्वतःकृती ११ जन्मनःफलमेतद्धियन्ममस्तोत्रमुक्तिभिः दिवानिशंचजिह्वाग्रेवर्ततांतवभारती १२ वागीशइतितेनाम
दत्तंतल्लथतांभुवि यदास्मरसिमांतत्वांरक्षितास्मिनसंशयः १३ इत्युक्त्वाविरतावाणीमुमुदेथतमोरिपुः अथस्वसारमामं
न्यवागीशस्तिलकावतीं १४ प्रातिष्ठतसयावत्तन्नामलोकेपुवर्द्धये स्वभ्रातरंप्रतिष्ठासुमुवाचतिलकावती १५ निवृत्तः ५९

गच्छंतं १

ोधवतोनाम्नां
रंजातं ४

दूषितं अस्माकं मतं येस्ते दूषितास्मन्मताः तैः ५

पद्धती

शूलरोगस्ते शंभोरत्रैव सन्निधौ सिध्रिक्षेत्रेलमत्रैव स्थित्वाकैंकर्यमीशितुः १६ स्वस्त्राकुर्वितिसप्रोक्तः तृणखंडनिकाधरः तत्रदेवालयस्थाने चक्रे दूरे तृणानिसः १७ सायंप्रातश्चतुशवयदा शंभुं नदासुराः वर्षंतिपुष्पवर्षाणि लोकस्तद्वीक्ष्य विस्मितः १८ आब्रह्मभवनं तस्यवव्रृधे कीर्तिरुज्वला ब्राह्मणायतनयश्चैनं यथा शंभुमपूजयन् १९ व्याकरोद्दोपनिषदी विद्यामेषमहामतिः प्रसादं शांकरं तस्मिन् अथाकर्ण्यार्हितो गणाः २० ईर्ष्यावंतो नृपद्वारं प्रापुस्तच्छासनोद्यताः एष्टाः पल्लवभूपेन पूजिताश्चोपनिष्ठिताः २१ ईर्ष्यानिर्दग्धहृदया दुर्बुध्दिं तमबोधयन् प्रविश्य छद्मनास्माकं धर्मसेनो मतं महत् २२ गृहीतमतसर्वस्वो व्यपदिश्य मृषामयं व्याधेर्निरोधे चाशक्तिमारोप्यास्मास्वेव दिक्कैः २३ दूषितास्मन्मतैः सार्धं शैवपाषंडतांगतः सर्वथा शिक्षणीयोयं नचेत्स्याद्दूषितं मतं २४ गृहीत्वायांतु योधास्तमालयाच्छैव किंकरं इत्युक्तः प्रेषयामास भटानार्हतभूपतिः २५ वीरदेशालयस्थं तं ववंधुः जगृहुश्चते निबध्यनीयमानं तमालोक्य तिलकावती २६ शोकार्ता शरणं प्राप शरणं शंकरं सतां नानाविधायुधैस्तत्र छिंधी भिंधीतिवादिभिः २७ नीतो भटैर्नृपद्वारे भस्मरुद्राक्षभूषितः तमानीतं भटैः श्रुत्वा जगादार्हतदेशिकान् २८ राजास्यदंडः कोवेतितेचूर्णमरणं जगुः जिनदासः सभूपालः कुरुतेनमपि स्वकान् (मेनकान्) २९ जगादकर्णेते चूर्णपूर्णे चास्थाप्यसद्मनि वागीशं तं प्रणालीभिः सिषिंचुः चूर्णमंडलं ३० बध्वारेकधचूर्णे वागीशस्तद्गृहे स्थितः घनकर्पूरपाटीरपंकमध्ये प्रतिष्ठितं ३१ मौलौ च चंद्रबिंबांतः स्रुतामृतरसाप्लुतं (स्रवित) अजरामरमक्षोभ्यमाकाशमिवनिश्चलं ३२ आत्मानं भावयामास शिवोहमिति वाक्पतिः कथितश्चूर्णराशिस्तं बवाधेन शिलामिव ३३ अतीते सप्तरात्रेतु दृष्ट्वा वागीशमक्षतं आनंदामृतकल्लोल

संमार्जनीधरः

जैनाः ४

मिथ्यामयं ५

अर्हतशास्त्राधिकारिणः मत्स्यप्रसादान् न ५

चूनावरी इति भाषायां ४

३ दकूलादि इति भाषायां

मालाशीतलविग्रहं ३४ अम्लानवदनांभोजं विजितक्षुत्तृषंनृपः बभूवसपरीवारस्त्रस्तःचित्रार्पितोयथा ३५ बभाषेहैंचो
नगुरूनूश्रुण्वदृक्कानूसपल्लवः मारणेषुमहानेषयोगोपश्चूर्णसंहते ३६ किंविषयो षधैर्वापिंनतत्रप्रापसंस्थितिं अथा
कुरार्हताभूयःसंभूयवचनंनृपं ३७ अस्मद्राध्यांतशिक्षायांअत्रत्यामनवोभृताः अनेनतेषांमहिमायत्वंसंस्थाप्योनचूर्ण
नः ३८ संस्थास्यतेयमन्नंचदेयमस्मैगरान्वितं दूतस्त्कौभोजयद्भूपःपायसंगरलान्वितं ३९ क्षुधितोसिचिरंभुंक्ष्व विषया
त्वंमहानिति आपश्चपृथिवीचान्नमत्तारोवन्हिमारुतौ ४० अवकाशोयमाकाशोभुज्यतेकिंपिनाकिना सएवायमि
तिध्यायन्नूअन्नंतद्बुभुजेतरां ४१ यथाहालाहलंभुक्तंजीर्णमासीत्पिनाकिना भुक्तंतपायसंतेनजीर्णमासीद्द्विजोत्तमाः ४२
अथतस्यहितोहस्तिआगतस्तज्जिघांसया भीषावलोकितस्तेनाभग्नदंतःपतन्मृतः ४३ तथागतगिराभूयोनिबध्वा
श्मनितंनृपः नौभिःसंप्रापयामासवार्यगाधेमहांबुधेः ४४ तमंबुधिर्यथारामंसंत्रस्तःशरणंगतः शिवाज्ञयाशिलासा
पिप्लवतेस्मतटंप्रति ४५ नवरत्नैःसमभ्यर्च्यसागरःसरितांपतिः पूतोस्मिचरणस्पर्शाद्दहंतीर्थीकृतस्त्वया ४६ भिंद
तिशैलानुदधीन्पिबंतिव्यत्यासयंतिक्षितिमंतरिक्षं तृणीकृतब्रह्मपुरंदराणांकिंदुष्करंशंकरकिंकराणां ४७ इतिस्तुत्वा
ययातस्यप्रायादब्धिर्यथागतं राजा वीरदेश्वरमासाद्यस्वस्रासमुपलालितः ४८ अभितुष्टवमुदितःसुधागीरिवसूक्तिभिः
तन्माहात्म्यमवेक्ष्याथस्वयमागतपल्लवः ४९ भूपतिःप्रणनामास्यपदयोःरक्षमामिति अथतस्माद्भयार्तस्यज्वरोभूज्जिनभू
पतेः ५० तत्पादस्पर्शमात्रेणप्रशशामपुनर्ज्वरः नवदास्येनधन्योस्मिकर्तव्यंकिंमयाधुना ५१ इतिशैवोब्रवीद्बोधवान्सर्वान्

म॰खुं॰२
म॰खुं॰प्राप्स्यते५
जैनगिरा१
६१

शिक्षयाधुना इत्युक्तः स जिनान्सर्वान्स्वदेशान्निरकासयत् ५२ देशस्थितस्य शाक्यस्य शूलारोपो भविष्यति इति तद्घोषि
तं श्रुत्वा सौगतास्ते पलायिताः ५३ पल्लवोपि महीपालः संत्यक्त्वार्हन्तदुर्मतं वैदिकं मतमास्थाय श्रियमाप शिवार्चनात् ५४ इति
श्रीस्कांदोपपुराणे भक्तविलासे अष्टत्रिंशोध्यायः ३८ श्रीविश्वनाथायनमः श्रीअगस्त्यः॥ अथात्रयामहेशस्य स्थलवासेच्छया
सत्त्वबोधनान्५ स्वयं शिवभक्ताग्रणीः श्रीमान् वागीशो निर्जगाम ह १ मध्यार्जुने च मायूरे कुंभकोणे धृतिस्थले छायावनेश्वे
तवने वटारण्ये घनाशने २ श्रीमद्वटवने दिव्ये श्रीवांछोपि महास्थले स्तुवन्महेश्वरं वाग्भिः तत्र सेश्वसमर्चितः ३ च
चारस ह्युज्जातीरे यथा घनपथे रविः अथैकस्मिन्दिने भानो लंबमाने स वाक्पतिः ४ प्रार्थितो द्विजवर्येण स्वगृहारं ययो मु
पात्रं कर्द्धमाः पत्रामिसर्थ=५ दा तत्र तद्गृहमाविश्य स्थिते तस्मिन्द्विजः स्मृतं ५ अमत्रमानयेत्याह सो पिरं भावनं ययो गृहीते सति तन्पुत्रे संदष्टो भूत्स भो
गिना ६ ज्ञाततद्वैभवो विप्रः स्मृतं प्रच्छाद्य तं मृतं भोजयामास वागीशमिंगितैरधिगम्य तत् ७ ज्ञानदृष्ट्या स्वयं तत्र गत्वा स्पृ
ष्ट्वा च तं हृदि नीलकंठं क्षणं दध्यौ उत्तस्थौ च द्विजात्मजः ८ सर्वाश्चर्यमये तस्मिन्नेत चित्रं विदुर्जनाः श्रीकाषानगरं प्राप्य त
त्रस्तुत्वा महेश्वरं ९ अभ्युद्रुतो भूत् विना पार्वती स्तन्यपायिना ययोर्दुर्भिक्षरक्षायै दीनारश्शकलं हरः १० प्रापच्छद
न्वहं ताभ्यां वागीशः पूजितो ययौ गत्वा चिदंबरस्थानं स्तुत्वा तत्र नटेश्वरं ११ अनेकैस्स्नापितो देवैः स प्राप कमलालयं
तत्र वल्मीकनाथं च त्यागेशं च महाप्रभुं १२ वाग्भिरम्याभिरस्तोषीत् स स्थलस्थैरपूज्यत वेदारण्यस्थले तस्य परीक्षार्थ

मुमापतेः १३ विभिदेपिहितद्वारमालयेतद्गिरास्वयं श्रीपुराणसरिन्नाम्निनगरेचेश्वरद्विषः १४ विजित्यसौगतानूराज्ञावागीशोनिरकासयत् कांतनीलीपुरेशानंस्तोतुंगच्छन्सवाक्पतिः १५ मध्येमार्गेपरिश्रांतःक्षुधार्तःशिवमस्मरत् तदानीमीश्वरस्तत्रवहनूपाथेयमुत्तमं १६ आगत्यभोजयित्वातंविप्रवेषस्तिरोदधे स्तुत्वनीलापुरेशानंचास्तौषीदरुणाचले १७ सेवितंविधिविष्णुभ्यांवागीशोवृषकेतनं अथकांचीपुरेदेवंकामाक्षीरमणंविभुं १८ स्तुत्वास्थलानिवागीशश्चान्यान्यपिचकोटिशः वृषाचलेवेदगिरौकालहस्तीपुरेतथा १९ महेश्वरमभिष्टूयश्रीशैलंचसवाक्पतिः मल्लिकार्जुननाथंचसिद्धसंघनिषेवितं २० अभिष्टूयपुरारातिंततोवाराणसींययौ नित्यंगंगांभसिस्नातःविलोक्याक्षीपतिंविभुं २१ अभिष्टुवन्वर्षमात्रमतिष्ठत्तत्रवाक्पतिः केदारेचमहाक्षेत्रेस्तुत्वादेवंत्रियंबकं २२ अथकैलासशैलाग्रेसोमास्कंदमवस्थितं द्रष्टुकामोययौकाष्ठामुत्तरामेकएवसः २३ पाषाणेरिवनीहारैःपिंडीभूतैरुपद्रुतः व्यषीदत्पथिवागीशोविशीर्णपदबंधनः २४ सोयंपादद्वयेशीर्णेपाणिभ्यामपिवक्षसा गच्छन्नध्वनिनोत्कंठांविजहौहरदर्शने २५ यदागंतुमशक्तोभूत्तदापिपथिवाक्पतिः उच्चैस्वरेणचुक्रोश पाहिशंकरमामिति २६ तदातापसवेषेणभगवान्परमेश्वरः आगतोवाक्पतिंप्राहकस्त्वंयासीक्ववेतितं २७ कैलासेद्रष्टुमीशानंप्रस्थितोस्मीतितद्गिरं श्रुत्वाप्राहहसन्भूयःतवासाध्योमनोरथः २८ भवतुकैलासशैलस्तुदुर्दर्शोविबुधैरपि वितरामिकरौपादौनिवृत्त्ययदिगच्छसि २९ नयास्यामीतितेनोक्तोमहादेवोघृणानिधिः योगिनामपिदुर्दर्शःतस्मैरूपमर

३ परितश्चाष्टदिङ्नागैः ध्रीयमाणं प्रयत्नतः चंद्रकोटिप्रतीकाशं जान्हवीनिर्झरोज्वलं ३

र्शयेत् ३० भीतः प्रणम्य पाहीति यदोवाच स वाक्पतिः तदा जगाद तं देवः प्रविशेति सरोजले ३१ मग्नस्तत्रोन्मज्जाशु श्री
मत्संचनदीपतेः सन्निधौ सह्यजातोये विस्मयाविष्टमानसः ३२ शिवालयं विशन्नेव ददर्श रजताचलं क्षीरसागरकल्लो
लमालाशिखरभास्वरं ३३ सिद्धचारणगंधर्वमुनींद्रगणसेवितं कल्पद्रुमशतोद्यानदलिकशतोज्वलं ३५ तत्र
सर्वोन्नते शृंगे नानारत्नप्रपंचिते दिव्यसिंहासने देवं सोमास्कंदमवस्थितं ३६ चतुर्भिस्तुतमाम्नायैः चंद्रार्धकृतशेखरं च
तुर्भुजमुदारांगं सच्चिदानंदविग्रहं ३७ कपालमालिकाबद्धकपर्दोज्वलमस्तकं व्याघ्रचर्मपरीधानं व्यालराजविभूष
णं ३८ विलोक्य विस्मयाविष्टः प्रणनाम पुनः पुनः उत्पपात पपालोच्चैः जगाव गेन नर्तह ३९ अवहँप्रीतिमतुलामानंदा
श्रुकलान्वितः भगवन्पाहि पाहीति बद्धांजलिरभूत्सुरः ४० अथ तस्मै महादेवः स्वां मूर्तिं सुमनोहरां प्रसन्नवदनांभोजां भू
षितां भूषणोत्तमैः ४१ प्रवहत्करुणासारशीतलापांगविभ्रमां चिदानंदमयीं दिव्यां दर्शयित्वा जगद्गुरुः ४२ सद्यस्तिरोदधे श्री
मानवाङ्मनसगोचरः तिरोहिते महादेवे वागीशश्च तदाज्ञया ४३ प्रविश्यागस्त्यदिग्देशं मधुरादिषु शंकरं स्तुत्वा स्थले षुग
द्भूयः शरण्यनगरं पुनः ४४ यथा चकार कैंकर्यमिंदुमौलेर्महात्मनः तिलकावत्यपि तदा शिवकैंकर्यवैभवात् ४५ त्यक्त्वा
भूतमयीं मूर्तिमवापगतिमुत्तमां अथ तस्य वियोगेन खिन्नं वागीशमीश्वरः ४६ द्विजरूपी समागत्य वेदांतार्थानबोध
यत् विदिते शजगज्जीवे शिवभक्त्या च वाक्पतिः ४७ अणिमादीस्तृणीचक्रे विभूतीः किंपुनः श्रियं देवास्तस्य परीक्षार्थमु

युक्ता विस्मयं जगुः ४८ पदे पदे च माणिक्यं वैडूर्यं मौक्तिकं धनं चचारो दंघ्यवागीशो दृष्ट्वाचाप्सरसः पुरः ४९ तृणपाली
ति मन्वानो नाभ्युदैक्षत शुभ्रधीः शिवाकारं जगत्सर्वं पश्यतस्तस्य शंकरः ५० प्रीतः प्रादात्स्वसायुज्यं दुर्लभं योगिनामपि ॥
इति श्रीस्कांदोपपुराणे भक्तविलासे एकोनचत्वारिंशोध्यायः ३९ श्रीदंडपाणये नमो नमः ॥ श्रीअगस्त्य उ॰ ॥ अशक्तोपि स्वयं य
स्तु पूजयित्वा महासनः वेदागमपुराणानां सिद्धांतं स्थापयत्यसौ १ विमुक्तः सकलाघौघैः प्रसादात्सोपि शंकरात् कालकर्मभयो
न्मुक्तः कैवल्यं ध्रुवमश्नुते २ इतिहासमिमं प्राहुरस्मिन्नर्थे महत्तमाः यस्य श्रवणमात्रेण सद्बुद्धिरुपजायते ३ अस्ति
त्रैलोक्यविख्यातं विषयांतरमुत्तमं इंद्रस्पर्धाजुषो यत्र राजानः पांड्यवंशजाः ४ रजतः स्वर्णनीलाश्मवैडूर्याकारतीरया
ताम्रपर्ण्या महानद्या श्रीमद्दक्षिणगंगया ५ कांताधररसस्वादुस्वच्छशीतलपूरया सिंधुर्भवति संभिन्नो यत्र मुक्ताकरोत्तमः ६ यत्र कु
मुकहिंतालकुंदमाकंदचंदनैः निरंतरा मही भानोरातपार्तिं न विंदति ७ मितंपचानां गेहे पि कालागरुतरूद्भवाः सुरभीकुर्वते का
ष्ठाः पाकार्थे चेंधनीकृताः ८ यत्र निश्रेणिकारूढैः आतिथेयैर्महात्मभिः पात्राणि राजरंभाणां आह्रीयंते जनांतरे ९ तत्र
पुष्पाकरं नाम पुरमस्ति महत्तरं कर्मठद्विजवेश्मस्थशुकाध्यापितबालकं १० राजपुष्पध्वजो नाम तत्राभूज्जितशत्रुकः देवि
का नाम तस्याभून्महिषी गुणशालिनी ११ अमात्यः कुलपक्षाख्यो शिवभक्ताग्रणीरभूत् क्रतुस्पर्धाजुषा राज्ञा कदाचिद्वज्र
पाणिना १२ अभ्युद्यायसन्नद्धः चतुरंगबलान्वितः निवारितश्चागस्त्येन मुनेः शासनमन्वगात् १३ अथेंद्रः कुपितो मेघानअ
स्त्ये

त्वशासदृशंवदान् पांड्योमावर्षयंस्तेनेनतथाचक्रुर्वलाहकाः १४ अनावृष्टेप्रवर्त्तायांपांड्यदेशस्थिताजनाः॥वृष्टिमत्स्वस्व

जातीरमवापुर्वेदवित्तमाः १५ ज्वरेणेंद्रप्रयुक्तेनसैन्यंराज्ञोविनाशितं तदारंभविदःशाक्याबहवःसेनयान्विताः १६ पुष्पकेत | पुष्पध्वजं राजोनं

नमागम्यवितेनुःकदनंस्वयं देशेथसौगताक्रांतेभस्मरुद्राक्षधारिणः १७ पंचाक्षरीजपपरान्ब्राह्मणान्वेदवादिनः प्रण

राज्ञी४ | म्यदेविकादत्तैःस्वकीयेर्द्रविणैरपि १८ तत्रतत्रस्थितानदीनान्कुलपक्षोह्यपालयत् निरुध्यसचिवंशाक्यराज्ञीमपिचसौ

गताः १९ बाधंतेस्मस्वसिद्धांतप्रवेशेनोजगद्द्रुहः कुलपक्षश्चशरणंहालास्येश्वरमापसः २० स्वप्नेभगवदादिष्टमाकर्ण्योपा | ना५

यमादरात् अन्येद्युरुषसिप्राप्तेयूयंदुष्टमताइति २१ अथभीताश्चतंप्रोचुर्वादंकुर्मोद्विजोत्तमैः जयेस्माकंमतंसस्यात्स्ववेशो

स्तुतथाध्वनि २२ कुलपक्षोथदूतैस्स्वैर्बोधवंतंसमाह्वयत् सर्वोपचारैरभ्यर्च्यकटांवरजयोत्सुकः २३ सर्वविज्ज्ञापयामास | र्या

तस्मैप्रत्यक्षसंभवे सर्वमस्तुश्वइत्यक्ताहालास्येश्वरमादरात् २४ अथापरेद्युःप्रत्यूषेवैदिकाःसौगताअपि विवादायोद्यमंचक्रु

र्हालास्येश्वरसंनिधौ २५ वैदिकास्तुदशाभीलाःकृशाःपंचदशाभवन् एकश्चबोधवानासीत्तेषांमध्येयथारविः २६ अथप्रसंगस्या

रंभेबोधवानाहसौगतान् षट्त्रिंशद्दशसाहस्रसंख्याताराजसंनिधौ २७ पराजितस्यशूलाग्नेस्थितिरत्रपणोस्त्वितः त

थेतितैरनुज्ञातेवादःप्रववृतेमहान् २८ सर्वशक्तिःपरंज्योतिर्हालास्यपतिरीश्वरः बोधवद्वदनेस्थित्वाजिगायसकलार्हतान्

२९ शूलेष्वारोपिताःसर्वेवेदबाह्याःसहानुगाः ववर्षुर्मुदितःशक्रःसुभिक्षास्सर्वतोदिशः ३० अथागताद्विजाःसर्वेवेदोक्तंकर्मच

क्रिरे राज्ञाचकुलपक्षस्त्वबोधवंतंमहेश्वरं ३१ सिंहासनंप्रदायास्मैनेमतुस्तस्यपादयोः राज्येभिषिच्यराजानंपयोसंबोध वान्पुरं ३२ पुष्पध्वजोयथापूर्वंशशासवलयंभुवः कुलपक्षोमहेशानपादांबुरुहभक्तिमान् ३३ शिवप्रसादात्कालेनकैलासपदभाग्भूत् ३४ ॥ इतिश्रीस्कांदोपपुराणेभक्तविलासेचत्वारिंशोध्यायः ॥ ४० ॥ श्रीमत्कालराजायनमः ॥ श्रीअगस्त्य ॥ श्रीशिवायनमः

यस्तुपंचाक्षराचार्यपादाब्जध्यानतत्परः प्रीतःतस्मैमहादेवःप्रयच्छतिनिजंपदं १ प्रथितात्रकथाकाचिच्छ्रूयतांवर्ण्यतेमया ॥ यस्य श्रवणमात्रेणजायतेभक्तिरुत्तमा २ मिथिलानगरेकश्चिद्विद्याशूराभिधोद्विजः सर्वविद्यास्वनोपम्याद्विद्याशूरइतिस्मृतः ३ स पर्यालोच्यसकलान्वेदान्शास्त्राणिबुद्धिमान् विरक्तःसर्वभोगेभ्योप्रवृत्तोमुक्तिसाधने ४ अधीताश्चमयावेदाःशास्त्राणिपठितान्यपि कलहंकंठशोषंचगर्वंचापिफलंत्वमी ५ शब्दब्रह्मार्णवेतावत्अगाधेचरतोमम पंचाक्षरमहामंत्रस्तारवानितरद्वृथा ६ इंद्रजालकलेवान्यत्मिथ्याफलदमीरितं आचार्येणोपदिष्टोयंमुक्तिदःस्यान्महामनुः ७ अन्यूनाधिकगात्रश्चदृष्टलोकपरावरः ॥ शिवभक्ताग्रणीःक्षांतःसर्वसंशयभेदनः ८ वेदोक्तसमयाचारसंपन्नोब्रह्मविद्द्विजः आचार्योपदिलभ्येततस्य किंबहुसेवया ९ उदितेदिवसाधीशेदीपयत्नोनिरर्थकः यथोक्ताचरणंतस्यशिष्योनविसृजेद्यदि १० त्रयोभवंतितस्यामिदासाब्रह्महरीश्वराः तथाविधोमेकुत्रस्यादाचार्यइतिबुद्धिमान् ११ प्रदक्षिणीकृत्यभुवंप्रतस्थेद्विजसत्तमः सब्राह्मणेपुबहुशःसंचरन्नात्मसंमतं १२ नोपालभेगुरुःकश्चित्सदृशःसर्वतोगुणैः तत्रक्रमेणाभ्यगमन्नगरंकमलालयं १३ रुद्रपा

अंतर्गतंतमश्छेत्तुंशशव्कोपिहिनक्षमः ॥ यथाननश्यतितमःकुतस्यादीपवार्तयापि

नहूनांसेवया ॥

दमहातीर्थे स्नात्वात्यागेश्वरं विभुं सेवमानस्त्रिसंध्यं च मासत्रयमवर्तत १४ प्रार्थयामास देवेशं सर्वलक्षणलक्षितः भवानिव
गुरुः कश्चिद्भूयादित्यन्वहं हरं १५ अथार्धरात्रे भक्तो मे कश्चिदत्रागमिष्यति संप्रार्थितस्ते भविता गुरुः सुंदरनामभाक् १६ वेदश्रू निधास्मरं २
रमिति प्राह स्वप्ने त्यागेश्वरो विभुः उत्थितः स तु देवायनत्वा गादीशसंनिधौ १७ शातरुद्रीयमंत्रेण तु शवपरमेश्वरं अथादिसेपरां
धाम ५ बोधौ निमग्ने नागरेजने १८ संस्कृते त्यागराजस्य धन्यमेकांतसेवया प्रेयसीशयनोल्लासवेषधारिणमागतं १९ प्रतिबिंबम
हेशस्य दिव्यलक्षणलक्षितं सुंदरं वीक्ष्य सहर्सविद्याशूरो ति विस्मितः २० गृहीत्वा पादयोस्तस्य प्रणामशतमातनोत् कस्त्वं किंते
कुत इति रहस्ते नात्मनो खिलं २१ तस्मै निवेद्य वृत्तांतं ययाचे मनुमुत्तमं प्रयांतं प्रेयसीवेश्माप्यनुक्त्वा किंचिदुत्तरं २२ अन्वीयात्सुंदरं धी
मान् छायेव सहृदे हिनं सुंदरेंतर्गते वेश्म बहिः कक्षांतरे स्थितः २३ दृष्टः कस्त्वं किमत्रेति विद्याशूरस्तदाश्रयैः ऊचे सुंदरदासं स्वं
६ वेश्मायै मुमुक्षुं शरणागतं २४ ते च तस्यैव दंतिस्मन् वृत्तांतमशेषतः सुंदरं प्राह वेश्यासा हसं तीशयनांतरे २५ कथं गुरुस्त्वं धूर्तोसि
मुमुक्षोरग्रजन्मनः त्वयोपदिष्टं किं वास्यान्मुक्तबंधो व्रजेन्नु सः २६ स सुंदरः प्रियामाह परिहासोत्र नोचितः निदेशादुपदेक्ष्या
मि सख्युर्मे मनुमुत्तमं २७ न पुनर्जन्म तस्यास्ति न मे चार्वांह संतिये तेषामेवमहाघोरे संसारे भ्रमणं भवेत् २८ इत्युक्त्वा तां समाश्लिष्य
सुष्वाप निशि सुंदरः अथ स्वप्ने समागत्य तमाह त्यागनायकः २९ हे सुंदर सखे वाचं मदीयां श्रोतुमर्हसि भक्तश्चैव विरक्तश्च पात्रभूतो
द्विजोत्तमः ३० पंचाक्षरोपदेशेन कृतार्थः क्रियतामिति अथ प्रातः समुत्थाय गच्छंतं सुंदरं द्विजः ३१ नमस्कृत्वानुवव्राज भावयन्
भवमेव तं प्रीतश्च सुंदरस्तस्मै स्नाताय कमलालये ३२ उपादिक्षन्महामंत्रं पंचार्णं पापनाशनं तदर्थं बोधयामास भक्त्या प्रातः

ससुंदरः॥ ३३ मलत्रितयनाशार्थो नमःशब्दोस्य वाचकः तस्यार्थः शिवशब्दश्च पशुपाशनिवर्तये ३४ मंत्रेणानेन सततं तमुपास्य महेश्वरं तस्यैक्यं संप्रदानार्थं संप्रदायार्थ एष ते ३५ वर्णितस्त्वं कृतार्थोसि कामक्रोधौ सदा त्यज समुद्रस्त्व विकारेषु यथा सततमन्वितः ३६ तथास्य करणं कार्यं दृश्यभ्रांतिमहेश्वरः मंत्रोयं गुरुभक्तानां नैव सिध्यति कर्हिचित् ३७ गुरौ माहेश्वरी बुद्धिर्वेदबुद्धिस्तदुक्तिषु तस्य धन्यस्य यस्यास्ति कर्मणीश्वरकृत्यधीः ३८ तस्यायं मुक्तिदस्सद्यो नात्र कार्या विचारणा शिववत्पूजनीयास्ते शिवभक्तास्तु सर्वतः ३९ गुरुर्यथा न तथा पूज्याः सर्वत्र ब्रह्मवादिनः दिव्यं चक्षुश्च दत्तं ते स्वैरं संचर माभयं ४० इत्यादिष्टः स्वगुरुणा स्वपदं प्राप्य भूसुरः ध्यायं सुंदरपादाब्जं नाम चास्य कृतादिषु ४१ वस्त्रान्नगंधपुष्पाद्यैः शिवभक्तान्समर्चयन् नित्यं द्वादशसाहस्रं जपन्पंचाक्षरीमनुं॥ ४२॥ मलत्रयविनिर्मुक्तो जीवन्मुक्तो बभूव ह कदाचिद्दुंजुलपुरे निवसन्ज्ञानचक्षुषा ४३ परेद्युरपि कैलासयात्रां स्वगुरुवांछितां विज्ञाय मनसा दध्यौ कर्तव्यं भूसुरोत्तमः ४४ गते प्राणे शरीरस्य ज्योतिषश्चापि चक्षुषः विज्ञानदेतिरोभूते भवितासे तथास्त्विति ४५ इति निश्चित्य मनसा प्राणानायम्य योगतः कलां भूतमयीं त्यक्त्वा शिवसायुज्यमाप्तवान्॥ इति श्रीस्कांदोपपुराणे भक्तविलासे एकचत्वारिंशोध्यायः॥४१॥ श्रीतीर्थराजायनमोनमः॥ श्रीअगस्त्यः॥ अन्नं क्षीरं फलं वापि नादद्यात् यो४ शिवयोगिने भवानीशंकराभ्यां च पूजितो मुक्तिमेति सः १ इतिहासोस्ति लोकेषु प्रथितः पूजितैः सुरैः उच्यते श्रवणाद्यस्य जायते भक्तिवैभवः २ कवेरतनयापूरसदावर्धितसंपदि शाल्मलीवननामास्ति पुरं सुरपुरोपमं ३ यत्र हर्म्येषु रम्येषु पूजिता रत्नराशयः स्पर्धंते मेरुणा नित्यं वर्धमाना दिने दिने ४ तत्राभूच्छ्वनदत्ताख्यो वणिजां प्रवरो वणिक् नित्यान्नदानाद्भक्तानां किंकरो

कृतशंकरः॥ ५ अनपत्यतयासर्वमपूतंस्वममन्यत॥ उपास्तेस्मव्रतैः शंभुंअपत्यार्थंमहाधनः ६ तस्य शंभुःप्रसादेनकन्या
काचिदजायत यथाहिमवतोगंगालक्ष्मीदुग्धांबुधेरिव ७ वणिग्विलोक्यतांकन्यांकलामिवकलानिधेः मुमुदेचात्मनोवंशं
तयापूतममन्यत ८ तयायतःकुलंपूतंधनदत्तस्ततःपिता चक्रेपूतवतीनामतनयायांमहाधनः ९ सापिपित्रोर्मुदाबालववृधे
रूपशालिनी धनदत्तगृहेयद्वन्नंदनेकल्पवल्लरी १० आपादकेशंविविधरत्नाभरणजालकैः भूषितामोहयामासबाल्य
एवनिधिःश्रियं ११ शिवभक्तवितीर्णेनभस्मनावणिजांपतिः दीर्घायुष्याभिवृध्यर्थमलंचक्रेसुतामपि॥१२ कालेसमानंनि
श्चित्यरूपद्रविणसंपदा सुतंपरमदत्ताख्यंनागपुर्वणिजोवणिक् १३ आहूयप्रददौकन्यांधनदत्तःसबंधुमान् वणिग्वधूवरौयुक्तौ
रतिपंचशराविव १४ वितरेतुर्मनःप्रीतिंबंधूनांपश्यतांपुरः प्राथपित्वाथपितरोवरस्यनिजमंदिरे १५ स्थापयामाससुतयासा
र्धंपरमदत्तकं नित्यंपरमदत्तोपि शिवभक्तःसहस्रकं १६ भोजयित्वास्वयंभुंक्ते पूतवत्यागृहांतरे अर्थंविभज्यस्वधनंजामात्रे
सददौमुदा निर्मायहर्म्यमपरंवणिक्परमदत्तकं तत्रप्रावेशयामासकन्यांजामातरंतथा १८ सर्वसंपत्समृध्यंतदंपत्योर्मंदिरं
तयोः॥ अंतःपुरोत्तमेसिंधोर्लक्ष्मीमाधवयोरिव॥१९॥ त्वयान्नंशिवभक्तेभ्योदीयतामनिवारितं॥ इतिपूतवतींभार्यांशिवभक्तःस
मन्वशात्॥२०॥ आबाल्यशिवभक्तासाभक्तानभ्यागतान्गृहे साज्येनचान्नेनतर्पयामाससर्वदा॥२१ भक्तांररक्षमातेववांछिता
न्नप्रदानतः बुभुजेयुवतिःकालेभोगान्शय्याश्चदुर्लभान्२२ पयःफेननिभाशय्यानवरत्नगृहे॥ अनुकूलश्चभर्तास्याःपुपुषुर्मुद
मुत्तमां॥ २३ उपचारेषुभक्तानांनालस्यंक्वचिदाश्रयत् गमयामाससमयंभक्तिमूर्त्येवशांकरी २४ अथैकस्मिन्दिनेकश्चि

व४

परमदत्तः५ नू मयं २

द्रुक्तः शंभोरुपायनं ददौ परमदत्ताय सहकारफलद्वयं २५ एकनाकेन तदादाय पूतवत्स्यै ददौ च सः अथापरेद्युस्तद्गेहं गिरीशो भक्तवेषधृक् २६ आगत्य क्षुधितोस्मीति वरयामास तां सती पूतवत्स्यपि तन्नत्वाजगाद विनयान्विता २७ भविता समये पाकः किंचिदन्नमिहाधुना ॥ भुज्यतामिति सक्षीरं फलमेकं तयोरपि २८ न दत्वा भोजयामास तत्क्षणं सोपि तिरोदधे सिद्धा नाम हि मा गोप्यइति सा हृदि तद्दधे २९ प्राग्भुक्तवद्भिः स्वगृहे विहिताशीस्तपस्विभिः सायं परमदत्तोपि भोक्तुमंतर्गृहं ययौ ३० भर्त्रे परमदत्ताय हितमन्नं पयो घृतं दत्वा तं भोजयामास दद्दावाम्रफलं च तत् ३१ अमृतास्वादसरसं तत्फलं प्राश्य हृष्टधीः अन्यत्क्वेति मुखं तस्या वीक्षते स्म वणिग्वरः ३२ अथ सा स्वकृतं वक्तुमशक्ता भयपीडिता महानसमनुप्राप्य विधूतकरपल्लवा ३३ रक्षेति मनसा शंभुं शरणं पूतवत्स्यगात् शिवाज्ञया तत्सदृशं फलं तस्याः पुरोपतत् ३४ मुदिता तद्ददौ भर्त्रे बुभुजे सोपि तत्फलं पूर्वभुक्तफलास्वादुतरं फलमवेत्य तत् ३५ इदं कुतस्त्वदस्याह भार्या करुणया विभोः इति सा पूतवत्स्याह तां प्रहसन्नाह तां वणिक् ३६ कारुण्यं त्वयि चेच्छंभोरन्यदानीयतां फलं इत्युक्त्वांतः प्रविश्यैषा चतुर्वर्गफलप्रदं ३७ पूतवत्सा स्मरत्ताप्त्वा फलमन्यद्ददौ शिवः भर्त्रे तदपि सा दत्वा प्रहर्षमतुलं ययौ ३८ भीतः परमदत्तो भूत्पूतवत्स्याः स वैभवात् वशीकृतो नया शंभुः ब्रह्मादीनामगोचरः ३९ शिवद्रोहो मया प्राप्तः यदीयं दास्यकारिणी पार्वती नूनमेषा स्यान्नोचेच्छक्तिः क्व चेदृशी ४० त्यागे तु पापी भविता सह वासे महद्भयं कथन्नु खलु कर्तव्यमिति चिंतां दधौ हृदि ४१ वाणिज्यव्यपदेशेन गच्छाम्यहमितोन्यतः इति निश्चित्य मनसा महत्यां नावि सो वणिक् ४२ वस्तून्यारोप्य विविधान्यनुद्वीपांतरं प्रति ययौ पूतवती शक्तिमद्भुतां मनसा स्मरन् ४३ द्वीपांतरंगतेनाथ पूतवत्स्यपि सान्वहं दत्वान्नं शिवभक्तानामेकभुक्त्या व्यतिष्ठत ४४ ततः परमदत्तोपि गृहीतधनसंग्रहः देशं समुद्रमार्गेण प्राप्य पां

डास्यभूस्करा: ५५ अन्योवणिग्वरस्तत्रामुद्राह्यन्यवसच्चिरं तस्यांकाचिद्भूत्कन्यानाम्नासवणिजांवरः ५६ चक्रेपूतवतीं
तस्याःस्वापराधविशुध्दये धनदत्तश्चिरगतमथजामातरंजनैः ४७ आढ्यैःपांड्यस्थितंज्ञात्वातत्रप्रेरयदात्मजां सावंधुभिःप
रिवृतावृतापरिजनैरपि ४८ जगामभर्तुर्निकटमारूढशिबिकोत्तमा श्रुत्वापरमदत्तस्तामागतांमेनिकेततः ४९ ननामपादयो
स्तस्याःसहपुत्र्याचभार्यया अभिप्रायमशेषेणपूर्ववत्तेस्येन्यवेदयत् ५० त्वयापराधशुध्यर्थंकन्यात्वन्नामचिन्हिता त्वामहंदेव
त्वाबुध्याशरणंपूतवत्यगां ५१ यद्यत्राप्यागतासात्वमहंगच्छामिचान्यतः इतितेनोदितासाध्वीपूतवत्याहनायकं ५२ त्वदर्थं
रक्षितमिदंवपुर्मेनाथनान्यथा यदित्वयापरित्यक्तागच्छाम्येषाशिवांतिकं ५३ इतिसाब्राह्मणांस्तत्रमेलयित्वामहाधनैः पू
जयित्वादुर्धावेगा त्सर्वमांसानियोगतः ५४ पैशाचंरूपमस्माषीत्सेवार्येनेभवत्विति तस्यारूपंतथैवासीद्ययुर्लोकाश्चविस्म
यं ५५ तदानींप्रमथैर्नीतंविमानंचंद्रपांडुरं पूतवत्यधिरुह्यागात्कैलासाद्रेरुपत्यकां ५६ अयुक्तश्चरणस्पर्शःकैलासस्येति
मौलिना तपसारुह्यशैलेंद्रमागच्छंतीहरांतिके ५७ दृष्ट्वादेवीगिरिसुतापप्रच्छतदुदंतकं पिशाचीकेयमायातिचरंतीमौलिनोतिकं
अस्यास्तिविकृतंरूपंतपःशक्तिर्महत्तरा योजनानांचतुर्विंशत्सहस्राणिमहीतलात् ५९ मूर्ध्नातीत्योपरिगिरेर्यत्प्राप्तानवचां
तिकं अथगौरींजगादेशःस्मयमानमुखांबुजः ६० मातामसेयंकल्याणीभक्तामेपोषितामया पूजनीयातवेत्युक्त्वासुतांगिरिजया
सह ६१ प्रत्युद्गम्यजगादेशोमातस्तेकिंमनोमयं इतएहीत्युवाचायांप्रणमेतिशशासच ६२ नमस्तवार्येदेवायसर्वांतर्यामिनेत्वयि गौरी
माभाष्यजरतीजगादपरमेश्वरं ६३ कैलासश्रृंगेगिरिजासमेतोदृष्टोमयात्वंयदतोस्मिधन्या त्वदंघ्रिचिंतांकिंनुमयेतिशृण्वतेनाहसा

परमदत्तः १

भार्यायै ८

धुं दृष्टं वने धातुः १

ऽपदसका देरास नाभूमि: ८

मस्तके न ५

मवेक्षितं पाठः २

वार्ता ५

पूतवतीमहेश ६४ आनंदनृत्यंभवतोद्रष्टुकामास्मिशंकर सकृद्दर्शयमेतातनान्यदिच्छामिवांछितं ६५ दर्शयिष्येवटारण्येनृत्यं
तत्रैवगम्यतां इत्युक्तानहिमेशक्तिर्गंतुमस्तीतितत्रसा ६६ पदंगंतुंहीतुमीशस्यप्रवृत्तांतर्दधेहरः अथतामाज्ञयाशंभोःहस्ताग्रे
णविनायकः ६७ स्थापयामासदूसिवटारण्येहरालये श्रांसोन्मील्यदृशोवृधांपरितस्तमवैक्षत ६८ सभांददर्शमहतींनवरत्नवि
भूषितां यत्रवेत्रधरोनंदीमायायवनिकोभुकं ६९ वल्लकीवादिनीवाणीवंशगानपरेंदिरा मर्दलाघातकोविष्णुःतालहस्तश्चतुर्मुखः७०
चत्वारोदीपिकावेदाःसनकाद्याःसदस्थिताः कक्ष्यात्रयंभगवतीप्रसवित्रीचछंदसां ७१ वितानक्षौमवलयोदर्शनान्यखिलान्यपि सप्त
कोटिमहामंत्राःकीर्णानिकुसुमानिच ७२ पंचाक्षरीभद्रपीठंचंद्रादित्योचदर्पणे साक्षिणीचपराशक्तिःशंकरीपरदेवता ७३ सभां
पूतवतीदृष्टुंकेलासंलोककौतुकं संत्यज्यसहसोत्थायकिमेतदितिविस्मिता ७४ अथतस्येमहादेवःदर्शयित्वास्वतांडवं सहेदेमुक्तां
तांकृत्वास्थापयामासचांतिके ७५ इतिश्रीस्कांदोपपुराणेभक्तविलासेद्विचत्वारिंशोध्यायः॥ ४२॥ श्रीकाशीनाथायनमोनमः॥ श्री
श्रीअस्त्यु॥ सेवयाशिवभक्तानांनामसंकीर्तनेनच सपर्ययावास्यपुरेनेपमृत्योर्निवारणं १ इतिहासोमहानत्रमहद्भिःसमुदाहृतः
यामाकर्ण्यनरोभक्त्यामुच्यतेमृत्युबंधनात् २ अस्तिचंद्रपुरंनामचंद्रमंडलपांडुरैः महाधनानांप्रासादैःपरितःपरिमंडितं ३ स्वधर्म
निरतैर्वर्णैःसर्वतःसमलंकृतं आभूतिचरणाख्योभून्तत्रकश्चिद्द्विजोत्तमः ४ इष्टापूर्तियशोयस्यविमलीकुरुतेजगत् अग्रणीर्वे
दविदुषांशिवभक्तोजितेंद्रियः ५ येनवैदिकसिधांतोजिनान्जित्वाप्रतिष्ठितः वागीशस्यपदेतस्यसदधोभक्तिमुत्तमां ६ स्वेनालये

षु सर्वत्र निर्मितेषु पिनाकिनः वापीकूपतटाकानामंतिके च शिलांतरे ७ धर्मं स्वकीयः सर्वोपि वागीशस्येत्य घोषयत् विलिख्य स्था
पयामास प्रपास्कच विशेषतः ८ वागीशोपि तदा शंभोः स्थानेषु भुवि पर्यटन् घर्मे कदाचिन्मध्याह्ने से[वयाप्राप]तत्प्रपां ९ पयः स्फुरभिलं त
त्रपीतं शीतं गतश्रमः निर्मितामुपलस्तंभे ददर्शाक्षरमालिकां १० जिताहंतस्य धर्मोयं वागीशस्येति निर्मलं विस्मितः प्रीतिमानाहूत
स्य कृत्याधिकारिणः ११ प्रपाधर्मोत्र कस्यायमिति तत्प्रवदन्मुदा आभूतिचरणो नाम कश्चिद्वागीशकिंकरः १२ द्विजस्तेन कृता सेयं प्रपा
तत्सेवका वयं तेन दृष्टाः स कुत्रेति तेन तद्गृहमदर्शयत् १३ वागीशं तद्गृहद्वारं यदा प्राप द्विजोपि सः कर्तुं माध्यान्हिकस्नानं निर्जगाम गृहा
त्स्वयं १४ नासाहतं शिरस्तस्य तदावेगेन निर्यतः वागीशो मे शरण्यः सद्[इत्यवाच] बहिः स्थितं १५ साक्षादिव महादेवं गृहद्वारमुपागतं
भस्मावकुंठिततनुं मुदितः प्रणनाम सः १६ दर्शनात्ते कृतार्थोस्मि देवस्येव पिनाकिनः पादरेणु पवित्रं ते भूयाद्[स्म]द्गृहं वरं १७ कर्तुमातिथ्य
मिच्छामि क्रियतां मय्यनुग्रहः इति प्रवेशितो विश्म कृतासनपरिग्रहः १८ नाम किं ते द्विजं ब्रूहि शिवभक्त्या महानसि इति वागीशसं
दृष्टः तदाह विहितांजलिः १९ अहं वागीशदासोस्मि विभूतिचरणाह्वयः ऐहिकामुष्मिकं मे च सर्वं वागीशधर्मतः २० इत्याक
र्ण्य सतं प्राह किमिदं क्रियते त्वया दासाय स्य विरिंचाद्याय एको जगतां प्रभुः २१ यन्नामस्मरणं जंतोः महापातक निष्कृतिः विहाय तं
महादेवं नाम तस्यातिपावनं २२ शाल्मलीपुष्पसंकाशं भवान्यं शरणं गतः वागीशः कुत्र वा कोयं देवो वाथ स मानुषः २३ शिवदेवा
वयं क्वापि नैव भुंजामहे न्यतः चिन्हमात्रेण शैवोसि हंत भक्तिस्तवान्यतः २४ इति तद्वाक्यमाकर्ण्य पुनस्तं प्राह भूसुरः मैवं भो
वद मे वाचमिमामाकर्ण्य तामृषे २५ शंभोः स्थिरं चरं चेति रूपद्वयमुदीरितं असतां निग्रहं चापि लोकेस्मिन्सदनुग्रहं २६ स्थिरे परे

सोमर ३

भ॰वि
६७

क्षो विज्ञेयः चरे प्रत्यक्ष एव सः स्थिरं तु लिंगवेशादिः चरं रूपं भवादृशाः २७ चरेणैव स्वरूपेण निग्रहानुग्रहौ विभुः। करोति जगतां शंभुः दर्श-
नमतां फलं २८ यथा शिवस्तथा भक्तः तयोर्भेदो न हि क्वचित्। वागीशमूर्तिमास्थाय जिगाय करवासरः २९ प्रतिष्ठापितवान्लोके वैदि-
काध्वानमुत्तमं सशंभुरेव यस्यास्मिन्मर्त्यधीः स विनश्यति ३० तस्मादस्मत्कृतं सर्वं तस्यैवेति मतिर्मम इत्युक्ते भूमिपादेन वागीशो स्मि-
त्वा वचः ३१ मुमुदे भूस्करेंद्रोपि निधिं प्राप्यैव निर्धनः आतिथ्यो योगसमये कदलीदलहारिणं ३२ तत्पुत्रं मदशत्सर्पः स बभूवाति-
मूर्छितः प्रज्ञाय मूर्छितं पुत्रं तं भोजयितुमुद्यते ३३ प्रति आभूतिचरणे प्राह वागीशो भोक्तुमुद्यतः अस्यां पंक्तौ सपुत्रेण त्वयापि स्था-
प्यतां सतं ३४ भोजनायास्य पुत्रस्येति त्वरयामास दंपती विचारं प्रापतुस्तौ तु उक्ते नैवान्यतं भवेत् ३५ आतिथ्यविघ्नो भविता यथा-
र्थवचने ध्रुवं इति संचिंत्य तौ सत्यं पुत्रवृत्तांतमूचतुः ३६ माभैष्टमिति तानुक्त्वा स्वसेवानृणमुक्तये मृतस्य निटिले भस्म तत्पुत्रस्य निधा-
य सः ३७ नीललोहितमस्तौषीद्वागीशः शूलधारिणं जलधिमथनजातं यः पुरा कालकूटं प्रतिभयममराणां विष्टपानां च शंभुः ३८ अ-
पिबदभयदाता देवतैः स्तूयमानो विकिरयतु विषार्तिं विस्मितश्चेतसा नः ३९ इति वागीशवाक्येन द्विजपुत्रः सजीवितः विस्मयं परमं
जग्मुरपि देवाः सदानवाः ४० अथ तस्य गृहे भुंइक्त्वा वागीशस्सेच्छयाययौ पुनरुज्जीवनात्सूनोः मुमुदाते च दंपती ४१ तमेवाभूतिचर-
णश्चिरं ध्यायन्महेश्वरं अवाप शिवसायुज्यं दुर्लभं योगिनामपि ४२ इति श्रीस्कांदोपपुराणे भक्तविलासे त्रिचत्वारिंशोध्यायः ४३
श्रीमल्कालराजाय नमः श्रीअगस्त्यः॥ संगमात् शिवभक्तानां सर्वपापनिबर्हणात् दुस्तरं जन्मदुःखाब्धिं जंतुस्तरेत्ति लीलया
अत्रैवोदाहरंतीममितिहासं पुरातनं चरितं नीलनग्नस्य भूयते यत्र पावनं २ मरुद्वृधासरित्तीरे मंगलाख्यं महत्पुरं सदा धर्म-
रतैः सद्भिः साग्निहोत्रैरधिष्ठितं ३ तत्रासीन्नीलनग्नाख्यो ब्राह्मणो वेदपारगः ब्रह्महर्षिर्जितक्रोधो भक्तिमान्परमेश्वरे ४ नीलः

दृष्टांति १ मति२ भाले१ नाशयतु ६

निर्मलं २

कर्मफलं प्रोक्तं तन्न लिप्यति नग्नवत् ॥ पतस्ततो भवल्लोके नीलनग्नाह्वयो द्विजः ५ त्रिपदार्थविवेकाभः प्रक्षालितमलत्रयः
वाजपेयादिभिर्यज्ञैराराधमहेश्वरं ६ नीलकंठस्य देवस्य नीलनग्नः प्रसादतः दृश्ये जगति सर्वत्र व्यधत्त शिवदर्शनं ७
शिवध्यानेन सततं नीलनग्नस्य मानसं कृतकक्षोद्योगेनानाविलं सलिलं यथा ८ अथैकदा सो दिवसे महेशं फलैश्च दुग्धैर्मधु
नाभिषिच्य ॥ निवेद्य चान्नं दधिदुग्धपूर्णं हृष्टस्स तुष्टाव शिवान्तिकस्थः ९ हरं स्तुवंतं भर्तारं समयाप र देवता निष्ठति सांज
लिस्तस्य भार्या सेवत शंकरं मौलौ शंभोस्तदा लूतानिपत्य लघुतंतुभिः घनैः प्रच्छादयामास सा तूर्णं निर्ममार्जतं ११ लूता
नखक्षते मौलौ शंभोरसृगदृश्यत साध्वीभक्तिपरिक्षार्थं दर्शिते शंभुनासृजि १२ लिलेह जिह्वया भीता सा लालादोषभया
द्गुतं शशाम सद्यो रुधिरं प्रीतश्चाभून्महेश्वरः १३ भार्या रसनया लीढं शिरः शंभोर्वीक्ष्य नग्न कर्णार्पितकरः शोचन्नीलनग्नो
जगाद तां १४ त्वया कृतः शिवद्रोहः स त्वं तल्लमं शिक्षिता न मे त्वयास्ति संबंधो गच्छ क्वापि यथेच्छया १५ इति भर्तुर्निशम्योक्तिं सा
कृतांजलिरब्रवीत् गतिस्त्वमेव मे त्वं भो नैव द्रोहः कृतो मया १६ सर्ववेदशुभं वान्यत्सर्वसाक्षी महेश्वरः अथ तां नीलनग्नो
पि कूपयन्मौलिमालनः १७ विधाय साहसं पूर्वं प्रच्छादयितुमिच्छसि स्त्रियो हि साहसपरा इरूत्त्वा स्वगृहं ययौ १८ गते भर्तरि सा साध्वी सान्त्वा
रणं शंकरं ययौ उपोषितानयद्रात्रिं तत्र पंचाक्षरीपरा १९ नीलनग्नमथ स्वप्ने प्राह वाचं महेश्वरः मूर्खत्वेन विजानीषे तस्या भक्तिं मयि स्थिरां ॥
महाभिषेके निर्वृते सम्यङ्गे मार्जनं कृतं पंचामृतकणां मौलौ मम लग्नं क्षुधार्दिता २१ न्यपतत्तीक्ष्णनखराद्भक्षेतन्नखक्षतात् उत्पन्नं स विषं
रक्तं द्दृष्टं त्वद्भार्यया मम २२ तद्रीत्या विरतानो चेत् सर्वं स्वर्णं भविष्यति यदित्यक्ता त्वया सेयं सजामि त्वामहं ध्रुवं २३ नीलनग्नमुदीर्यैवं नील

निरमली ३

स्त्री ५

लिंगं १

लूता २

कंठस्तिरोदधे अथोत्थायदयाविष्टोनीलनग्नःशिवालयं २४ क्षम्यतामितिभार्यांस्वामानीयनिजमंदिरं शिरंस्वर्णमयंलीढं दृष्ट्वाशंभो
स्सविस्मितः २५ तामेवगिरिशंध्यायन्नकदाचनरुष्यति तयासहनिवासेनसंकृतार्थममन्यत २६ अथकालेनमहतासहंबोधवतोगतान्
नीलनग्नोमहाभागान्शिवभक्तान्दृढव्रतान् २७ संपूज्यवासयामासस्ववेश्मनिमहामतिः अथतेषुप्रयातेषु शिवस्तोत्रपरायणः २८
नीलनग्नोमहाभक्तोभार्ययासहितस्तया निर्धूतबंधनःप्रापगतिमावृत्तिवर्जितां २९ इतिश्रीस्कांदोपपुराणेभक्तविलासेचत्वारिंशो
ध्यायः ॥ श्रीमदंडपाणयेनमोनमः ॥ श्रीअगस्त्यः कर्मजातानिसंगृह्यपुण्यस्थलनिषेवया उपास्तेशंकरंभक्त्यासोपिमुक्तोभवेद्द्विजाः १
श्रूयतामितिहासोत्रविश्रुतोविदुषांप्रियः श्रवणाद्यस्यकैंकर्येशांकरेभवितामतिः २ वागीशज्ञानसंबंधनीलनग्नान्दिरक्षिपुः दीनारानन्व
हंप्रादात्सोपानेयत्रशंकरः ३ हेमलाभपुरंनामतदादिप्रथितंहितत् द्विजःकश्चिदभूत्तत्रशिवभक्तगणाग्रणीः ४ अध्येष्टवेदानखि
लान्अन्वतिष्ठक्रतून्शतं तत्राग्नौमंडलेभानोःशिवलिंगेचदेशिके ५ भावयन्नित्यमीशानंभक्त्यानंदिसमोभवत् अतस्तमाहुर्विप्रे
न्द्रानाम्नाचनवनंदिनं ६ सफाल्गुनोत्सवेशंभोःपौर्णिमायांद्विजोत्तमः करिष्यन्त्यागराजस्यदीपाराधनमुत्तमं ७ घृतंग्रहणमुद्दि
श्ययथावापणवीथिकां घृतविक्रयिणंतत्रनवनंदाहसोगतं ८ गृहाणनिष्कदशकंदेहिमेघृतमुत्तमं इत्युक्तश्चाहतंप्राह घृतंतेकस्यव
क्षिति ९ नवनंदःपितंप्रीत्याप्राहदेहिनवंघृतं भक्तोस्मित्यागराजस्यप्रीतयेलक्षवर्तिका १० कर्तव्याद्येतिकिंतेनेत्युक्तःशंभोरनुग्रहः
फलमित्याहकःशंभुरितिपप्रच्छतंपुनः ११ तमाहविप्रोदेवानांनियंताएतनुःशिवः स्वयंप्रकाशस्त्यागेशःतद्भक्त्यामुच्यतेनरः १२ ततः
प्रहस्यतंप्राहवेदबाह्योमहाद्विजं पृथिवीवायुराकाशःचंद्रादित्यौचपावकः १३ अंभश्चयजमानश्चएताःशंभोर्हिसंगताः मूर्तिरेषांसमाकु
त्रसंगःछन्नेविरोधिनः १४ शिवात्तयोविरोधश्चेत्अद्वितीयोविधीयतां इत्युक्तःसशिवद्रोहीनसंभाष्यइतिक्रुधा १५ व्यथमानश्चतद्वाक्यैस्त्या

वागीशेनसह
च तुः ४
दीपान् ६
प्राचार्ये ७
घृतविक्रेतारं ८
नैनंनास्तीकंदूसर्थ ५
कृत्यार्थ ५ फसे
प्रयोजनाय ५
घृतविक्रेतार २
दृ ८

भिन्नप्रकृतयः २ निमः १

नवनंदिनं३

शरीरे ध नद्र यात ६

व३

गेशं शरणंगतः हतोस्मिसौगतगिराचेदमर्मछिदाचिरं १६ रक्षरक्षेतिनिश्वस्यनवनंदीरुदन्स्थितः जलदीपान्विधेहीतिदयालुःप्राहतंहरः १७
संमेलयित्वासकलान्कमलालयवासिनः सायंसलक्षपात्रेषुदत्त्वाविमलवर्त्तिकाः १८ पूरयामाससर्वत्रकमलालयवारिभिः कदाचिच्छि
वयात्रायांतंनीचस्पर्शशंकितं १९ सुप्तमुत्थापयित्वेशःकमलायगणाजनान् दर्शयामाससकलान्नीलग्रीवांश्चतुर्भुजः २० शिवरूपजुषः
सर्वान्चांडालान्ददर्शसः तांश्चप्रज्वालयन्दीपान्तदद्भुतमभून्महत् २१ महावातेपिचलति जज्वलुस्ताःशिवाज्ञया भीताःपलायि
ताःसर्वेशाक्याद्वीपांतरंगताः २२ ववर्षुःपुष्पवर्षाणिदेवाःसर्वेचविस्मिताः आप्रभातंचतौदृष्ट्वानवनंदीज्वलच्छिखान् २३ भक्त्याप्रहृष्ट
हृदयस्तुष्टावपरमेश्वरं श्रीनवनंदी० यस्याज्ञयानवच्छिद्रेस्तंद्रुस्तिष्ठतिमारुतः २४ तन्नमामिमहादेवंत्यागेशंभक्तवत्सलं २५ शासनात्सा
वकोयस्यसर्वेषामंतरास्थितः तन्नमामिमहादेवंत्यागेशंभक्तवत्सलं २६ बडवामुखवह्निश्चज्वलत्यब्धौयदाज्ञया तंनमामिमहादेवंत्यागेशंभ
क्तवत्सलं २७ भूतान्यपिविरुद्धानिमिलितानियदाज्ञया तन्नमामिमहादेवंत्यागेशंभक्तवत्सलं २८ फलमन्वेतिकर्तारंकर्मणांयस्यशासनात्
तंनमामिमहादेवंत्यागेशंभक्तवत्सलं २९ औषधेचमणौमंत्रेभातिशक्तिर्यदाज्ञया तन्नमामिमहादेवंत्यागेशंभक्तवत्सलं ३० नात्येतिसमयं
ज्योतिःसिंधुकालश्चयद्भयात् तन्नमामिमहादेवंत्यागेशंभक्तवत्सलं ३१ विनाधारंजगद्येनसाधारमिवनिश्चलं तंनमामिमहादेवंत्यागे
शंभक्तवत्सलं ३२ ब्रह्माच्युताद्यविदितंचशिरःपदंतेनासाशिलाविदितमात्मसुहृत्प्रियायाः तस्मैनमोस्तुभवतेप्रणतार्तिहंत्रेत्यागेश्वराय
मयिदेहिसदालोकं ३३ श्रीअगस्त्यः नवनंदीस्तुवन्नेवंत्रिसंध्यंत्यागनायकं तत्रैवतदनुज्ञातःसभार्योन्यवसच्चिरं ३४ कर्माखिलंचसंगृह्य
कुरुतेभक्तिमुत्तमां त्यागेश्वरोददौतस्मैकैवल्यंनवनंदिने ३५ इतिश्रीस्कांदोपपुराणेभक्तविलासेपंचचत्वारिंशोध्यायः ४५ श्रीमत्कालराजा
यनमः श्रीअगस्त्यः अथवक्ष्येमुनिश्रेष्ठाःकथांकृपणविद्विषः स्तन्यामृतप्रदानेनयस्यधात्रीहिमाद्रिजा १ कावेरीहेमसभयोरंतरास्ति

अनवैरिणःहरदत्तस्य १

पुरं महत् किंचिद्ब्रह्मपुरं नाम ब्रह्मलोकरवापरः २ संवर्तसलिलाक्रांते त्रैलोक्ये यां महेश्वरः द्रोणीं विधाय त्रिगुणीं तत्राध्या धायाप्यपाल
पत् ३ वृषध्वजपुरी ब्रह्मपुरी विष्णुपुरी तथा कालीपुरा मलपुरी तत्कथ्यते या मुनीश्वरैः ४ पत्रोद्यानेषु माकंदास्तत्राककमलोदरे मुंचंति
मधुबिंदून्द्रावन्हावाज्याहुतिर्यथा ५ धम्मिल्लोद्वर्तनेस्त्रीणां नृत्यतां पत्रबर्हिणां बालयूथकरास्फोटो मंद्रस्तालध्वनिर्यथा ६ शिव
व्रत इति ख्यातः तत्रासीद्द्विजसत्तमः शिवभक्तो जितक्रोधस्सर्वसंपत्समृद्धिमान् ७ विवर्त इव धर्मस्य विद्यानां वासमुद्गमः शांते रिपुरी
पाको दांते रिपुपरिक्रमः ८ उल्लासादवबोधस्य मोक्षस्येव महापथः वेदांतार्थोपदेशेन पवित्रितजगत्त्रयः ९ विनयाभरणा तस्य
करुणेव शरीरिणी आसीद्भगवती नाम धर्मपत्नी यथांबिका १० अरुंधतीव शिष्टस्य यथा स्वाहेव बर्हिषः तथा प्रतिष्ठामगमदातिथ्ये
षु द्विजन्मनां ११ यस्य केलीवनाक्रीडा पर्वताग्राश्रिता मृगी चर्विताईतृणं दत्ते मृगाय शशलक्ष्मणः १२ तस्य संपत्समृद्धस्य सकल
त्रानुकूलतः भाग्येन स्वर्णपुष्पस्य सौरभश्रीरिवाभवत् १३ षट्कर्मनिरतस्यास्य सभार्यस्य महात्मनः अनपत्यतया दुःखमंतः
र्व्याधिरिवाभवत् १४ अथ तौ दंपती खिन्नावपूरितमनोरथौ अपत्यार्थे महादेवं तोषयामासतुर्व्रतैः १५ परिणोरुद्रमंत्रेण पार्वतीप
रमेश्वरौ द्रोणप्रसूनैरानर्च त्रिसहस्रैर्दिने दिने १६ क्षीराभिषेकं विदधे धारया लिंगमूर्धनि यावदेकादशावृत्ति रुद्राध्यायः समंत्र
वित् १७ प्रदक्षिणशतं शंभोस्तैलाभ्यंजनवर्जिता कुर्वत्यलवणं भुंक्ते बिल्वानामभिषेककृत् १८ तैलं क्षीरं शिशूनां च प्रददावनिवा
रितं एवं वर्षत्रयं तस्य भार्या च व्रतमादधे १९ तथापि दृश्यते नस्म प्रसादः परमेश्वरः अथ सा चिरनिर्विण्णा द्वादशाहमुपोषिता २०
द्रोणीपुरेश्वरस्याग्रे रुदती वाक्यमब्रवीत् वेदविद्याविहीनो यो ब्राह्मणस्त्री रनात्मजा २१ तावन्नराधिवत् भूमेर्भारभूतौ न संशयः
ददासि चेन्न पुत्रं मे प्राणास्त्वर्पिता मया २२ इति निश्चित्य सा साध्वी तत्र प्रायमुपाविशत् तस्यां रात्रौ हरः स्वप्ने पायसान्नेन पूरितं २३

माकंदः पिकवल्लभः। मत्सिका॥

स्त्व १